THE

CHOWKHAMBA SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 3[illegible]

वैशेषिकद

महर्षिकल्पप्रशस्तदेवाचार्यविरचितम्

प्रशस्तपादभाष्यम् ।

पण्डितप्रवर जगदीशतर्कालङ्कारविरचितया सूक्तिटीकया
महामहोपाध्यायपद्मनाभमिश्रकृतया सेतुव्याख्यया
विद्वच्चूडामणि व्योमशिवाचार्यनिर्मितया व्योमवत्या च समन्वितम्।
वाराणसीस्थराजकीयसंस्कृतपुस्तकालयाध्यक्षेण पं० गोपी-
नाथकविराजेन न्यायोपाध्याय पं० दुण्ढिराजशास्त्रिणा च संस्कृतम् ।

THE

PRASHASTAPADABHASHYAM

BY Prhshstadevâchârya

WITH COMMENTARIES:

Sūkti, BY JAGADISA TARKALANKÂRA,

Setu, BY PADMANABHA MISHRA, &

Vyomavati, BY VYOMASHIVACHARYA.

Edited by

GOPINATH KAVIRAJ, M. A.

PRINCIPAL GOVERNMENT SANSKRIT COLLEGE,

SARASVATI BHAVAN BENÂRES,

and

DHUNDHIRAJ SHASTRI Nyâyopâdhyâya.

FASCICULUS III—३.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.

Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1927.

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

एव पार्थिवविषयास्तथापि गौतमनये प्रमेयाणां द्वादशविधत्ववत् कतिपयानामेव पार्थिवविषयाणां कणादनये त्रैविध्यमित्याशये-नाह त्रिविधो मृत्पाषाणस्थावरलक्षण इति । मृत्त्वं—मृत्तिका-त्वम्, पाषाणत्वं-प्रस्तरत्वम् । इमौ जातिभेदौ । स्थावरत्वन्तु कृत्यवच्छेदकावृत्तिभोगावच्छेदकवृत्तिजातिमत्त्वम् । तादृशी च जातिर्वृक्षत्वतृणत्वादिः सुलभा । स्थावरत्वमपि वृक्षत्वतृणत्वा-दिव्यापकः पृथिवीत्वव्याप्यजातिभेद इति त्वाचार्याः । भूप्रदे-शाः—काश्यादयः । प्राकारः—प्राचीरं, इष्टका—लोष्ठम्, आदि-ना पत्रिकाद्युपग्र । मृत्तिका मृदात्मिका पृथिवी। कारा इत्यर्थः । के पाषाणा इत्यत्राह पाषाणा इति । उपलः-शिला, मणिः—पद्मरागादिः, वज्रं-हीरकम् । आदिना गैरि-कहरितालमनःशिलाद्युपग्रहः । के स्थावरा इत्यत्राह स्थावरा इति । वृक्षपदं पुष्पोत्फलिवृक्षाम्रादिपरम् नातोऽग्रिमस्य वन-स्पतिपदस्य वैयर्थ्यम् । तृणमुलपादि । ओषधिः—फलपाकान्ता कदल्यादिः । गुल्माः—प्रसिद्धाः । लता—माधव्यादिकाः । अवता-नाः—केतक्यादयः । वनस्पतयः-पुष्पं विना फलिनो वटाश्वत्थाद्याः ॥

(से०) क्षितावेवेति । एवम् गन्धो गधवत्त्वेनैव पृथिव्या अ-साधारण इत्यर्थः । रूपं तु रूपत्वेन नासाधारणं जलादौ सत्त्वात्, किन्तु अनेकविधरूपत्वेनेत्याह रूपमिति । अनेकविधरूपसमाना-धिकरणद्रव्यत्वन्यूनवृत्तिजातिमत्त्वं पृथिव्यामेवेत्यर्थः । ननु नित्या-नित्यभेदेनानेकप्रकाररूपवत्त्वं जलादावपीत्यत आह शुक्लादीति । अयं प्रकारो विवक्षित इत्यर्थः । यद्यपि नानेकविधं रूपमवयविनि युगपत्प्रागुक्ताऽव्याप्यवृत्तितानिषेधात्, नापि क्रमशः पीलुपाकमते द्व्यणुकपर्यन्तं नाशानन्तरं परमाणावेव पाकेन रूपान्तरोत्पत्तेः पूर्वद्व्य-णुकादेर्नष्टत्वात् तत्र रूपान्तरानुत्पत्तेः, तथापि परमाणूनेवादायानेक-विधरूपवत्त्वं पृथिव्याः । यत्तु विजातीयरूपवद्घटपटादिव्यक्तीरादाय अवयविन्यप्यनेकविधरूपवत्त्वमिति । तन्न । प्रत्येकावयविनि तदभावेन

तत्समुदायेऽपि तदभावात् 'प्रत्येकावृत्तिश्च धर्मो न समुदायवृत्ति'-रिति न्यायात् । अत एवावयविन्यनेकविधरूपसामानाधिकरण्यमपि न पृथिवीत्वे अनेकविधरूपाधिकरणस्यावयविनोऽप्रसिद्धेः तदधि-करणानधिकरणत्वस्य सामानाधिकरण्यस्य च दुर्लभत्वात् । एकरूप-समानाधिकरणत्वे सत्यपररूपसमानाधिकरणत्वं त्ववयविभे-दमादायावयविनमादाय पृथिवीत्वे संभवतीति भावः । यथा शुक्लादिरनेकप्रकारस्तथा शुक्लतरादिरपि पृथिव्यामेवेत्यप्यवधेयम् । जलादौ जलादिरूपापेक्षयोत्कर्षापकर्षयोरभावात् । प्रतीतिस्तु क्व-चिज्जायमाना औपाधिकत्वाद्यनुविधानात् । ननु न शुक्लादीनि रूपाणि गुणाः किन्तु जातय एव । एवं च यथा व्यक्त्युपपत्तौ घट-त्वादीनि व्यज्यन्ते तथा शुक्लादयोऽपि । न च तरतमादिभावस्त-थासति न स्यादिति वाच्यम् । आश्रयान्तरमिश्रणामिश्रणाभ्यां तदु-पपत्तेः । भवन्तु वा गुणा एव शुक्लादयः परन्तु जगतीगता एकैका एव नित्याश्च । न च पाकाच्छुक्लं नष्टं रक्तमुत्पन्नमित्यादिप्रतीत्यनुपप-त्तिस्समवायस्योपाधेस्सम्भवात् इति चेन्न । जातित्वे गोत्वादिना जा-तिसङ्करप्रसङ्गात् आश्रयमिश्रणामिश्रणाभ्यां घटत्वादावुत्कर्षापकर्ष-योरप्रतीतेश्च । यदपि भवन्तु वेत्यादिना निरुक्तं तदप्ययुक्तम्-बाधकं विना प्रत्ययस्यान्यथात्वकल्पने मानाभावात् । न च नीलं नष्टमि-त्यादेर्नीलसमवायो नष्टः इत्यादिरर्थः । ज्ञानविषयताया अनुव्यवसा-यसाक्षिकत्वेन तथानुव्यवसायाभावात्, नित्यस्यानेकसमवेतस्य जाति-त्वापत्तेश्च । न च शुक्लादिभिन्नत्वे सति नित्यत्वे सति अनेकसमवेतत्वं जातिलक्षणम्, गौरवात् शुक्लादीनां नित्यत्वसिद्धौ जातित्वासिद्धिस्तत्सि-द्धौ नित्यत्वसिद्धिरित्यन्योन्याश्रयाच्च । किञ्च महत्त्वस्य समानाधिकर-णमुद्भूतरूपवत्त्वं तावद्बहिर्द्रव्यप्रत्यक्षताप्रयोजकम् । तत्रोद्भूतत्वम-नुद्भूतत्वं द्वयमपि जातिरित्येके । उद्भूतत्वं जातिरनुद्भूतत्वं न जातिः, किन्तु तदभाव इत्यपरे । शुक्लत्वादिना परापरभावानुपपत्त्या तत्तद्व्याप्य-नानोद्भूतत्वस्वीकारात्तेषां प्रत्यक्षत्वप्रयोजकत्वस्वीकारेऽननुगमापत्त्या कारणरूपपाकप्रयोज्यजातिभ्यां संकरापत्त्या तत्तद्व्याप्यनानाजात्यभ्य-ननुगमापत्त्या चानुद्भूतत्वमेव जातिस्तदभाव उद्भूतत्वं प्रतिबन्ध-काभावतया प्रत्यक्षत्वप्रयोजकमिति चिन्तामणिकृतः । तत्र रूपस्य शु-क्लादेरेकैकत्वे कथं स्वरूपमनुद्भूतमुद्भूतं च भास्करकरनिकरस्य तयो-

रेकतया जातेर्व्याप्यवृत्तितया तत्राव्याप्यवृत्तितापत्तेः। अपि च शुक्लादेर्जातित्वे नित्यगुणत्वे वा कारणरूपे कार्यरूपसादृश्यापेक्षा न स्यात्। न हि सदृशं कारणरूपं कार्यरूपकारणत्वेनोपयुज्यते तस्योभयथा नित्यत्वात्। नापि कारणगतैव जातिः कार्ये तिष्ठति घटत्वस्य कपालेऽभावात्। नापि कारणगत एव गुणः कार्ये तिष्ठति विजातीयरूपवत्सु तन्तुषु पटगतचित्ररूपभावप्रसङ्गात्। तस्मात् कारणगतसदृशरूपसव्यपेक्षतया कार्यगताः शुक्लादयो जन्या एवेति जानीमः। न च जातिपक्षे पृथिव्या एव पृथिवीतिवत् शुक्लादेव शुक्लमिति वाच्यम्। शुक्लादेश्चित्रदर्शनादिति सङ्क्षेपः।

रसोऽपि रसत्वेन नासाधारणः किन्तु अनेकविधत्वेनेत्याह रस इति। ननु कैश्चिदालङ्कारिकैरष्टविधः कैश्चिच्च नवविधो गणित इति कथं षड्विध इत्यत आह मधुरेति। असौ नालङ्कारिकाणां रस इत्यर्थः। मधुरमधुरतरत्वादिरपि प्रकारभेदो द्रष्टव्यः।

ननु भवतु गन्धो गन्धत्वेनैवासाधारणः स प्रकारभेदवान्न वा इत्यत आह गन्ध इति। सुरभितरत्वादिरपि प्रकारभेदो द्रष्टव्यः।

ननु स्पर्शो न स्पर्शत्वेनासाधारणो जलत्वादिसाधारण्यात्, नाप्यनुष्णाशीतत्वेन वायुसाधारण्यात्, नापि स्पर्शत्वसाक्षाद्व्याप्यजात्याऽनेकविधस्पर्शत्वेन, सा हि शीतत्वादिर्न च शीतादयः पृथिव्यां सम्भाव्यन्त इत्यत आह स्पर्श इति। अत्र पाकजस्पर्शत्वेनैवासाधारणता अनुष्णाशीतपदं च स्वरूपपरम्। पाकजवत्त्वं तेजस्यपि सुवर्णद्रवस्य नैमित्तिकत्वात्, आकाशेऽपि च दवदहनदह्यमानवेणुनिनादस्य दहनाकाशसंयोगासमवायिकारणत्वात्, तथा च स्पर्शो विशेषणम्। यद्यपि द्व्यणुकादौ कारणगुणक्रमेणैव गुणोत्पादस्वीकारः,तथापि पाकप्रयोज्यस्पर्शवत्त्वं लक्षणम्, परमाणुस्पर्शः पाकजन्यत्वादेव पाकप्रयोज्यः द्व्यणुकादिस्पर्शस्तु पाकजन्यपरमाणुस्पर्शजत्वादिभिः। पाकजत्वं चात्र पाकानन्तरं मृदुकठिनभावानुभवात्, यत्र नानुभूयते तत्र पृथिवीस्पर्शत्वेनानुमानात्।

यत्तु वदन्ति–पृथिव्यां स्पर्शो नास्त्येव किन्त्वौष्ण्यशैत्याभाव एवेति। तेषां तथासति तस्यास्त्वाचत्वाभावे तद्गतसंख्यादयो नोपलभ्येरन्नित्यत्र किमुत्तरम्? औष्ण्यशैत्य एव परस्पराभिभूततयाऽनुष्णाशीतत्वेनोपलभ्येत इत्येके। तदनन्तःकरणभावित-

मिव । एकस्य बलवत्त्वं विनाऽभिभवाभावेन तस्यैवोपलब्ध्यापत्तेर्द्वयोश्च परस्परापेक्षबलवत्त्वदुर्बलत्वयोर्विरोधेनासम्भवात् उष्णशीतयोश्च परस्परविरोधेनैकत्र पृथिव्यामसम्भवात् । सन्निकृष्टजलतेजसोरिव तयोः परस्पराभिभवेन तथा प्रतिभानमिति चेत्, एकस्य बलवत्तां विनाऽभिभवाभावात्, पृथिव्याः स्पर्शरहितत्वेऽत्वाचत्वापत्तेरुक्तत्वाच्च । पृथिवीगतत्वेन प्रतीतेर्बाधकं विना भ्रान्तत्वानुपपत्तेश्च । भावत्वेऽपि चनजोश्लेषो सुराविद्यादाविव न विरुद्धः । न च तत्र सुराविद्याविरोधित्वेन(?) तथा प्रकृतेऽपि शीतोष्णविरोधित्वस्यानुभवसाक्षिकत्वात् ।

वस्तुतस्तु अनुष्णाशीतत्वं जातिरेवास्य शब्दस्य रूढत्वेन तन्त्राघटितत्वात् । अन्यथा तत्तत्प्रतीतिदशायां शैत्योष्णविरोधिप्रतीत्यापत्त्या शैत्यौष्ण्यप्रतीत्यापेक्षापत्तेरिति संक्षेपः ।

इदन्तु विचार्यते । प्रस्तरादौ कथं न गन्धोपलम्भः ? न तावत् सुरभ्यसुरभ्यवयवारब्धत्वेन. तदभावात् अवयवगन्धस्यैवोपलम्भापत्तेः, विजातीयरसवदारब्धाया हरीतक्याः नीरसत्वेऽपि तदवयवे रसोपलम्भात् । न च प्रस्तरत्रसरेणोरिव विजातीयगन्धवदारभ्यतया निर्गन्धतयाऽन्त्यावयविपर्यन्तं गन्धाभावाद् द्व्यणुकादिगन्धवस्तुनोपलभ्यत्वेऽतीन्द्रियत्वादिति वाच्यम् । प्रमाणरहिताया एतावत्याः कुसृष्टेः कल्पनाया अयुक्तत्वात् ।

यत्तु प्रस्तरभस्मनो गन्धवत्त्वेन तत्परमाणोर्गन्धवत्तया तदारभ्यस्य प्रस्तरस्यापि गन्धवत्त्वम् । न च प्रस्तरभस्मनोरारम्भकपरमाणुभेदो यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदुपादानोपादेयमिति व्याप्तेः । अग्रिमद्रव्यपदानुपादाने कपालध्वंसजन्य घटध्वंसे व्यभिचारः । प्रथमद्रव्यपदानुपादाने मिथ्याज्ञानध्वंसजन्ये कायव्यूहे व्यभिचारः—तत्रान्वयव्यतिरेकाभ्यां तस्यापि कारणत्वादित्येके । कपालप्रागभावध्वंसजन्ये घटे व्यभिचार इत्यपरे । इदानीं शालग्रामशिलाध्वंसजन्ये ध्वंसकर्तृनारकिशरीरे व्यभिचारस्तद्वारणायादृष्टाद्वारकयद्द्रव्यध्वंसजन्यमित्यादि । इदानीं पार्श्वस्थवह्निपदान्तरालिकाभित्तिनाशजन्ये वह्निपदजन्ये महावह्नौ व्यभिचारस्तद्वारणाय ध्वंसत्वेन जनकता विवक्षिता । तत्र त्वि संसर्गाभावत्वेन जनकता । एवं चादृष्टाद्वारकध्वंसत्वावच्छिन्नजनकतावद्द्रव्यध्वंसजन्यं यद्द्रव्यध्वंसजन्यं यद्द्रव्यं तत्तदु-

पादानोपादेयमिति व्याप्तेरिति।

तन्न। परंपरया गन्धवत्परमाण्वारब्ध आहत्य विजातीयगन्धवदारब्धे व्यभिचारात्। नाप्यभिभवात् प्रस्तरे गन्धानुपलम्भः, अभिभावकगन्धोपलम्भापत्तेरिति।

अत्राहुः—अनुद्भवादेव तत्र गन्धानुपलम्भः। स चादृष्टविशेषात् पाकजरूपवत्त्वानुमानेन प्रत्यक्षताप्रयोजकस्यान्यस्याभावात्। ननु विजातीयगन्धवदारभ्ये पाकजरूपवति व्यभिचारः। न च विजातीयगन्धवदनारभ्यत्वे सति पाकजरूपवत्त्वादिति हेतुः, सत्यन्तस्य सन्दिग्धत्वात्। न च विजातीयावयवगन्धानुपलब्ध्या तत्सिद्धिः द्व्यणुकस्यैव विजातीयगन्धवत्त्वे तदनुपलब्ध्युपपत्तेः। साक्षादवयवस्यानुद्भूतविजातीयगन्धवत्त्वेन वाऽनुपलब्धेरिति चेत्। अत्र ब्रूमः—एवं हि सजातीयगन्धवत्प्रस्तरपरमाणुसंयोगेऽपि द्व्यणुकसंयोगेऽपि न त्रसरेणुरिति नियमे किंचित्प्रयोजकं वक्तव्यम्। तत्र च अदृष्टविशेषस्य प्रतिबन्धकत्वं वाच्यम्। विजातीयगन्धवत्प्रस्तरपरमाणुत्वादिना कारणता प्रस्तरद्व्यणुकत्वादिना कार्यता वा वाच्या। उभयथापि गौरवमन्यथाऽनुपपत्तौ पृथिव्यां गन्धप्रागभावाभावस्तु कल्पनीयः। तस्मात् यत्र प्रस्तरपरमाणुद्व्यणुकानि वा विजातीयगन्धवति परे वा साक्षादवयवाः परंपरावयवा तथा तत्प्रस्तरोऽन्त्यावयवी निर्गन्धः परत्र तु अनुद्भूतगन्धो गन्धानुद्भवप्रयोजकस्यादृष्टस्य घ्राणानुरोधेन कल्पनात् अन्यथा तस्यापि निर्गन्धत्वापत्त्या सगुणेन्द्रियत्वव्याघातः। यच्चोक्तं—'साक्षादवयवस्यानुद्भूतविजातीयगन्धवत्त्वमिति, तदपि नऽ्यणुकपर्यन्तं क्वापि उद्भूतगन्धवत्त्वे गन्धोपलम्भापत्तेः।

इदं चावधेयम्। यथा विजातीयगन्धवदारब्धो निर्गन्धः तथा विजातीयगन्धवदारभ्येन निर्गन्धेन गन्धवतारब्धो निर्गन्धावयवावच्छेदेन गन्धारम्भकाभावेन विजातीयगन्धारब्ध इव गन्धस्याव्याप्यवृत्तित्वापत्तेः। एवं च यत्रैकः सूक्ष्मोऽप्यवयवो विजातीयगन्धो वा तत्रान्येषामवयवानां बहूनां महतां च सजातीयगन्धवत्त्वेऽपि नावयविनि गन्धस्तत्र सर्वावच्छेदेन गन्धोपलम्भस्तु भूयोभिर्गन्धवद्भिरवयवैर्निर्गन्धभावातिरस्कारात्। एवं चैकः सूक्ष्मो अवयवो यत्र विजातीयरूपवान् अन्ये स्थूला बहवश्च सजातीयरूपवन्तस्तत्रापि

अवयविनि चित्रमेव रूपमुत्पद्यते नोपलभ्यते तु तद्भागस्याभावात्। अत एव करादिनाधावृतेऽपि चित्रत्वेन चित्ररूपोपलम्भोऽवयवगत-विजातीयरूपग्रहस्याभावात्। तस्य चान्वयव्यतिरेकाभ्यां तद्व्य-ञ्जकत्वात्। न चैवं त्रसरेणौ तद्ग्रहो न स्यात् अतिसूक्ष्मे तत्र तद्-ग्रहे प्रमाणाभावात्। ननु पाकजत्वेन पार्थिवरूपस्पर्शयोस्तुल्ययोग-क्षेमत्वेनैकस्योद्भवेऽपरस्याप्युद्भव उच्यते, पाकजत्वं तु गन्धेऽपि समानं, तथा च कथं रूपोद्भवे गन्धानुद्भव इति चेत्। योद्भूतस्पर्शा पृथिवी सोद्भूतरूपवती यदुद्भूतनीलरूपवत् तदुद्भूतस्पर्शमित्येव नियमस्वीकारात्। योद्भूतरूपवती पृथिवी सोद्भूतगन्धवती योद्-भूतगन्धवती सोद्भूतरूपवतीति वा नियमस्यानङ्गीकारात्। प्रथम-नियमे पृथिवीपदानुपादाने जलादौ व्यभिचारः। योद्भूतरूपवती पृथिवी सोद्भूतस्पर्शेत्येव द्वितीयनियमोऽस्तु इति चेत्। न। नयनगत-पित्ते व्यभिचारात्। तत्रापि मणिप्रभासहचरितनीलभागे व्यभिचार इति चेत्। न। तदनभ्युपगमात्। नयनगतपित्तद्रव्यादौ व्यभिचारादेव न तृतीयनियमः। वायूपनीतचम्पकभागे व्यभिचाराच्च चतुर्थोऽपि, रसेऽपि न तुल्ययोगक्षेमत्वाङ्गीकारः रसनगतपित्तद्रव्यस्योद्भूतर-सस्योद्भूतरूपत्वाभावात् प्रस्तरादेरुद्भूतरूपस्योद्भूतरसत्वाभावा-च्चेति संक्षेपः।

ननु पृथिवी यद्यनित्यैव तदाऽवयवानवस्था स्यादथ नि-त्यैव तर्हि निष्प्रमाणा स्यात् प्रत्यक्षस्य त्रसरेण्वादेरनित्यतया पृ-थिवीत्वानङ्गीकारात्। एतत्कारणतया नित्यनुमानमिति चेन्न। वि-जातीयेन कार्येण विजातीयकारणाननुमानात् गन्धवत्त्वस्य पृथिवी-लक्षणस्यातिव्याप्तिश्चेत्यत आह सा चेति। का नित्या का चानि-त्येत्यत आह परमाण्विति। लक्षणा—स्वरूपा।

ननु परमाणौ प्रमाणाभावो वैशेषिकाणां प्रत्यक्षानुमानयोरे-व प्रमाणत्वात् प्रत्यक्षस्य तत्राभावाच्च लिङ्गाभावेनानुमानस्या-प्यभावात्। न च त्रसरेणोः कार्यद्रव्यतया सावयवत्वेन त-त्सिद्धिस्त्रसरेणोः कार्यत्वे प्रमाणाभावात्। तदवयवस्य पर-माणुत्वेन भवतानङ्गीकाराच्च। एवं च त्रसरेण्वादेरेव सर्गः। न च स एव परमाणुश्चाक्षुषद्रव्यतया महत्त्वादिति चेन्न। त्रस-रेणुः सावयवावयवश्चाक्षुषमहत्वात् घटवत् इति परमाणुद्व्यणु-

कयोः सिद्धेः। न च परमाणावपि मूर्तत्वेन सावयत्वसिद्धिः, अनुकूलतर्काभावात् अनवस्थालक्षणस्य प्रतिकूलतर्कस्य च सद्भावात्। मूर्तत्वस्य सावयवत्वव्याप्यत्वेऽनवस्थायाः सहस्रकरेणाप्यपहस्तयितुमशक्यत्वात्। भवदनुमाने कोऽनुकूलस्तर्क इति चेत्। घटादौ चाक्षुषमहत्त्वे सावयवावयवत्वेन निरुपाधिनियतसहचारोपलंभात्। ननु तर्हि सावयवावयवावयवत्वमस्तु घटादौ चाक्षुषमहत्त्वस्य तेन तथाविधसहचारोपलम्भात्। न चानवस्था तत्रैव विश्रामादेवञ्च द्व्यणुकात् परमाणवः सन्तः। किञ्च यथा महति महत्तरस्तत्तमश्च तथा त्रसरेणुतरोऽणुतमश्चेत्यपेक्षितम्। ननु सावयवावयवत्वेनैव चाक्षुषमहत्वं लाघवात् न तु सावयवावयवत्वेन गौरवात् इति चेत्। ततोऽपि सावयवत्वस्य लघुत्वात्। अपि च कारणगतानि महत्परिमाणप्रशिथिलसंयोगबहुत्वानि कार्यमहत्त्वप्रयोजकानि न तु कारणस्य सावयवत्वमपि कार्यस्यैव समवायिकारणत्वात् कारणगतानां महत्त्वादीनामेवासमवायिकारणत्वात् अदृष्टादेरेव निमित्तकारणत्वात् अवयवगतस्य सावयवत्वस्य हि कोपयोगः? न च चाक्षुषमहत्वम् प्रति अवयवगतं सावयवत्वं प्रयोजकत्वे प्रति(?)एषामेवोपयोगात् चाक्षुषत्वं प्रति तु उद्भूतरूपसामानाधिकरण्यस्यैव प्रयोजकत्वात्, अन्यथा वायुमहत्त्वस्य चाक्षुषत्वापत्तेः। तस्मात्सन्तु त्रसरेणोरवयवा न तु तदवयवा इति। किञ्चास्तु त्रसरेणुमहत्त्वं नित्यमेव तथाच त्रसरेण्वादिरेवायमारम्भः। न च त्रसरेणुमहत्त्वमनित्यं महत्त्वत्वे सति चाक्षुषत्वात् घटमहत्त्ववदिति वाच्यम्। अप्रयोजकत्वाच्चाक्षुषमहत्त्वे वा तदनित्यतया अनुपयोगादन्यस्याऽप्यनुकूलतर्कस्याभावात्, अन्यथाऽऽत्ममहत्त्वप्रत्यक्षत्वपक्षे प्रत्यक्षमहत्वेन सावयवत्वं साध्येत। तस्मान्न परमाणुद्व्यणुकयोः सिद्धिरिति।

ननु परिमाणत्वं स्वन्यूनवृत्तिजातिव्यापकं स्वभिन्नजातिव्यापकमिति वा जात्यधिकदेशवृत्तीति वा गुणत्वसाक्षाद्व्याप्यजातित्वात् रूपत्ववत्। प्रथमसाध्यद्वयेऽभेदव्याप्त्या सिद्धसाधनवारणाय विशेषणम्। गुणत्वसाक्षाद्व्याप्यत्वं तु गुणत्वन्यूनवृत्तिजात्यन्यूनवृत्तित्वे सति गुणत्वन्यूनवृत्तित्वम्। अत्र जातीत्यनुपादानेऽसिद्धिः गुणत्वन्यूनवृत्तिसकलगुणत्वन्यूनवृत्तित्वात्। हेतौ विशेषजातिपदानुपादान एतद्रसान्यतरत्वे व्यभिचारस्तस्य जातिपदशून्यहेतुमत्त्वेऽपि सा-

ध्यरहितत्वात् । परिमाणत्वस्य जात्यधिकदेशवृत्तित्वे च म-हत्त्वातिरिक्तं परिमाणमायाति तच्चाणुत्वमेव भविष्यतीति त-दाश्रयसिद्धिरिति चेन्न । शुक्लत्वादिव्यापकतया रूपत्वे मधुरत्वा-दिव्यापकतया रसत्वे एकत्वादिव्यापकतया संख्यात्वे एकपृ-थक्त्वादिव्यापकतया पृथक्त्वे संयोगविभागकर्मजन्यतावच्छेदकजा-तिव्यापकतया संयोगत्वविभागत्वयोर्दिगादिजन्यतावच्छेदकजाति-व्यापकतया प्रयत्नपरत्वापरत्वयोः प्रत्यक्षत्वादिव्यापकतया बुद्धित्वे जीवनयोनियत्नादिगतजातिव्यापकतया प्रयत्नत्वत्वे जलद्रवत्वादि-गतजातिव्यापकतया द्रवत्वत्वे वेगत्वादिव्यापकतया संस्कारत्वे क-त्वादिव्यापकतया शब्दत्वे साध्यसत्त्वेऽपि सुखदुःखेच्छाद्वेषगुरुत्वस्ने-हधर्माधर्मत्वेषु तदभावात् एवमपि उत्कर्षापकर्षरूपा जातिस्तिष्ठतीति चेन्न । ताभ्यामत्रापि सिद्धसाधनात् । परिमाणत्वमुत्कर्षादिभिन्नजात्य-धिकदेशवृत्त्याऽऽकाशगुणत्वसाक्षाद्व्याप्यजातित्वात् संख्यात्ववत् इति चेन्न । अप्रयोजकत्वात् ।

ननु उपाधित्वस्याऽऽपातत उपाध्यदर्शनेन सर्वत्रसम्भवान्न तु अवयवपरंपरोत्कर्षेण परिमाणोत्कर्षदर्शनेनावयवपरंपरापरिमाणका-रणम् कारणोत्कर्षेणैव कार्योत्कर्षात्तथा च त्रसरेणोरवयवपरंपरा-सिद्धिरिति चेन्न । त्रसरेणुपरिमाणस्यानित्यत्वात्, तस्मात् त्रसरेण्वा-दिरेवायमारम्भ इति सिद्धमणुपरिमाणतारतम्यमित्यादि तु प्राची-नैरेव पराभूतमिति चेत् ।

अत्रोच्यते-अस्ति तावत् महत्त्वस्य महाश्रयजन्यत्वम् । तत्र मह-त्त्वस्य जन्यतावच्छेदकं न तन्महत्त्वमनन्तजन्यताजनकतावच्छेदक-कल्पनायां मानाभावेन गौरवात् । नापि महत्त्वत्वमाकाशादिपरिमा-णेऽतिप्रसक्तेः । नापि उत्कृष्टमहत्त्वं तत्त्वादेव, नापि जन्यमहत्त्वम्, जन्यमेव किं महत्त्वमित्यस्य विचार्यत्वात् । अत एव न कार्यगतमह-त्त्वं कार्यगतमित्यस्यानिर्धारणात्तत्रावच्छेदकस्य सम्भवे त्यागा-योगाच्च । एवं चापकृष्टमहत्त्वेन लघुनाऽनुगतेनापराभूतसम्भवेन अत एव त्यागायोग्येन महत्त्वस्य कार्यता इति नाधिकपरंपरापर्यवसा-नम् । तत्त्वे परंपरोत्कर्षेण त्रसरेणुपरिमाणोत्कर्षापत्तेश्च । न च त्रस-रेणौ महत्त्वमेव नास्ति महत्त्वोत्कर्षेण चाक्षुषत्वोत्कर्षेण तस्य तत्र कारणत्वादिति कणादमुनिनिगर्वसर्वस्वसंक्षेपः ।

कार्यलक्षणायां किं प्रमाणमत आह सा चेति । ईदृशं स्वरूपं प्रत्यक्षसिद्धमेव तदेव च कार्यपृथिवीति नात्र मानापेक्षेत्यर्थः। स्थैर्य-भूयःसमयसत्ता । ननु सा निरत्ययस्थानावस्थापितपानीयप्रभृतावप्यस्ति तृतीयादिक्षणनष्टघटादौ च नास्ति तैजसे सुवर्णे वाऽस्तीति कथमसाधारण्येनोपदेश इति चेत् । यथोपायापायेऽपि भूयस्याः पृथिव्या बहुतरसमयपरीरम्भः तथा नाम्भःप्रभृतेः इत्यभिप्रायात्। स्थैर्यादीत्यादिपदेन विष्टम्भकत्वजलादिव्यूहविरोधित्वयोर्ग्रहणम्।विष्टम्भकत्वं द्रव्यान्तरगतिप्रतिबन्धकत्वं तथाहि-भित्त्यादिरूपया पृथिव्या द्रव्यान्तरगतिः प्रतिरुद्ध्यते यथा वाऽन्यरूपया तिरंचं (?)प्रति तस्याधोगतिस्तथा न जलतेजोवायुभिः यथा प्रस्तरादिपाते सति जलादेः पूर्वाकारोऽपगच्छति न तथा जलादिपाते सतीति । अवयवसन्निवेशाः कम्बुग्रीवादयः, न चैतज्जलादौ तिष्ठति, अत एव पृथिव्यां व्यञ्जकसत्त्वेन भूयस्यो घटत्वादिजातय इति भावः । शयनेति । अत्राभिघातादिरूपोऽपकारो द्रष्टव्यः ।

कार्यरूपायाः पृथिव्या विभागमाह त्रिविधमिति । अत्र शरीरमिन्द्रियं विषय इति परित्यज्य शरीरेन्द्रियविषयसंज्ञकामिति प्रयुञ्जानस्य 'शब्दाधिक्यादर्थाधिक्य'मिति न्यायेन शरीरत्वादिकं न जातिरित्यभिप्रायः । तत्र शरीरेन्द्रियत्वे न जाती पृथिवीत्वादिना सङ्करप्रसङ्गात्-पृथिवीत्वस्य घटे सत्त्वेन शरीरत्वस्याभावाच्छरीरत्वस्य जलीयशरीरे सत्त्वेन पृथिवीत्वस्याभावात् अस्मदादिशरीरे च द्वितयसत्त्वात् । एवं घटचक्षुषोः परस्परव्यभिचारवतोः पृथिवीत्वेन्द्रियत्वयोर्घ्राणे समावेशः। विषयत्वं च निस्सामान्ये सामान्यादौ सत्त्वान्न जाती। रूपादिसाक्षात्कारानन्तरमिव स्वहितादौ ब्रह्मण्यादिसाक्षात्कारानन्तरमपि सुखाद्युत्पत्तेः शत्रुप्रभृतेरभावादिसाक्षात्कारानन्तरञ्च तदुत्पत्तेः, तत्रासति भोगावच्छेदकत्वमिति न शरीरत्वं-शरीरावयवेऽतिव्याप्तेः। नाप्यन्त्यावयवित्वे सति (तत्त्वं) द्रव्यानारम्भकत्वे सति कार्यद्रव्यत्वम्। तत्र द्रव्यानारम्भकत्वे सत्यात्मनि भोगावच्छेदकत्वमिति अस्यैव व्यवच्छेदकत्वे शेषवैयर्थ्यात्, आत्मनीति च निरर्थकं-परत्र भोगाभावेनान्येनानवच्छेद्यभावात् । न च व्यर्थविशेषणवर्जितमेव लक्षणम् ,मरणोत्तरं परिमाणभेदेनोत्पन्ने शरीरान्तरेऽव्याप्तेस्तदवच्छेदेनात्मनि भोगानुत्पत्तेः । नापि आत्मविशेषगुणमनःसंयो-

वैयर्थ्येन प्रमात्वादित्येव क्रियेत घटादिरूपहेत्वधिकरणाप्राप्तिर्हि तद्वैयर्थ्यमूलम्। एवं च शब्देतरपदानुपादे श्रोत्रसाधारणहेतोरभावात् विकाशकतया तद्विशेषणमुपादेयम्। एवमुद्भूतविशेषगुणानाश्रयत्वं सतीत्यादिर्हि हेतुः श्रोत्रे नास्ति शब्देतरेत्यादिस्त्वस्ति। तथा च विकाशतया सार्थकतैवेत्याहुः।

लक्षणेन द्विधा भेदसाधनम्। लक्ष्यं पक्षीकृत्य लक्षणे यथा पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ। इतरत्पक्षीकृत्य लक्षणव्यतिरेकेण यथा इतरे पृथिवीनिष्ठभेदप्रतियोगिनः पृथिवीत्वाभावादित्यादौ। एवञ्च प्रकृतेऽपीतरे इन्द्रियनिष्ठभेदप्रतियोगिन उद्भूतविशेषगुणानाश्रयत्वसमानाधिकरणज्ञानकारणमनःसंयोगाश्रयत्वाभावादिति हेतौ श्रोत्रे व्यभिचारस्तत्र हेतुभावेपीन्द्रियनिष्ठभेदप्रतियोगित्वाभावात्तथा चानेन न्यायेन व्यभिचारवारकतयैव शब्देतरपदस्य सार्थकत्वं तद्गर्भहेतुभावस्य श्रोत्रेऽभावादिति तत्त्वचिन्तामणौ पक्षधरमिश्राः। तदतत्त्वम्। एवं हीन्द्रियमितरेभ्यो भिद्यते इत्यनेन प्रकारेण भेदसाधने वैयर्थ्यानपायात्। आत्मत्वमितरभिन्नवृत्तीत्यादिज्ञानस्य मोक्षाद्युपयोगित्वेन बहुषु स्थलेषु प्राप्ततया लक्ष्यविशेष्यकज्ञानस्यैव मोक्षकांक्षिभिरपेक्षितत्वेन तत्रैव वैयर्थ्यसमाधानस्योचितत्वाच्च। अन्यथा गन्धसहचरितरूपवत्त्वमपि पृथिव्या लक्षणं स्यात्। इतरे पृथिवीनिष्ठभेदप्रतियोगिनो गन्धसहचरितरूपाभावादित्यत्राखण्डाभावे वैयर्थ्याभावात्। विशेषणत्याग इव विशेष्यत्यागेऽपि प्रतियोगिभेदनाभावभेदात्। पृथिवीपक्षकानुमाने वैयर्थ्यमेवेति न तथा लक्षणमिति यदि, तदा प्रकृतेऽपि तुल्यम्—इन्द्रियपक्षकानुमाने वैयर्थ्यानुद्धारात्। यदपि प्रमाविषयत्वादित्यत्रैव विकाशकतया न वैयर्थ्यम्, तदपि न विचार्यमाणं चतुरचेतसां चमत्कारमाचरति, तथासति भागासिद्धिवारकं विशेषणं व्यर्थमिति शास्त्रसिद्धान्ताय जलाञ्जलिर्वितीर्येत भागासिद्धिवारकस्य विकाशकत्वादेव, प्रमाविषयत्वादित्यत्र तु प्रमात्वादिति न हेतुः यथोक्तविशेषणविशेष्यभावे वैयर्थ्याभावात्।

ननु विकाशकत्वादवैयर्थ्यात(?) यन्निष्ठा व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तत्सार्थकं, यथा व्यभिचारवारकं यथा वाऽप्रसिद्धिवारकम्, न चैतत्सार्थकताप्रयोजकं प्रकृते सम्भवति तेन विनापि व्याप्तिग्रहसम्भवात्। न च यदधिकरणान्तर्भावेन

व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तद्धेत्वाधिकरणमादाय व्याप्तिग्रहार्थे तद्विशेषणसार्थक्यामित्यादि सार्थकताप्रयोजकं कल्प्यमिति वाच्यम्। हेतुव्याप्तिग्राहकस्यैव सार्थकत्वेऽस्य सार्थकत्वे मानाभावात्। हेतोर्व्याप्त्यग्रहेऽनुमानाप्रवृत्तेरिवाधिकरणविशेषान्तर्भावेन व्याप्तिग्रहेऽनुमानाप्रवृत्तेरभावेन तद्ग्राहकविशेषणस्यैव वैयर्थ्यात्, तस्मादखण्डाभावे न वैयर्थ्यमित्येव समाधानं पितृचरणानुमतमस्मदनुमतम्। लक्षणेन स्वप्रवृत्तिनिमित्तको व्यवहारः साध्यते, न चोद्भूतविशेषगुणानाश्रयत्वे सतीत्यादिप्रवृत्तिनिमित्तक इन्द्रियव्यवहारः प्रसिद्धो येन तथानुमानं स्यात् इति व्यवहारसाध्यकानुमानसिद्धये तथा लक्षणमिति कश्चित्। तदपि विपश्चिद्विवक्षितमिव व्यतिरेकसाधने तथापि वैयर्थ्यात् गन्धवत्त्वे स्वाप्रवृत्तिनिमित्तकपृथिवव्यवहारस्यैव साधनेन लक्षणेन स्वप्रवृत्तिनिमित्तको व्यवहारःसाध्यते इति नियमाभावाच्च, तस्मादभावप्रतियोगिविशेषणे न वैयर्थ्यमित्येव शब्देतरपदार्थसार्थकताबीजमिति संक्षेपः।

आश्रयत्वं घटादावपि घटत्वादिसत्त्वात् संयोगाश्रयत्वमपि आकाशादिसंयोगाश्रयत्वात् कारणसंयोगाश्रयत्वमपि कर्मकारणनोदनाभिघाताश्रयत्वात् ज्ञानकारणसंयोगाश्रयत्वमपि चक्षुःसंयोगाश्रयत्वात् मनःसंयोगाश्रयत्वमपि पण्डमनःसंयोगकारणकपालमनःसंयोगाश्रये कपालेऽतिव्याप्तिश्च तदर्थं ज्ञानकारणमनसंयोगाश्रयत्वम्। इदानीमात्मादौ गतं तदर्थं शब्देतरोद्भूतविशेषगुणत्वे सतीति। अत्रानाश्रयत्वे सतीत्याद्यप्रसिद्धं गुणानाश्रयत्वे सतीत्याद्यपि, विशेषगुणानाश्रयत्वे सतीत्यादि तु मनसि प्रसिद्धमेव चक्षुरादौ च न याति तदर्थमुद्भूतेत्यादि। इदानीं श्रोत्राव्यापकं तदर्थं शब्देतरेति। ननु विशेषेति व्यर्थं शब्देतरोद्भूतगुणानाश्रयत्वे सतीत्यनेन सर्वसामञ्जस्यात् संख्यादेरपि चक्षुरादावनुद्भूतत्वादिति चेन्न। अखण्डाभावे वैयर्थ्याभावादित्येके। द्रव्यादावाश्रयप्रत्यक्षाप्रत्यक्षत्वाभ्यामेव प्रत्यक्षाप्रत्यक्षत्वयोः सम्भवेनाप्रत्यक्षत्वप्रयोजकतयाऽनुद्भूतत्वमित्युद्भूतत्वमेव चक्षुरादिसंख्यायामिति विशेषपदमिति वस्तुगतिः।

प्रतीयमानतया भोगसाधनत्वं विषयत्वम्। अत्र यदि प्रतीतिपदेन साक्षात्कारो विवक्षितस्तदा वायोर्विषयत्वादौपचारिकं तत्स्पर्शस्य

विषयत्वम् नो चेत् सोपि विषय इति ।

तत्र शरीरमिति । तत्र—शरीरादिषु पृथिव्यामेवैतत् जलादिशरीरस्यायोनिजत्वात् । पृथिवीत्वं शरीरारम्भकवृत्ति द्रव्यारम्भकवृत्तिद्रव्यत्वन्यूनवृत्तिजात्यन्यूनवृत्तिजातित्वात् जलवत् । अत्रात्मत्वादौ व्यभिचारवारणाय द्रव्यारम्भकवृत्तीति । द्रव्यारम्भकवृत्तिजातित्वादित्युक्तौ तन्तुत्वादौ व्यभिचारस्तदर्थं द्रव्यत्वन्यूनवृत्तिजात्यन्यूनवृत्तीति । ननु द्रव्यत्वन्यूनवृत्तिजात्यन्यूनवृत्तीत्युक्तौ पृथिवीत्वेऽपि न याति मूर्तत्वादिन्यूनवृत्तित्वात् । आरम्भकपदस्य समवायिकारणपरतयाऽऽत्मत्वादौ व्यभिचारवारणाय द्रव्यपदम् तस्यापि सुखादिसमवायिकारणत्वात् । शरीरेतरमात्रारम्भकत्वे व्यभिचारवारणाय जातित्वादिति, तद्धि न शरीरारम्भकवृत्तीति । ननु द्रव्यत्वन्यूनवृत्तिजात्यन्यूनवृत्तित्वं द्रव्यत्वन्यूनवृत्तिजातिसमानाधिकरणात्यन्ताभावाप्रतियोगित्वम्, तच्च शरीरेतरमात्रारम्भकत्वेनाऽस्त्येव शरीरावयवेऽसत्त्वात्तथाच कथं तत्र व्यभिचार इति चेन्न । एवं हि पृथिवीत्वस्यापि द्रव्यत्वन्यूनवृत्तिजातिन्यूनवृत्तित्वं स्यात् जलत्वादिसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् । तथा च यद्यज्जातिप्रतियोगिकात्यन्ताभावसमानाधिकरणम् यद्यज्जातिसमानाधिकरणात्यन्ताभावप्रतियोगि तत्तज्जातिन्यूनवृत्ति,न च शरीरेतरमात्रारम्भकत्वं तथा पृथिवीत्वाद्यत्यन्ताभावसमानाधिकरणत्वात्,अन्यथा भूतत्वमूर्तत्वयोर्मिथो न्यूनवृत्तिता स्यात्, परस्परसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् । अत एव यद्यत्समानाधिकरणं यद्यत्समानाधिकरणात्यन्ताभावप्रतियोगि तत्तन्न्यूनवृत्तीत्यपि न,भूतत्वमूर्तत्वयोः परस्परन्यूनवृत्तितापत्तेः। न चेष्टापत्तिः, अव्यवहारात्, तस्माद्यद्यत्प्रतियोगिकात्यन्ताभावासमानाधिकरणम् यद्यत्समानाधिकरणात्यन्ताभावप्रतियोगि तत्तन्न्यूनवृत्ति, न चैवं शरीरेतरमात्रारम्भकत्वं पृथिवीत्वादिसमानाधिकरणात्यन्ताभावप्रतियोगित्वेऽपि पृथिवीत्वादिप्रतियोगिकात्यन्ताभावसमानाधिकरणत्वात्, एवं च द्रव्यारम्भकपालादिवृत्तौ द्रव्यत्वन्यूनवृत्तिजात्यन्यूनवृत्तौ शरीरेतरमात्रारम्भकत्वे व्यभिचारवारणाय जातित्वादिति । यदि च मानुषशरीरस्य गन्धवत्तया पृथिवीत्वे सिद्धे पृथिव्याः शरीरारम्भकत्वं सिद्धमेव, तदा पृथिवीत्वमयोनिजशरीरारम्भकवृत्तीत्याद्येवानु-

मानम् । न च दृष्टान्तासिद्धिः, पूर्वनयेनैव पृथिवीत्वदृष्टान्तेन जलस्य शरीरारम्भकत्वप्रसाधने तत्रैव पर्यासेर्जलादौ शुक्रशोणितयोः पार्थिवत्वानियमेन योन्यसम्भवात् । एवं च पार्थिवशरीरस्याध्यक्षसिद्धतया तद्दृष्टान्तेन जलीयशरीरं प्रसाध्य तस्य च योनिजत्वपर्यवसानेन तद्दृष्टान्तेन पार्थिवायोनिजशरीरसाधनम् ।

यत्तु स्वर्गस्य सुखविशेषतया शरीरसापेक्षतया तस्य शरीरस्य योनिजत्वे तदवच्छेदेन गर्भवासादिदुःखोत्पत्तौ स्वर्गित्वं व्याहत्याऽयोनिजपार्थिवशरीरसिद्धिः दुःखानवच्छेदकशरीरावच्छेद्यसुखस्यैव स्वर्गत्वादिति लीलावत्यां वल्लभाचार्याः।तन्न,स्वर्गिणां जलीयादिशरीरेणाऽप्यन्यथासिद्धिः सम्भवति, न हि तेषां पार्थिवत्वं कुतोऽपि सिध्यति येन स्वर्गानुरोधेनायोनिजत्वे पर्यवसानं स्यात्, न हि जलीयादिशरीरं वरुणादिलोक एवेत्यत्र मानमस्ति येन पुरंदरादिपुरे पार्थिवशरीरस्यैव सिद्धिः स्यात् । तस्मादुक्तनयेनैव पार्थिवायोनिजशरीरसिद्धिः । एवं च सुखानवच्छेदकं शरीरावच्छेद्यं दुःखान्तरम्, तदनुरोधेनापि न पार्थिवायोनिजशरीरसिद्धिः । योनिस्पर्शसुखवारणाय हि तथा कल्प्यते । तत्र च मातापित्रोर्योनिस्पर्शसुखेऽपि पुत्रस्य नारकीयत्वमुपपद्यते । जलीयादिशरीरेणान्यथासिद्धिश्च कथं वारणीया । एवञ्च स्पर्शवत्परमाणुत्वेन साक्षात्परंपरासाधारणशरीरादिभेदभिन्नद्रव्यमात्रसमवायिकारणतायां लाघवेन सिद्धायां सर्वेषां परमाणूनां शरीरेन्द्रियविषयान् प्रति स्वरूपयोग्यत्वेनादृष्टविशेषसहकारिणमासाद्य कदाचिच्छरीरं कदाचिदिन्द्रियं कदाचिद्विषयानारभन्ते तथा च जलादिपरमाणूनां शुक्रशोणितासम्भवे योनिजारंभकत्वमेव, पार्थिवानां तु यदा यथाऽदृष्टं तदा तथाऽऽरम्भकत्वं तेषां शुक्रशोणितनिरपेक्षाणां विषयाद्यारम्भकत्ववत् शरीरारम्भकत्वस्याऽपि सम्भवात् । कृमिमशकादिशरीराणां च पार्थिवानां योन्यनपेक्षत्वमध्यक्षसाक्षिकमेवेति संक्षेपः ।

ननु शरीरस्य पाञ्चभौतिकत्वश्रुतेः कथमेकसमवायिकारणकं शरीरम्? न चैकस्य समवायिकारणतयाऽन्येषां निमित्तकारणतया च तदुत्पत्तिरिति भूतकारणकत्वेनापि भौतिकत्वोपपत्तेः पञ्चभूतसमवायिकारणत्वस्याश्रुतेरिति वाच्यम् । विनिगमनाभावेनाकाशव्यतिरिक्तानां निमित्तकारणत्वे प्रमाणाभावात्, आकाशस्य तु निःस्पर्शतया

द्रव्यसमवायिकारणत्वाभावेन श्रुतिसिद्धकारणत्वस्य निमित्तकारणत्वात्। न च भूतचतुष्कसमवायिकारणस्य शरीरकस्य न यथासम्भवमेकैकभूतात्मकत्वं विनिगमनाभावादेकारब्धस्यैवापरारभ्यत्वे तत्त्वस्यापि प्रसङ्गात्, नापि चतुरात्मकत्वं पृथिवीत्वादीनां व्याप्यवृत्तित्वे जातिसंकरप्रसङ्गात् अव्याप्यवृत्तित्वे अव्याप्यवृत्तित्वस्यापि प्रसङ्गादिति वाच्यम्। चित्रस्य सप्तमरूपस्येव दशमद्रव्यस्य स्वीकर्तुमर्हत्वादिति चेन्न। चित्रद्रव्यान्तरकल्पनापेक्षयैकैकसमवायिकारणकत्वस्य मन्तुमुचितत्वात्। तत्र मानुषादिशरीरे पृथिवीसमवायिकारणकत्वमेव गन्धस्य यावद्द्रव्यभावित्वात् भस्मारम्भकत्वाच्च। जलादिगुणानां यावत्सत्त्वं मानुषादिशरीरेऽनुपलब्धेः। एवं च पाञ्चभौतिकत्वप्रसिद्धिः शरीरे प्रमाणप्रापितापि न पञ्चसमवायिकारणकत्वेनाकाशमादायानुपपत्तेः, किन्तु पञ्चकारणकत्वेन, सा च भावकार्यतया समवायिकारणत्वेन विना ऽनुपपन्ना सम्भाविनाञ्चतुर्णां मिलितानां निरुक्तनयेन तत्त्वासम्भवेनैकस्य समवायिकारणत्वे पर्यवस्यति। तत्र पृथिवीवर्तिनां विना बाधकं पृथिवीत्वमेवोचितमनुग्राहकस्य पाकजरूपादेः सत्त्वात्, न हि यत्कनकनिकषगौरमङ्गमतिशयेन तदातपान्तश्यामं नोपलभ्यते। एवं वरुणलोकादौ जलादिशरीरमनुसञ्चर(?)तस्यापि स्पर्शवत्परमाणुत्वेन त्रिविधकार्यारम्भकत्वेन शरीरारम्भकत्वाज्जलीयादिशरीरस्य च वरुणलोकादावेवोचितत्वात्। अनेनैव न्यायेन विषयादिरूपेऽपि पृथिव्यादौ न विजातीयारम्भकत्वम्। वृक्षतृणादेस्तु शरीरत्वं श्रुतिसिद्धमपि श्रीमदाचार्यैः किरणावल्यामनुमानेन साधितं तत्रैवानुसन्धेयमिति दिक्।

देवर्षीणां–देवानां ऋषीणाम्। 'अणुभ्यः' इति मूलकारणनिर्देशः। यातनानारकिणां नरकपीडा तस्यै दंशादिद्वारेण क्षुद्रजन्तूनां मशकादीनां शरीराणि अयोनिजान्येव न तु मशकादीनां नरकपरतया व्याख्येयम्, तेषां सुखभागितयाऽनारकित्वादिति भावः। नारकिशरीरमपि अयोनिजमेवेति द्रष्टव्यम्।

ननु योनिशब्देन कारणग्रहणे कथं द्वैविध्यमत आह शुक्रेति। सन्निपातः–सम्बन्धः, गर्भवेष्टनञ्चर्मपुटकं जरायुः। पशवो–ग्राम्याश्चतुष्पदाः, आरण्या–मृगाः। सरीसृपाः–परितः सर्पणशीलाः सर्पादयः। इन्द्रियमिति। घ्राणं पार्थिवमिन्द्रियं तच्च सर्वप्राणिनां न तु कस्यचित्

घ्राणं पार्थिवं कस्यचिदन्यदीयम्, तस्य च पार्थिवत्वे बीजं गन्धव्यञ्जकमित्यनेनोक्तम् । प्रमाणञ्च—गन्धोपलब्धिरिन्द्रियजा जन्यसाक्षात्कारत्वात्सुखोपलब्धिवदित्यनेन गन्धोपलम्भकेन्द्रियसिद्धौ तदिन्द्रियं पार्थिवं गन्धवत्त्वाद् घटादिवद् । गन्धवत्त्वात् रूपादिषु गन्धमात्रव्यञ्जकद्रव्यत्वाद्वायूपनीतचम्पकभागवत्तस्य स्पर्शादीनामतीन्द्रियतया तेषु गन्धमात्रव्यञ्जकत्वात्तेन संयोगं विना संयुक्तसमवायाभावेन गन्धाग्रहे गन्धव्यञ्जकत्वस्य सुस्थिरत्वात् (?) । द्रव्यत्वादित्यनुक्तौ सन्निकर्षे व्यभिचारो मात्रपदानुपादाने मनसि गन्धमात्रव्यञ्जकद्रव्यत्वादेतावत्प्रसिद्धिः गन्धत्वादेरव्यभिव्यञ्जकत्वात् । न चाप्रसिद्धे व्याप्तिग्रहः सम्भवतीति रूपादिषु गन्धमात्रव्यञ्जकद्रव्यत्वादिति हेतूकृतम् । एवं च रूपाद्यव्यञ्जकत्वे सति गन्धव्यञ्जकद्रव्यत्वादिति पर्याप्तम् । तत्रादिपदं व्यर्थं रूपाव्यञ्जकत्वे सति गन्धव्यञ्जकद्रव्यत्वादित्यनेनैव मनःप्रभृतौ व्यभिचारवारणेन सामञ्जस्यात् । धर्मिसाधकानुमाने तु गन्धजन्यसाक्षात्कारः पक्षोऽसाधारणेन्द्रियजन्यत्वं साध्यं, तेन नानुमित्यादौ बाधो न वा मनसार्थान्तरम् । न च दृष्टान्तासिद्धिर्ज्ञानमात्रे मनसः साधारण्येऽपि सुखोपलब्धावसाधारणत्वात् । जलाद्यनभिभूतैरित्यनेन कस्यचिद् घ्राणस्य यद्गन्धानभिव्यञ्जकत्वं तत्र युक्तिरुक्ता, अत एव स्वतोऽपि श्लेष्माभिभूतं न ग्राहकमिति भावः । यत्तु यदि पृथिव्या गन्धाभिव्यञ्जकत्वं तदा सर्वस्याः कुतो न भवति इत्याशङ्कायामेतदुत्थापनम् । तन्न शोभनम् । एवं हि घटादिरूपायाः पृथिव्या अग्राहकत्वे बीजत्वेनाभिभूतावयवत्वमुक्तं भवति । न चैतत्सम्भवति, सर्वस्यास्तथात्वे मानाभावात्, स्वभावस्यापर्यनुयोज्यत्वे तथा पूर्वपक्षानवकाशाच्च, तथा च यदि किञ्चिद् घ्राणमुत्पत्तिमारभ्यैवाग्राहकं तदा तत्समाधानं कदाचित्त्वग्राहकत्वे दोषोपप्लुतत्वेनेति तत्त्वम् ।

विषयस्त्विति । अत्र द्व्यणुकादिप्रक्रमेणारब्ध इत्यनेन परमाणुसमूह एव घटादिरिति नास्तिकादीनां सिद्धान्तवादोऽपाकृतः । सांख्यानां परिणामवादो वेदान्तिनां विवर्तवादश्च द्व्यणुकादिः सृष्टिप्रक्रम इत्युक्त्या महदादिः स इति निरस्तम् । परमाणुभिरेव क्रमिकसंख्याप्रकर्षेण द्व्यणुकादिसृष्टिरिति च निरस्तम् । परमाणुभ्यां द्व्यणुकमारभ्यते द्व्यणुकैस्त्र्यणुकमित्यादि विवक्षणात् । परमाणु-

समूहस्य घटत्वे प्रत्यक्षत्वं न स्यात्। परमाणोः परमाणुत्वेनैव अप्रत्यक्षत्वात् लाघवात् अमिलितपरमाणुत्वेन तथात्वे गौरवात्, भवन्मते मिलितपरमाणुद्वयस्य प्रत्यक्षतापत्तेश्च।

ननु भवन्मते यथा महत्त्वे सत्युद्भूतरूपवत्त्वेन द्वयोर्मिलितयोरपि न प्रत्यक्षता बहुत्वाभावात्, एवं बहूनाममिलितानामपि मिलितत्वाभावाद् एवं बहूनां चक्षुरादिरूपतया मिलितानामपि उद्भूतरूपाभावात् इति चेन्न। मिलितत्वं हि समुदायत्वं परस्परसम्बन्धत्वं वा? नाद्यः—व्यस्तानामपि समुदायत्वसम्भवात्। न द्वितीयः—घटाद्यनाकारेणाप्येकत्र स्थितया परमाणूनां मिलितत्वसम्भवात्। घटाद्याकारेण मिलितत्वं विवक्षितमिति चेन्न। आकारविशेषस्य परमाणुभिन्नस्य स्वीकर्तव्यत्वे घटादेरेव स्वीकर्तव्यत्वात्—अविशेषात् प्रत्यक्षं प्रति। कुर्वद्रूपाः परमाणवः प्रत्यक्षा इति चेत्। कुर्वद्रूपत्वस्य क्षणिकतावादे निरसनीयत्वात्। यत्त्वेकत्वप्रत्ययानुपपत्तिः स्थूलत्वावभासाऽनुपपत्तिश्चावयविनि मानमिति। तत्र धान्यादिराशिवदुपपत्तेः(१)। किञ्च महत्त्ववान् घटो रूपवान् घट इत्यादिप्रतीतिसिद्धान्तात् महत्त्वादीनां प्रत्यक्षत्वप्रयोजकत्वमुचितं न त्वप्रामाणिकस्य कुर्वद्रूपत्वस्य। न चावयविसिद्धौ सकम्पत्वाकम्पत्वे आवृतानावृतत्वे रक्तत्वारक्तत्वे च विरुद्धे कथमेकत्र स्याताम् परमाणुसमूहत्वे च केषुचिदेषु विधिः केषुचिद्धानिः उपपद्यते इति वाच्यम्। अवयविक्रियाया अवयवक्रियाऽविनाभूतत्वेन पाण्यादेरेकस्य सकम्पत्वेऽपि शरीरस्य निष्कम्पत्वात् सकम्पत्वासकम्पत्वयोर्विरोधाभावात् आवृतत्वं यदि सर्वावच्छेदेन चक्षुरादिसम्बन्धप्रतिबन्धकद्रव्यवत्ता तदा साऽऽवृतेर्नास्त्येव। यदि च किञ्चिदवच्छेदेन सा तदा व्यवधायकद्रव्यसंयोगस्याव्याप्यवृत्तितया भावाभावावेकत्रोपपन्नावेव। एवं महारजनसंयोगस्याव्याप्यवृत्तितया रक्तत्वारक्तत्वेऽपि न विरुद्धे। ननु पाणिकम्पे शरीरस्याकम्पत्वे परदेशे पाणिसंयोगे शरीरसंयोगो न स्यात् करणस्यान्यतरकर्मादेरभावादिति चेत्। कारणाकारणसंयोगेनैवोपपत्तेः, स एवायं वृक्ष इति मूलशाखयोः प्रत्यभिज्ञानाच्चावयविसिद्धिः। न च सैवेयं प्रदीपशिखेति वदुपपत्तिः, तत्र परिमाणभेदस्य विरुद्धधर्मस्य संसर्गस्य भेदकत्वात्। परिमाणा-

(१) अत्र पाठस्त्रुटित इव दृश्यते।

न्तरोत्पत्तिर्हि पूर्वपरिमाणनाशे सति भवति, न च पूर्वपरिमाणनाशो द्रव्यनाशं विनेति। ननु पाणिकम्पे शरीरस्य निष्कम्पतायां पूर्वदेशे पाणिविभागे शरीरस्य विभागो न स्यादिति चेन्न। कारणाकारणविभागेनैव तदुपपत्तेः। न च शरीरस्यावयवित्वे किञ्चिदवच्छेदेन पूर्वदेशविभागे किञ्चिदवच्छेदेन पूर्वदेशसंयोगो न स्यादिति वाच्यम्। तयोरव्याप्यवृत्तित्वेन तथोपपत्तेः तस्मात्प्रारम्भवाद एव न संघातवाद इति सिद्धम्। तात्त्विकोऽन्यथाभावः परिणामोऽतात्त्विकोऽन्यथाभावो विवर्त इति तु मतद्वयं कार्यकारणयोरभेदं भेदमादाय वा? आद्ये कार्यकारणभावानुपपत्तिः। द्वितीये प्रारम्भवाद एव पर्यवसानात्। अन्यथा भावो जन्यत इति चेत्। तस्याऽपि भिन्नत्वेऽभिन्नत्वे चोक्तोत्तरत्वात्। महदादिसर्ग इति तु महदादौ प्रमाणसापेक्षम् त्र्यणुकादौ प्रत्यक्षत्वेन द्व्यणुकस्याऽपि अनुमानगम्यतया नास्मत्पक्षे प्रमाणापेक्षा। परमाणव एव वाऽन्तराले द्रव्यमासाद्य तत्तत्कार्यजनका इति त्ववशिष्यते। तत्रेदमुच्यते-परमाणूनामाहत्य घटाद्यारम्भकत्वेऽवयवानामतीन्द्रियत्वेन तत्संयोगरूपस्य कंबुग्रीवादेरप्रत्यक्षत्वापातात्। आन्तरालिककार्यजनने च तेषामनुपलम्भापत्तिः। न च परमाणुर्द्व्यणुकमारभ्य त्रसरेणुमारभते, एवं त्रसरेण्वादिकमारभ्य चतुरणुकादिकम्, तथाच नान्तरालिककार्यानुपलब्धिः। न च कपालादिसंयोगरूपस्य कंबुग्रीवादेरनुपलब्धिः कपालाद्यारभ्य घटाद्यारम्भादिति वाच्यम्। परमाणोस्त्रसरेण्वादिस्वरूपयोग्यत्वे द्व्यणुकाद्यनारभ्याप्यारम्भकत्वापत्तेः। आरब्धद्व्यणुकत्वेन त्र्यणुकारम्भकतेति चेत्। लाघवेन द्व्यणुकत्वेनैव तथात्वौचित्यात्। द्व्यणुकपरमाणुभ्यां द्व्यणुकारम्भ इति चेत्। तथापि गौरवात्, द्रव्ये संयुक्तानामेव समवायिकारणत्वात् परमाणुद्व्यणुकयोश्च समवायत्वात्, मूर्तानां समानदेशताविरोधेन द्व्यणुकादित्र्यणुकाद्योः परमाणावसम्भवाच्च। अवयवावयविभावानापन्नयोर्निविडयोर्मूर्तयोर्यदवच्छेदेनैकस्य वृत्तिस्तदवच्छेदेनापरस्य वृत्तिविरोधात्। घटसत्त्वस्थले कपालसत्त्वादवयवावयविभावानापन्नयोरिति। चक्षुरालोकयोरेकत्र सत्त्वान्निविडयोरिति। ननु संयोगेनैव मूर्तानां समानदेशताविरोध इह तु समवायेन वृत्तिरिति चेन्न। समवायेन क्वचित्तथा वृत्त्यदर्शनेन संयोगेनेत्युपादानस्यानौचित्यादिति संक्षेपः।

मृत्त्वादयो जातिविशेषा इत्याचार्याः। तत्रेति। भूप्रदेशा-भूभागाः। प्राकारेष्टकादयश्च मृत्तिकारूपा विकारा इत्यर्थः। भूभागग्रहणेन भुवोऽपि ग्रहणम्। उपलाः-सुलभपाषाणाः, मणयो-माणिक्यप्रभृतयः। वज्रं-हीरकम्, आदिपदेन गैरिकाद्याः। स्थावरा इति। वृक्षाः-स्कन्धशाखाशालिनः पुष्पफलभाजः, तृणान्युलपादीनि प्रसिद्धानि। फलपाकान्ता-ओषधयो यवादयः, गुल्मान्यापःकुष्माण्डीप्रभृतयः, लताः केतक्यादयो अवतानाः, अपुष्पाः फलिनो वनस्पतयः। शरीरग्रहणेन तदवयवानां करादीनां तद्विकाराणां क्षीरादीनां च परिग्रहः। एवमिन्द्रियग्रहणेन तदवयवावयविग्रहणेन तण्डुलतैलादयस्तद्विकाराः।

इति पृथिवी॥

(व्यो०) रूपादयो ह्यसाधारणत्वाद्भेदका इति प्रतिज्ञातार्थसमर्थनार्थमसाधारणत्वमाह क्षितावेव गन्ध इत्यादि। अथोदके तेजसि वोपलम्भात् गन्धस्य अवधारणमनुपपन्नम्। न। संयुक्तस्य समवायेनोपलम्भात्, तथा ह्युदके वासकद्रव्यसम्पर्कात् गन्धाभिव्यक्तिदृष्ट्या तेजसि चेन्धनविशेषानुविधानादिति। यदि पुनः स्वभावत एव स्यात् गन्धः तेजसीन्धनविशेषं विना वासद्रव्यसम्पर्कञ्च विना वारिण्युपलभ्येत, न चैवमतो युक्तमेतत्-क्षितावेव गन्ध इति। रूपं शुक्लाद्यनेकप्रकारं क्षितावेव नोदके न तेजसि नियमेन शुक्लमेवोदके भास्वरं च तेजस्युपलभ्यते पृथिव्यास्त्वनेकप्रकारम्। तथाहि-पटादिभेदाद्भिन्नत्वात् पृथिव्याः काचित् शुक्ला काचिद्धरितेत्युपलम्भः। ननु युक्तं व्यक्तिभेदापेक्षयाऽनेकरूपसम्बन्धित्वं पृथिव्याः, या तु गोलकरूपा न तस्यामनेकप्रकारम्। अथ तत्रापि केचिद्भागाः शुक्लाः केचित् कृष्णा इत्याद्युपलम्भादनेकरूपसम्बन्धित्वम्। नावयवावयविनोरन्यत्वादवयवानामनेकरूपसम्बन्धित्वे कथमवयविनस्तथाभावः, अभ्युपगमे वा सूत्रव्याघातः। विभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामसम्भवादिति व्याहन्यतेति। व्यापके हि द्रव्ये समानेन्द्रियग्राह्याणां बहूनामपि सम्भवो दृष्टो. यथा शब्दानामाकाश इति तन्निरासायाविभुग्रहणम्। तथा अविभुनि द्रव्ये वि-

भिन्नेन्द्रियग्राह्याणाम् रूपरसादीनामसम्भवादिति समानेन्द्रियग्राह्यपदम्। समानेन्द्रियग्राह्याणामपि संख्यादीनां बहूनामविभुनि द्रव्ये सम्भवो दृष्टः, तद्व्यवच्छेदाय विशेषग्रहणम्। अतो बहूनां रूपाणामेकस्यां पृथिव्यामभ्युपगमे व्याघातः। अभ्युपगम्यापि ब्रूमः। शुक्लादीनां बहूनामेकत्र सद्भावे किमाश्रयव्यापित्वं प्रदेशवर्त्तित्वं वा? आश्रयव्यापित्वे सत्येकावयवसहितेऽप्यवयविन्युपलब्धे परावयवावरणेऽप्यनेकरूपं गृह्येत आश्रयव्यापित्वादेव। अथ प्रदेशवृत्तित्वं तथापि विशेषणमाश्रयव्यापित्वमिति विरुध्यते। अथैकं चित्रं तद्रूपमिति, यथा शुक्लं पीतमित्यादिविशेषः, तथा चित्रं रूपविशेष एव, अत्रोक्तम्—

चित्रं तदेकमिति चेदिदं चित्रतरं ततः।
यद्येकं तत् कथं चित्रम् चित्रश्चेदेकता कथम्॥ इति।

एकं चित्रं चेत्यतिशयेनाश्चर्यमिति। न च परस्परविरुद्धानां रूपाणामेकरूपारम्भकत्वं न्याय्यम्। समानरूपारम्भकत्वेनोपलम्भाच्छुक्लाच्छुक्लमिति। अथ पृथिव्यामपां च शुक्लादिविशेषं रूपमात्रमुपलम्भान्यथानुपपत्त्या निश्चीयते। अन्यथा हि नीरूपत्वाच्चक्षुर्ग्राह्यत्वं न स्यात्-रूपवतो द्रव्यस्य चक्षुर्ग्राह्यत्वादिति। न चावयवरूपादेव चक्षुर्विषयत्वम्। अन्यरूपेण अन्यस्य चक्षुर्विषयत्वे वायोरपि तथाभावप्रसङ्गात्। अतश्चक्षुर्विषयत्वाद्रूपमात्रं क्षिताविति। नन्वेवमनेकप्रकारं क्षितेः रूपमिति विरुद्ध्यते—रूपमात्रस्य शुक्लाद्यन्तर्भावाभावात्। तथाहि—अनेकप्रकारशुक्लादिभेदभिन्नमित्युच्यते। रूपमात्रं च विशेषरहितमिति विरोधः। तदेतत्सर्वमविदितार्थम् शुक्लाद्यनेकप्रकारस्य रूपस्य क्षितावभ्युपगमात्। ननूक्तम् 'सूत्रविरोध' इति। न, सूत्रार्थापरिज्ञानात्। तथाच सूत्रस्यार्थः-अविभुन्यव्यापके द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामेकाकाराणामसम्भव इति प्रतिषेधः नत्वनेकप्रकाराणाम्। कथमेतत्? अनेकाकारस्य रूपस्य क्षितावुपलम्भात्तथा रसस्य षड्भेदस्येति। अथैकाकाराणां बहूनां रूपाणां रसानाञ्चैकत्रासद्भावः तस्मान्नेष्यते वैयर्थ्यात्। तथाहि-एकेनैव शुक्लरूपेण रूपप्रत्ययस्य जनितत्वाद्द्वितीयस्य वैयर्थ्यमेव। तथा मधुररसेन मधुरप्रत्ययस्येति। अथ शुक्लादीनामेकस्य सद्भावे किं व्याप्यवृत्तित्वमुताव्याप्यवृत्तित्वमित्युक्तम्। तत्राव्या-

प्यवृत्तित्वे न विरोधः। शेषाणामाश्रयव्यापित्वमेवेत्यवधारणानभ्युपगमात्। अत एवैकावयवसंहितस्य पटस्योपलम्भात्तदेकरूपोपलम्भोऽप्याश्रयव्यापितयाऽनेकरूपाणामनुपलम्भाच्चित्रप्रतिभासाभावः। अथ किं चित्रादुत्पद्यते चित्रमथाचित्रादिति। चित्रादुत्पत्त्यभ्युपगमे पटकारणकारणेष्वपि चित्रप्रतिभासप्रसङ्गः। अथाचित्रादुत्पद्यते। तदा ह्येकरूपाः सर्वत्र चित्ररूपोत्पत्तिप्रसङ्गः। नैतद्युक्तम्। नानारूपाणि हि कारणानि नानारूपं कार्यमारभन्त इत्युपलब्धम्। न चैवं तत्कारणकारणेषु नानारूपाणि सन्तीति चित्रानुत्पादः। न च तन्तूनां नीलाद्यनेकरूपसम्बन्धित्वात्पटेऽप्यनेकरूपारम्भकत्वे किञ्चिद्बाधकमस्ति कारणगुणपूर्वप्रक्रमेण तथाविधस्य रूपस्योपादानात्। तथाहि–प्रत्येकं कारणेष्वविचित्रादपि रूपान्नीलान्नीलं पीतात्पीतमिति युक्तम्। भवतु चैवैकं चित्रं रूपं नीलादि रूपैरेकरूपारम्भाद्यथाहि शुक्लादिविशेषो रूपस्य तथा चित्रं रूपादिविशेष एव। यद्यपि शुक्लादिशब्देन व्यपदिश्यते, तथापि स्वशब्देन व्यपदेशादस्तित्वम्। अथ विरुद्धानां नीलादीनां कथमेकरूपारम्भकत्वम्? यथा शुक्लानामिति। यथाहि बहूनि शुक्लरूपाण्येकं शुक्लरूपमारभन्त इत्युपलब्धम्, तथा नीलादीनामपि चित्ररूपारम्भकत्वं दृष्टत्वादभ्युपगन्तव्यम्। अथ चित्रशब्दस्य नानापर्यायत्वादेकं चित्रं चेतीदमेव चित्रमाश्चर्यमिति। तदसत्। यथा नानारूपेषु चित्रव्यपदेशः चित्रास्तन्तवो नीलादिरूपसम्बन्धिन इति, तथा तदारब्धेऽपि घटे चित्ररूपमस्तीति। न चावश्यं नानारूपसम्बन्धिष्वपि पटादिषु चित्रव्यपदेशो दृष्टः नानारूपैस्तु कारणैरारब्धेऽवश्यं भवतीति। अथैकत्वाच्चित्ररूपस्यैकावयवसहितेऽप्यवयविन्युपलब्धे शेषावयवावरणे विचित्रप्रतिभासः स्यात्। न, सहकार्यभावात्। तथाहि–अवयवेषु नानारूपोपलम्भसहकारीन्द्रियमवयविनि चित्रप्रतिभासं जनयतीति अन्वयव्यतिरेकाभ्यामित्युपलब्धम् कन? शेषावयवारब्धे तद्रूपाणामग्रहणात् अवयविनि चित्रप्रतिभासाभावः। न च प्रतिभासादेकान्तेनासत्त्वम्। सहकार्यभावेनाप्युलम्भात्। यच्च रूपमात्रमुपलम्भान्यथानुपपत्त्या ज्ञायत इति कैश्चिदुक्तम्। तत्रापि न दोषो विप्रतिपद्यमानस्यानुमानोपन्यासात्। तथाहि शुक्लादिविशेषव्यतिरिक्तं चित्रं रूपं क्षितौ विद्यमानमपि वैयात्याद्यो न मन्यते तं प्रत्यनुमानं क्षितेरुपलम्भात् रूपत्वं विज्ञायत

इति। चक्षुषोपलम्भाच्च सिद्धे रूपवत्त्वे शुक्लादिशब्दैर्व्यपदेशासम्भवाच्चित्रशब्देनाभिधीयते इति सिद्धम्।

एतेन रसो व्याख्यातः। रसः षड्विधो मधुरादिः क्षिताबेव। व्यक्तिभेदो नैकस्यां च व्यक्ताविति। तथा चैकस्यामपि हरीतक्यामुपलभ्यते षड्विधो रस इति। अत एव षड्भेदस्यान्यत्रानुपलम्भादितरेभ्यो भेदकत्वम। तथा गन्धो द्विविधः-सुरभिरसुरभिश्च। एकस्यां पृथिव्यां व्यक्तिभेदो न चेति पूर्ववत। अथ सुरभिगन्धाभाव एवासुरभिरिति व्यवहारसम्भवात् गन्धस्य द्वैविध्यमनुपपन्नम्। नोभयोस्तीव्रतरादिभेदभिन्नत्वाद्यथाहि सुरभिगन्धे तीव्रतरादिव्यवहारस्तथाऽसुरभिगन्धेऽपीति सुरभिगन्धाभावे चैतन्नोपपन्नमभावस्य निरतिशयत्वादिति। स्पर्शोऽस्याः पृथिव्या अनुष्णाशीतत्वे सति पाकजः। अनुष्ण इत्युष्णस्पर्शव्यवच्छेदार्थम्। अशीत इति शीतात्। पाकज इति वायवीयात्। अथ पाकजोऽग्निसंयोग इत्युक्ते न व्यभिचारोऽस्तीति किमर्थमनुष्णाशीतग्रहणमिति चेत्, स्वरूपकथनार्थम्।

अन्ये तु किल पाकादग्नेरुष्णस्पर्शो भवतीत्युष्णग्रहणमशीतग्रहणमेव तु स्वरूपार्थमिति। अथ रूपादीनामिव वैलक्षण्याप्रतिभासनान्न पाकजत्वं स्पर्शस्य। तन्न। प्रत्यक्षेण वैलक्षण्याप्रतीतावप्यनुमानेन पाकजत्वप्रसिद्धेः। तथा च पार्थिवस्पर्शः पाकजः पार्थिवविशेषगुणत्वात् तद्गतरूपादिवदिति। नन्वेवं सामान्यगुणानामपि पाकजत्वप्रसंगः पार्थिवगुणत्वरूपवदिति। नैतद्युक्तम्। सामान्यगुणानां पक्षीकरणेऽग्निसंयोगेनैवानेकान्तः। तथाहि-पार्थिवपरिमाणवग्निसंयोगोऽग्निसंयोगजो न भवति पार्थिवगुणश्चेति पार्थिवविशेषगुणत्वं व्यभिचरतीति। सपक्षैकदेशे वर्तमानस्यात्यन्तं विपक्षाद्व्यावृत्तेः गमकत्वमेव। न च पक्षे प्रत्यक्षागमाभ्यां विरुध्यत इति न कालात्ययापदिष्टः। न च प्रकरणसमः-तत्त्वानुपलब्धेरप्रयोगात्। अतः पाकजस्पर्शादिकारणत्वादितरेभ्यो भिद्यते पृथिवीति।

समानानां भावः सामान्यम् भेदाधिष्ठानमतो भेदमाह सा तु द्विविधेति। सा तु पृथिवी द्विविधा। केन रूपेणेत्याह-नित्या चानित्या च। नित्या परमाणुलक्षणा-परमाणुस्वभावा। कार्यलक्षणा कार्यस्वभावा त्वनित्येति भेदः। भेदे च सति सामान्यलक्षणमुपप-

द्यते इत्यसम्भवित्वाशंकाव्युदासः। सर्वस्य कार्यस्य विनाशे समवायिकारणाभावात् पुनरुत्पत्तिर्न स्यादित्याशङ्कानिरासार्थं च वाक्यम्–सा तु द्विविधा नित्या चा अनित्या च। अनित्यायाश्च नाशे नित्या पुनर्द्व्यणुकादिप्रक्रमेण स्वर्गादौ कार्यमारभत इति सिद्धम्। कथं पुनः परमाणुस्वभावा पृथिवी ज्ञायत इत्याशंक्याह–कार्यलक्षणा कार्येण लक्ष्यते ज्ञायत इति। तथाहि–कार्यं समवायिकारणपूर्वकं तत्कारणमप्यन्यसमवायिकारणजन्यमिति यावदाद्यं कार्यं तदपि समवायिकारणजन्यमिति। तज्जनकाः परमाणवः। तथा कार्यादल्पपरिमाणं समवायिकारणम्। तस्याप्यन्यदल्पपरिमाणमित्याद्यं कार्यं निरतिशयाणुपरिमाणैरारब्धमिति ज्ञायते। अथ तदवयवानामपि पर्यवसानं नेष्यते–नित्यकारणानभ्युपगमात्तर्हि कार्यस्याकस्मिकस्यासम्भवात्तत्कारणेऽप्यन्यं समवायिकारणमित्यनवस्थायां कार्यद्रव्यस्याल्पतरादिभेदो न स्यात्। तथाहि–अल्पकारणारब्धमल्पभूयःकारणारब्धमिति दृष्टम्। न च कार्यद्रव्यस्य नित्यकारणानभ्युपगमेनानवस्थायामेतदुपपद्यते। सर्वस्याप्यनन्तकारणजन्यत्वाविशेषादिति यथाऽनन्तकारणैरारब्धा गोलकरूपा पृथिवी तथा घटादिकार्यमपि इत्येकाकारताप्रसङ्गः। न च संख्याफलपरिमाणैरेकाकारतोपलब्धा घटादेर्भिन्नपरिमाणत्वात् भिन्नफलत्वाच्चेति। तथाहि–किञ्चिद्धीनमधिकतरं च पञ्चपलं दशपलं समानकारणैरारब्धं बहुभिश्चेति वैचित्र्यम्। तच्चानवस्थायां न स्यात्। न च नित्यानभ्युपगमे प्रलयावस्थायां सर्वस्य कार्यद्रव्यस्य विनाशे पुनरुत्पत्तिर्भवेत्। अभावस्य समवायिकारणत्वाभावादिति। यथा च प्रलयावस्थायां सम्भवति तथा च वक्ष्यामो भूतपरीक्षायामिति। अतो नानवस्था व्यावर्तनीया पटादिकारणकारणानां अल्पतरादिभावेनावस्थितानामादिकार्यमभ्युगन्तव्यम्। तदाद्यं कार्यं समवायिकारणजन्यं कार्यत्वाद्यद्यत्कार्यं तत्तत्समवायिकारणजन्यं यथा पटादि। तथा चैतत्कार्यं तस्मात्समवायिकारणजन्यमिति। न च कार्यत्वमभावेन व्यभिचरतीति वाच्यम्। स्वकारणसत्तासम्बन्धरूपत्वात्कार्यस्य। तथा घटादिकारणकारणेष्वल्पतरादिभावः क्वचिद्विश्रान्तः तरतमशब्दवाच्यत्वान्महापरिमाणवत्। यत्र विश्रान्तास्ते परमाणव इति। अथ सावयवाः परमाण-

वः मूर्तत्वाद्घटत्ववत् । षट्केन युगपत् सम्बध्यमानत्वात् । तथा पूर्वभागो परभाग इति दिगुपलक्षितैर्देशैर्व्यपदिश्यमानत्वात्सावयवकार्यारम्भकत्वाच्च तन्त्वादिवदिति । सर्वमेतदाश्रयासिद्धम्-परमाणुसद्भावासिद्धेः । अथेष्यत एव परमाणोस्सद्भावस्तर्हि परमाणुसद्भावावेदकप्रमाणस्य प्रमाणान्तरस्याभ्युपगमात्तद्विपरीतानुमानं निर्विषयत्वादप्रमाणमिति । सच(?)परमाणवः परेणाभ्युपगमात्तस्यानिष्टापत्तिः क्रियत इति प्रसङ्गसाधनम् । तत्र यदि प्रमाणेनाभ्युपगता परेण परमाणवः तस्य प्रामाण्याभ्युपगमेऽनुत्थानं विपरीतानुमानस्य । अथाप्रमाणादेवं तर्हि तस्याप्रमाणतया परमाणुसद्भावो न सिद्ध्यतीति किमनुमानोपन्यासेनाश्रयासिद्धताप्रसङ्गात् । तथा परमाणवः सावयवाश्चेति प्रतिज्ञावाक्ये पदयोर्विरोधः । तथाहि-परमाणुशब्दस्य निरतिशयाणुवाचित्वं सावयवत्वे वाऽवयवापेक्षयाधिकपरिमाणत्वमिति विरोधः । न च समानाधिकपरिमाणत्वे समवायिकारणत्वमिति तदवयवाः परमाणवः तेषामपि सावयवत्वे तदवयवास्तेषामपि सावयत्वे तदवयवा इत्यनवस्थायामुक्तं दूषणम्-अल्पतरादिभेदानुपपत्तिरिति । अथ मा भूदनवस्थेति निरवयवाः परमाणवोऽभ्युपगम्यन्तेऽप्रमाणस्तर्हि तेन बाध्यमानत्वात् सावयवत्वानुमानमप्रमाणमिति । अथ निरवयत्वादणूनां षट्केन योगो दिग्देशव्यपदेशश्च न स्यात् । नान्यथापि भावात् । तथाहि-संयोगस्याव्याप्यवृत्तितया पूर्वोत्तरादिदिग्व्यवस्थितं युगपत्संबन्धेपि न सावयवत्वम् । एवं पूर्वभागो अपर इति यद्यस्ति व्यपदेशः सोपि मुख्ये बाधकोपपत्तेर्भाक्तो द्रष्टव्यः,-अव्याप्यवृत्तिसंयोगाधारत्वसामान्यादिति । यच्च सावयवारम्भकत्वम् तत्र यदि सहावयवैरारम्भकत्वं तदसिद्धम् निरवयवत्वात् । अथ सावयवस्य सदाषयवैर्वर्तिष्यमाणस्य कार्यस्य जनकत्वं तदसिद्धम-परमाणुभ्यां द्व्यणुकारम्भात्तथाहि-ते हि नावयवसहिताः कार्यमारभन्ते न स्वात्मानं नित्यत्वात्, स्वात्मनि क्रियाविरोधाच्चेति तन्तुदृष्टान्तोपि साधनविकलः । ते हि नावयवसहिताः कार्यमारन्ते नाप्यवयवासहिता इति स्थितं कार्येण लक्ष्यते—नित्या पृथिवीति । अभेदवादिनिरासार्थं च द्विविधेति वाक्यम् । तथाहि-पृथिवी पृथिव्यन्तराद्भिद्यमाना किं पृथिवीरूपतया भिद्यते, उताप्रृथिवीरूपतयेति ।

पृथिवीरूपतया पृथिव्यन्तराद्भेदे तस्यापृथिवीत्वप्रसङ्गः । अथापृथिवीरूपतया भिद्यते या तर्हि भिद्यते सा पृथिवी न स्यात् । अथावान्तरविशेषसम्बन्धात् भेदस्तत्रापि यदि विशेषान्तरादनवस्था । अविशेषान्तरेण विशेषं विशेषा भिद्यन्ते पृथिव्यास्तथाभावप्रसङ्ग इत्युक्तं द्वैतवादिना । भेदमाह—सा च द्विविधा नित्या चानित्या च । नित्या पृथिवी नीरूपतयाऽनित्याती भिद्यते । अनित्या तु नित्यानश्ल्यवान्तरभेदादेव भेदः । अथ तेषामपि विशेषान्तराद्भेदाभ्युपगमेऽनवस्थेत्युक्तम् । तदसत् । तत्राप्यसाधारणधर्मस्यासाधारणधर्मान्तराभ्युपगमेऽपि जातिगुणक्रियादिरूपतया षट्स्वेवान्तर्भावादनवस्थायामप्यदोषः । व्यावृत्तस्वरूपं पदार्थानां निर्विकल्पकज्ञाने प्रतिभासत इत्युक्तोत्तरमेतत् । यदि वा लक्षणेन लक्ष्यमाणस्यैकानेकत्वोपलब्धेः संशये सति तन्निरासार्थं वाक्यम्—सा तु द्विविधेति । नैकत्वमाकाशस्येव विप्रतिपत्तिनिरासार्थम् ।

कार्यलक्षणाया धर्मान्तरं निरूपयति—सा च स्थैर्याद्यवयवसन्निवेशविशिष्टेति । स्थिराया भाव स्थैर्यम् तदादिर्येषाम् मृदुत्वकठिनत्वादीनां ते स्थैर्यादयः ते चावयवानां सन्निवेशश्च रचनाविशेषः, तैर्विशिष्टेति—गुरुत्वाविधारकत्वस्यासम्भवात् । सर्वदा पतनं क्षितौ विद्यमानमपि, पूर्वपरभागादवधारणान्नोपलभ्यते इति दिग्वाससां मतं तन्निरस्यते । स्थैर्यपदेन स्थैर्यं स्थिरत्वमपात इति यावत् । यदि पुनः पातः स्यात् गुरुत्वातिशयेन पातातिशयोपलब्धेः क्षितेरतिशयेन पातादुपरि क्षिप्तस्य लोष्टादेर्भूमिसम्बन्धो न स्यात् । तथाहि—लोष्टस्य यावदुपरिगमनं पुनर्मन्दमागमनं तावत्क्षितेः शीघ्रपातितया योजनशतादिव्यवधानं स्यादिति सम्बन्धाभावः । दृष्टस्तु सम्बन्ध इति ज्ञायते न पतनं क्षितेरिति । अत एवापातनान्यथानुपपत्त्या ज्ञायते गुरुत्वविधारकम् किञ्चिदस्तीति । अन्यथा हि गुरुत्वविधारकाभावे पातोऽवश्यं स्यादिति, स तु न भवतीति प्रतिबन्धोऽनुमीयते । अत्र हि गुरुणो द्रव्यस्य प्रतिबन्धकत्वे तस्यापि गुरुत्वयोगितया पातः स्यादिति वायोर्महतः प्रतिबन्धकत्वम् । दृष्टं ह्यल्पीयसोऽपि वायोरुपरि पर्णादिव्यवस्थापने गुरुत्वविधारकत्वम् । पृथिवीप्रतिबन्धकस्त्वादिसृष्टावुत्पन्नोऽतिशयेन महान् पृथिवीमुदकादिसहितां तृणमिव धारयते । तथा स्थैर्यं पृथिव्या अक्षणिकत्वमि-

ति। क्षणिकत्वापाकरणार्थं च स्थैर्यग्रहणम्। यथा च क्षणिकत्वन्न
सम्भवति तथा वक्ष्यामि इति। ये तु निरवयवामकार्यां च पृथिवीं
मन्यन्ते तन्निरासार्थमवयवसन्निवेशविशिष्टेति। अवयवा इह भागा-
स्ते क्षितौ उपलभ्यन्ते तत्सन्निवेशो रचनाविशेषः प्रत्यक्ष इति। तथा-
वयवसन्निवेशविशिष्टत्वाच्च कार्यम्। तथाहि-पृथिवी कार्या अ-
वयवसन्निवेशविशिष्टत्वात् यद्यदवयवसन्निवेशविशिष्टं तत्तत्कार्यं दृष्टम्
यथा घटादि, तथा चावयवसन्निवेशविशिष्टा पृथिवी तस्मात्कार्येति।
ननु कार्यत्वेऽस्य न सन्निवेशविशिष्टत्वानुपलब्धेः बुद्ध्यादावित्यप्र-
योजकत्वादप्रमाणमिति ज्ञापनीयाः। तदसत्। सपक्षैकदेशवृत्तेर्गम-
कत्वाभ्युपगमात्। तथाहि-यद्यदवयवसन्निवेशवत् तत्तत्कार्यं दृष्टम्
न पुनर्यद्यत्कार्यं तत्तदवयवसन्निवेशवदिति ब्रूमः। न च सपक्षैकदेश
वर्तमानस्यागमकत्वम्-धूमानुमानस्यागमकत्वप्रसङ्गात्। तथाहि-
यदि धूमवत्त्वप्रयुक्तं स्यात् अग्निमत्त्वमन्तरेण धूमवत्त्वम् अग्निमत्त्वं
न भवेदिति। अथ विषमव्याप्तिकत्वाद्यो यो धूमवान् स सोऽग्निमा-
नित्येव व्याप्तिः, न पुनर्यो यो अग्निमान् स स धूमवानित्येवम्, तर्हि
अवयवसन्निवेशवत्त्वस्यापि सपक्षैकदेशे वर्तमानस्य नाप्रयोजकत्वम्।
अथाभूत्वा भावित्वस्यानुपलब्धेन क्षितेः कार्यत्वम्। किमत्र प्रत्यक्षे-
णानुपलब्धिः, अथ भूत्वा भावित्वस्यानुमानेन वा? प्रत्यक्षेणानुपल-
ब्धौ कस्यचिद्घटादौ नोपलभ्यते इत्यकार्यताप्रसङ्गः। अथ तत्राप्य-
भूत्वा भावित्वमवयवसन्निवेशत्वेन ज्ञायते इति क्षितावप्यवयवसन्नि-
वेशवत्त्वेनैवाभूत्वा भावित्वं गम्यते इति, समान=कार्यत्वेन च कर्तृपूर्व-
कत्वं गम्यते इति वक्ष्यामो भूतपरीक्षायाम्।

तथा कार्यलक्षणाया धर्मान्तरमाह-अपरजातिबहुत्वोपेतेति। अप-
रा तु जातिः पृथिवीत्वापेक्षया घटत्वपटत्वादिरूपा। तस्या बहुत्व-
मपरसंख्यातत्वम्, तदुपेता-तद्युक्तेति। न चैवं परमाणुलक्षणाति
लक्षणम्। तथा कार्यलक्षणायाः कार्यं निरूपयति शयनासनादि-
भेदेनानेकमुपकारं करोति इत्यनेकोपकारकरी च। यदेवार्थक्रिया-
कारि तदेव परमार्थसत्। अर्थक्रियाविरहो ह्यभावलक्षणमिति द-
र्शनस्य सत्तासम्बन्धेन सत्ताभ्युपगमेऽप्यभ्युपगमवादेन निरासार्थं
चैतद्भवतीति। पृथिवीकार्यस्यानन्तत्वादशक्यं तत्परिज्ञानं मा भूदि-
त्यवान्तरभेदेन वैधर्म्यम्। वीप्सायां प्रतिज्ञातमाह-त्रिविधं चास्याः

कार्यमिति। यथा ह्येवंभूतो धर्मः कार्यपरमाणुरूपतया नित्यानित्यभेदः कार्यरूपायां च स्थैर्यादिधर्मयोगोऽपरजातिर्बहुत्वं चास्याः पृथिव्यास्तथा त्रिविधं च कार्यमिति क्षितेः कार्यस्यानन्त्येऽपि शरीरादिरूपेण परस्परं व्यावृत्तात्मतया त्रिविधावस्थितस्य तत्त्वज्ञानविषयत्वम्। तथाहि-शरीरमिन्द्रियं विषय इति संज्ञा यस्य तच्छरीरेन्द्रियविषयसंज्ञकं सर्वं क्षितेः कार्यमिति ज्ञेयम्।

अन्ये त्वस्याः परमाणुलक्षणायाः त्रिविधं कार्यं शरीरादिरूपमिति मन्यन्ते। व्यवहितस्यापि इदंशब्देन क्वचित्परामर्शादिति। तत्र शरीरस्येतरस्माद्वैधर्म्यमाह शरीरं द्विविधमिति। विशेष्यस्य सामान्यापेक्षित्वाद्विशेष्याभिधानेऽवश्यं सामान्यं लक्षणं विद्यमानमन्तेवासिनोह्यतामित्यूहनशक्तेः संवर्धनाय न सामान्यलक्षणमवोचत्। तथाहि-शरीराभिधाने शरीरत्वे शरीरव्यवहारकारणं ज्ञायत एव लक्षणमिति। तथेच्छानुविधायिक्रियाश्रयत्वं नर्ते शरीरात्सम्भवति इति शरीरवचनादर्थाल्लभ्यत इति स्वशब्देनावचनम्। अन्यथादौ तु शरीरादिद्वारेणत्यातिव्याप्त्यभावः। अथ शरीरत्वं सकलशरीरव्यापकत्वाद्भेदान्तराद्व्यावृत्तेश्च युक्तं लक्षणम्। न चैवमिच्छानुविधायि क्रियाश्रयत्वम्-तस्य हि विपक्षाद्व्यावृत्तस्यापि सतः पक्षे सर्वत्रासम्भवात्। तथाहि-मृताद्यवस्थायां एतन्न सम्भवतीत्यव्यापकम्। अथ जीवच्छरीरस्यैतल्लक्षणमिति चेत्। तन्न। सुप्तमूर्छिताद्यवस्थायामप्यनुपलब्धेः। कथं तर्हीदं लक्षणम्? योग्यताश्रयणात्। तथाहि-शरीरमितरस्माद्भिद्यते साक्षादिच्छानुविधायिक्रियाश्रययोग्यत्वाच्छरीरत्वसम्बन्धाच्च। यस्त्वेवं न भवति न चासौ साक्षादिच्छानुविधायिक्रियाश्रययोग्यः शरीरत्वयुक्तश्च यथेन्द्रियादिरिति। आमरणाद्यस्य पटुत्वापटुत्वभ्यामिन्द्रियाणां पटुत्वापटुत्वे तच्छरीरमिति केचित्। तथा ह्यौपधोपयोगादपीन्द्रियेषु पटुत्वं सम्भवतीति आमरणादिति पदम्। तथाचाव्याधितस्य शरीरपटुत्वेनामरणान्तमिति। इन्द्रियपटुत्वं दृष्टं व्याधितस्य त्वौषधयोपयोगेन व्याध्युपशमे शरीरपटुत्वादेवेन्द्रियपटुत्वादिति पश्यामः। शरीरस्यापटुत्वादेवेन्द्रियेषु च कामलादिदोषाः सम्भवतीति तत्पटुत्वेन व्यावृत्त इति। पार्थिवं तु शरीरं मांसाद्यवयवजन्यत्वे सत्यन्त्यावयवित्वादिति द्रष्टव्यम्। मांसाद्यवयवजन्यस्याप्यङ्गुल्यादेः शरीरव्य-

वहाराविषयत्वादित्यन्त्यावयविपदम् । अन्त्यावयवित्वं चाशरीरस्यापि सम्भाव्यत इति मांसाद्यवयवजन्यपदम् । सामान्यलक्षणलक्षितस्य पार्थिवशरीरस्य विशेषलक्षणार्थं विभागः-शरीरं द्विविधम् । केन रूपेण? योनिजमयोनिजं च । पूर्वमुद्दिष्टेऽपि योनिजेऽर्थप्रकाशस्य विवक्षितत्वादयोनिजमाह-तत्रायोनिजमिति । योनिशब्दस्य कारणपर्यायत्वात्तन्निषेधो मा भूदाकस्मिकमित्याह-अनपेक्ष्यशुक्रशोणितमिति । योनिशब्दः सामान्यशब्दोऽपि कारणविशेषे शुक्रशोणितलक्षणे विवक्षित इति तन्निषेधेन कारणान्तरं लभ्यते । शुक्रशोणितमनपेक्ष्य कारणान्तरादुत्पन्नमयोनिजम् । केषां देवर्षीणां शरीरमिति । अयोनिजं तु शरीरं देवर्षीणां न त्वयोनिजमेव-योनिजत्वस्यापि श्रवणात् । अन्ये तु व्यभिचारनिषेधार्थमेकस्य देवपदस्य लोपेन समासं कुर्वते । देवाश्च देवर्षयश्च देवर्षयः तेषामिति । अत्र देवास्त्वष्टधा पिशाचादयः । तत्रापि कस्यचिद्योनिजत्वश्रवणेऽन्यद्विशेषणं न चिन्त्यम् । अथ केभ्यस्तच्छरीरं भवतीत्याह-धर्मविशेषसहितेभ्योऽणुभ्यो जायत इति । तथाहि-तच्छरीरोत्पत्तावणवः समवायिकारणं तत्संयोगश्चासमवायिकारणं धर्मविशेषो निमित्तकारणमिति कार्यैकार्थसमवायश्च द्रव्योत्पत्तौ संयोगस्येति । अथ देवर्षीणामयोनिजं शरीरमस्ति इति किं प्रमाणम् (?) अमागमः । तथाच—

अयोनिजशरीराणि भवन्त्यद्भुतकर्मणाम् ।
योनिजान्येव मौद्गल्य न मातृपितृजानि तु ॥

तथाहि-अद्भुतमुत्कृष्टं कर्म येषां ते तथोक्तास्तेषामुत्कृष्टकर्मवशादयोनिजानि शरीराणि भवन्ति । कारणमात्रनिषेधो मा भूदित्याह-योनिजानि कारणजान्येव । कथन्तर्हि तेषामयोनिजत्वमित्याह-न मातृपितृजानीति । पितृमातृशब्देन शोणितशुक्रयोरभिधानमुपचारेणेति । तथोत्कृष्टं कर्म द्वेधा-धर्मरूपमधर्मरूपञ्चेति । तत्र धर्मरूपाद्देवर्षीणामधर्मरूपाच्च क्षुद्रजन्तुयातनाशरीराणि । क्षुद्रजन्तवो यूकादयः । यातनाशरीराणि नारकीयशरीराणि, इति तान्यधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते । अथ देवर्षीणां शरीराणि धर्मविशेषादुपजातान्यप्यनुमानेन योनिजानीति प्रतीयन्ते । तथाहि-देवर्षिशरीराणि योनिजानि शरीरत्वादस्मदादिशरीरवदिति ।

एतच्चागमेन बाध्यमानत्वादप्रमाणमिति । तथानुमानेन चागमस्य बाधाद्देवर्षिशरीराणां सद्भावासिद्धेर्योनिजानुमानस्याश्रयासिद्ध-त्वादप्रमाणत्वप्रसङ्गः । न चानुमानस्यागमविषये तदुपघातेन प्रमा-णता सम्भवति । युक्तं चागमानुग्राहकत्वम् । तथाहि-देवर्षिशरी-राण्ययोनिजानि उत्कृष्टकर्मारब्धत्वात् शलभादिशरीरवत् । उत्कृष्टं कर्माधर्मरूपं शलभादिशरीरे देवर्षिशरीरे तु धर्मरूपमिति । विशेषे-ऽप्युत्कृष्टकर्मारब्धत्वमुभयत्राविशिष्टमिति न साधनहीनमुदाहरणम् । योनिजमाह-शुक्रशोणितसन्निपातजमिति । शुक्रशोणितयोस्सन्निपा-तात्सम्बन्धाज्जायत इति । शुक्रं पितुर्मातुः शोणितमिति तयोः स-न्निपातसमकालं भोक्तुः कर्मवशादन्तःकरणसम्बन्धः । शुक्र-शोणितयोः संयोगान्माञ्जताकारं द्रव्यमुत्पन्नं···तदनन्तमान्तरेण (?) तेजसा सम्बन्धाद्वेगापेक्षादवयवे क्रिया तदनन्तरं विभागात् द्रव्यार-म्भकसंयोगविनाशः पुनरन्यस्मादग्निसंयोगात्पूर्वरूपादयो व्यावर्तन्ते । अन्यस्माच्चापूर्वरूपाद्युत्पत्तिरेवमुत्पन्नपाकजेष्वणुष्वात्माणुसंयोगाद-दृष्टापेक्षा उत्पन्ना क्रिया विभागमारभते । तस्मात्पूर्वसंयोगव्यावृत्ता उत्तरसंयोगाद्व्यणुकोत्पत्तिरेवं द्व्यणुकैस्त्र्यणुकोत्पत्तिरित्यादिक्रमेण श-रीरोत्पत्तिरिति । पुनर्मात्रा भुक्तं पीतं तन्मात्रयावतार्यते ततः पुनरान्तरा । न च सम्बन्धादवयवे क्रिया । पुनर्विभागात् संयोग-विनाशस्ततो द्रव्यविनाशोऽन्यस्मादग्निसंयोगात्पूर्वरूपादिविनाशः अन्यस्माच्च रक्ताद्युत्पत्तिस्ततो द्व्यणुकादिप्रक्रमेण शरीरोत्पत्तिरिति न्यायः । शरीरस्य तल्लक्षणं द्रष्टव्यं यावद्भस्मीभाव इति । अन्यथा ह्याहारोपयोगस्याश्रयापचयाकारणत्वाद्वैयर्थ्यं स्यात् । न चार-ब्धशरीरा येऽवयवाः सहकारिप्राप्तौ शरीरान्तरमारभन्ते पुनस्स-हकार्यन्तरप्राप्तावन्यच्छरीरमिति वाच्यम् । आरभ्यारम्भकवाद-प्रसङ्गात् । अथेष्यते चैकं द्रव्यमारभ्य तस्मिन्नविनष्टे पुनर्द्रव्यान्त-रारम्भकत्वम् । न युक्तमेतत् सर्वस्यापि कार्यद्रव्यस्य परमाणुवृत्ति-त्वप्रसङ्गात् । तथाहि-परमाणुभ्यां द्व्यणुकमारब्धं तस्मिन्नविनष्टे ताभ्यामेवान्यपरमाणुसहिताभ्यामन्यदारब्धम्-पुनरन्यपरमाणुस-हितैरन्यदारभ्यत इति मूर्तानां समानदेशताप्रसङ्गः । तथाहि-परमाणुभ्यामारब्धं परमाण्वोर्वर्तते पुनरन्यसहि-ताभ्यामारब्धं तयोस्तस्मिंश्चेति मूर्तानामेकदेशत्वं स्यात् ।

तेषान्तु परस्परव्यतिरिक्ताधारसमवायित्वं दृष्टम् । यत्र ह्येकमूर्तं समवेतं न तत्रान्यत् समवैति । अथैकदेशतापरिहारार्थं परमाणुभ्यामन्यसहकारिभ्यामारब्धमेकस्मिन्नेव परमाणौ वर्तते, पुनरन्यसहितैरन्तरारब्धमेकस्मिन्नेवेत्युच्यते । एवमप्येकस्मिन् द्रव्ये वर्तमानं कार्यद्रव्यं कारणविभागाभावादविनाशि स्यात् । तथा अद्रव्यं द्रव्यमनेकद्रव्यम् च द्रव्यमिति वचनव्याघातः । तथाहि—न विद्यते जन्यं जनकञ्च द्रव्यमित्यद्रव्यम् । परमाणूनां जनकं नास्त्याकाशादीनां जन्यं नापि जनकमित्यद्रव्यम्, नित्यद्रव्यमिति यावत् । अनेकद्रव्यं त्वनेकद्रव्यं जनकमस्येत्यनेन स्वरूपेण द्विविधमेवं द्रव्यमद्रव्यं नित्यमनेकद्रव्यजन्यं कार्यमिति । एकद्रव्यस्य च कार्यद्रव्यस्याभ्युपगमे व्याहतमेतद्वचनमिति । न चैतस्य क्रमयौगपद्याभ्यामारम्भकत्वं न्याय्यमेकस्वरूपतया यावत्कर्तव्यं तावदेकस्मिन्काले कुर्यात् । अशेषकार्योत्पत्तौ समर्थस्यान्यानपेक्षितत्वादिति । युगपदशेषकार्यं कृत्वा पुनरकरणे हेतुर्नास्तीति । अथ पूर्वमारब्धं कार्यद्रव्यमवेक्ष्यारभन्ते, तर्हि पूर्वस्यारब्धकार्यस्यापि समवायित्वं कथं एकस्मिन्नेव द्रव्ये वर्तते । पूर्वस्मिन् स्ववृत्तावनेकं दूषणमभ्यूह्यम्—समानासमानजातीययोरारम्भकत्वासम्भवादित्यादि । तथा सर्वस्यापि कार्यद्रव्यस्य परमाणुवृत्तितायामिह तन्तुषु पट इह वीरणेषु कट इत्यादिप्रयोगो न स्यात्—तन्त्वादेरसमवायित्वाभावादिति । कार्यद्रव्यस्य च विनाशे चान्तरकार्यस्यानुत्पन्नत्वादुपलम्भाभावः । अथ परमाणुभिः पूर्वपूर्वस्य कार्याविनाशे सत्युत्तरोत्तरकार्यारम्भादनेकं कार्यद्रव्यमित्यन्त्यस्य विनाशे पूर्वपूर्वस्यावस्थानादनेककार्योपलम्भ इति चेत् । नन्वेवं तर्हि कपालसंयोगविनाशेऽपि घटस्याविनाशप्रसङ्गः । तदवयवतदवयवसंयोगविनाशे च तदवयवावयवानां तेषां समवायित्वाभावेन तत्संयोगस्यासमवायित्वाभावादिति । समवायिकारणविनाशेनासमवायिकारणविनाशेन वा द्रव्यस्य विनाशदर्शनात् । अथ परमाणावुत्पन्ना क्रिया संयोगविनाशद्वारेण द्रव्यविनाशिकेष्यते । तत्र यद्याद्यद्रव्यारम्भके परमाणावुत्पन्ना क्रिया विभागात् संयोगविनाशे सति द्रव्यं विनाशयेत्, तर्हि पूर्वपूर्वसंयोगस्योत्तरोत्तरसंयोगसहकारितयाऽशेषकार्योत्पत्तावसमवायिकारणत्वाभ्युपगमात् तद्विनाशेऽवश्यं सकलकार्यविनाश इति न किञ्चित् कार्यमुपलभ्येत । अथान्त्यपरमाणुसंयोगस्य पूर्व-

पूर्वपरमाणुसंयोगोपचितस्यैककार्यारम्भत्वावसमवायिकारणत्वमिति तद्विनाशे तदारब्धस्यैव विनाशादवान्तरकार्यस्योपलम्भ एवेति चेत्। नन्वेवमपि परमाणुसंयोगस्य विनाशादुपजातो घटादिनाशोऽस्मदादेरतीन्द्रियः स्यात्। यथा ह्यापाकनिक्षिप्तेषु घटेष्वग्निसंयोगाद्विनाशः परमाणुक्रियाद्वारेणेति। प्रत्यक्षश्च कपालसंयोगविनाशात् घटस्य विनाशः तेन ज्ञायते कपालानां समवायित्वमित्यलं विस्तरेण।

अतः शरीरे प्रतिक्षणमाहारोपयोगानुपयोगे सत्युपचयापचयप्रपञ्चदर्शनात् पूर्वद्रव्यानिमित्तादुत्पन्नपाकजैर्द्व्यणुकादिप्रक्रमेण चोत्पत्तिर्वाच्येति। यथा च परमाणुषु पाको द्व्यणुकादिप्रक्रमेण चोत्पत्तिस्तथा वक्ष्यामः पाकजोत्पत्ताविति।

इदानीं शुक्रशोणितसन्निपातजस्याप्यवान्तरवैधर्म्यमाह-तद्द्विविधं जरायुजमण्डजञ्चेति। तथाहि-शरीरं गर्भे प्रतिक्षणं पाकजोत्पत्तिन्यायेनोत्पद्यमानं निष्क्रमणकाले जरायुना वेष्टितत्वाज्जरायुजम्। अण्डजं मातृशरीरान्निःसृतमपि किञ्चित्कालमण्डोदरे पाकजोत्पत्तिन्यायेनावेष्टितमुत्पद्यत इत्यण्डजम्। केषां जरायुजमित्याह-मानुषपशुमृगाणाञ्चेति। मानुषाश्च पशवश्च मृगाश्चेति। पशुशब्देन संगृहीतानामपि मृगशब्देन भिधानमरण्यजत्वादिति। अन्ये त्वेकस्य मानुषशब्दस्य लोपेन समासं कुर्वन्ति-मानुषाश्च मानुषपशवश्च मृगाश्चेति। अत्र मानुषशब्देनाभिहितानां पशुशब्देनाभिधानेन तदेव दूषणमिति प्रयोजनञ्चिन्त्यम्। तथा मृगशब्देन सर्वपशूनामभिधानासम्भवादव्याप्तिरिति। अण्डजं केषामित्याह पक्षिसरीसृपाणामिति। पक्षिणश्च सरीसृपाश्चेति पक्षिसरीसृपाः तेषामिति। सरीसृपाः कुटिलं सर्पन्तीति सर्पादयो रूढिवशाच्चेति। शरीरस्य शरीरात्समानजातीयाच्च वैधर्म्यमभिधायेन्द्रियस्य वैधर्म्यनिरूपणार्थमाह-इन्द्रियं गन्धव्यञ्जकमिति। तथा इन्द्रियाणां नानात्वात्तेषामपि सामान्यलक्षणमर्थाल्लभ्यत एव करणत्वादतीन्द्रियत्वद्रव्यत्वनियताधिष्ठानवृत्तित्वे सत्यपरोक्षज्ञानजनकत्वादिति। अपरोक्षज्ञानजनकत्वं कर्तुरात्मनः संभवतीति तन्निरासाय करणत्वग्रहणम्। अतीन्द्रियस्य प्रदीपादेः करणत्वे सत्यपरोक्षज्ञानजनकत्वं दृष्टमिति तन्निराकरणार्थमतीन्द्रियपदम्। तथेन्द्रियार्थसन्निकर्षः करणत्वातीन्द्रियत्वे सत्यपरोक्षज्ञानजनक इति द्रव्यपदम्। तथा दिक्कालयोः

सर्वोत्पत्तिमतां निमित्तत्वात् करणत्वातीन्द्रियत्वद्रव्यत्वे सत्यपरो-
क्षजनकत्वमस्तीति नियताधिष्ठानवृत्तित्वपदम्। दिक्कालयोस्तु व्या-
पकत्वेन सकलकार्यजनकत्वेन नियताधिष्ठानासम्भवात्। अथात्मा-
पि व्यापकत्वादनेन विशेषणेन व्यवच्छिन्न इति व्यर्थं कारणत्वपदम्।
न, व्यापकस्यापि भोक्तृत्वेन शरीराधिष्ठानत्वात्। अतः इन्द्रियमि-
तरस्माद्भिद्यते करणत्वातीन्द्रियत्वद्रव्यत्वनियताधिष्ठानवृत्तित्वे स-
त्यपरोक्षज्ञानजनकत्वात्। यस्तु न भिद्यते न चासावुक्तसाधनो यथा
शरीरादिरिति। सामान्यलक्षणलक्षितस्य समानजातीयाद्भेदमाह—
इन्द्रियं घ्राणम् इन्द्रियसामान्यलक्षणलक्षितत्वे सति गन्धव्यञ्जक-
त्वादितरेभ्यो भिद्यते। तथेन्द्रियं गन्धव्यञ्जकमिति कार्येण सद्भा-
वं दर्शयति। तथाहि—गन्धोपलब्धिः करणकार्या क्रियात्वात्, या
या क्रिया सा सा करणकार्या दृष्टा यथा छिदिक्रिया, तथा चेयं
क्रिया, तस्मात् करणकार्येति। यच्च गन्धोपलब्धिसम्पादकं कर-
णं तत् घ्राणं तच्च पार्थिवम् रूपरसगन्धस्पर्शेषु मध्ये नियमेन
गन्धव्यञ्जकत्वात्। यद्रूपादिषु मध्ये नियमेन गन्धव्यञ्जकं तत्पा-
र्थिवं दृष्टं यथा कस्तूरिकादिद्रव्यम्। तथा च घ्राणं रूपादिषु म-
ध्ये नियमेन गन्धप्रकाशकं तस्मात्पार्थिवमिति। ननु नियमेन गन्ध-
व्यञ्जकत्वमसिद्धम् गन्धत्वगुणत्वसत्तादेरपि व्यञ्जकत्वादित्यतो
रूपरसगन्धस्पर्शेषु मध्यत इति विशेषणम्। अथ पार्थिवत्वाविशे-
षात् घ्राणं गन्धस्यैव रूपादिप्रकाशकमपि स्यात् रूपादेरपि पार्थिव-
गुणत्वात्, संयुक्तसमवायस्य च सम्बन्धस्याविशेषादन्यस्य च वि-
शेषहेतोरभावात् इत्यत आह—जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं
घ्राणमतो गन्धस्यैव प्रकाशकमिति। कथमेतत् ज्ञायते? किञ्चिज्जला-
दिनाऽसम्पृक्तैरनभिभूतैः पार्थिवावयवैरारम्भो घ्राणस्येति कार्यनिय-
मात्। तथा घ्राणस्य व्यापारात् गन्धस्यैवोपलम्भो न रूपादेरि-
ति दृष्टम्। न च कारणनियमं विना कार्यनियमः सम्भवतीति कि-
ञ्चिज्जलाद्यसम्पृक्तैरित्यादौ ज्ञायते चादृष्टविशेषात् गन्धोपलब्धेस्स-
म्पादकादन्यथा हि घ्राणव्यापारात् गन्धस्यैवोपलब्धिर्न भवेत्।
सा च दृष्टा। अतो ज्ञायतेऽन्यस्य कारणत्वासम्भवात् विशिष्टोत्पा-
दे निमित्तम्। स चादृष्टवशाददृष्टस्य च व्यवस्थाकारणत्वादिति।
अभिप्रेतं चैतत् सूत्रकर्तुरिति—"भूयस्त्वात् गन्धवत्त्वाच्च गन्धज्ञाने

प्रकृतिः" पृथिवीति वचनात्। गन्धो ज्ञायते अनेनेति गन्धज्ञानं घ्राणं तस्मिन्नुत्पाद्ये प्रकृतिः कारणम् पृथिवी भूयस्त्वान्निमित्तादिति। यथा भूयसां पार्थिवावयवानां गन्धोपलब्धिसम्पादकादृष्टविशेषोपगृहीतानां जलादिना चातिरस्कृतवपुषां घ्राणजनकत्वम् नियमेन गन्धोपलब्धेर्ज्ञायते, भूयसां च पार्थिवावयवानां कारणत्वाभिधानाद्लघीयसानामपि जलाद्यवयवानामकारणत्वं लब्धम्। अत एव तेषां पार्थिवावयवानभिभावकत्वम्। तथा न परं विशिष्टादृष्टोपग्रहे सतीषज्जलावयवादिसम्पृक्तैरारम्भात् गन्धस्यैव प्रकाशकत्वं गन्धवत्त्वाच्चेति। पार्थिवत्वात् घ्राणस्य रूपादिमत्त्वमपि सम्भवतीति गन्धवत्त्वं उत्कर्षो विवक्षितः स्वगतगन्धोत्कर्षाच्च रूपादिषु च मध्ये संयुक्तसमवायाविशेषेपि गन्धस्यैव प्रकाशकमिति।

यदि वा काचिदेव पृथिवी गन्धोपलब्धेः कारणम् न सर्वेति विशेषहेतुर्नास्तीत्युक्ते वाक्यम् सम्बद्ध्यते भूयस्त्वात् गन्धवत्त्वाच्च गन्धज्ञाने प्रकृतिरिति। गन्धे ज्ञप्तिः ज्ञानं गन्धविषयकज्ञानन्तस्मिन्प्रकृतिः कारणम् पृथिवी भूयस्त्वाद्युक्तात् गन्धवत्त्वाच्चेति। अन्यो वार्थः—गन्धवत्त्वान्नियमेन गन्धोपलब्धेः कारणं विशेषहेतुर्नास्तीत्युक्ते वाक्यं सम्बद्ध्यम् घ्राणं तच्च गन्धवत् पार्थिवत्वाविशेषात्। घ्राणं कुत इत्याह भूयस्त्वादुक्तरूपादिति। अन्ये तु जलाद्यसम्पृक्तैः शुद्धैः पार्थिवावयवैरारम्भो विशिष्टादृष्टापेक्षैः भूयस्त्वमिति मन्यन्ते। तथा च भाष्यम्—जलाद्यनभिभूतैरसम्पृक्तैः केवलैः पार्थिवावयवैरारब्धं घ्राणमिति। अत्र चेषज्जलादिसम्पर्केप्यनभिभवस्य सम्भवादसंपृक्तैरिति विशेषणं न बुध्यामहे। न च भूयसां भावो भूयस्त्वमित्युक्तोऽन्येषामत्यन्तासम्भव उपलभ्यत इत्यलम्।

इन्द्रियं सर्वप्राणिनां गन्धव्यञ्जकमिति सामान्यविशेषात्मतयाभिधाय विषयस्वरूपनिरूपणार्थमाह विषयस्तु द्व्यणुकादिप्रक्रमेणारब्ध इति। ननु द्व्यणुकादिप्रक्रमेणारम्भः शरीरस्येन्द्रियस्य चास्तीत्यतिव्याप्तीदं विषयलक्षणमिति। नैतदेवम्। शरीरेन्द्रिययोर्लक्षणाभिधानेन विषयाद्भेदसिद्धौ तदन्यत्वे सतीति विशेषणलाभात्। तथाहि—शरीरेन्द्रियान्यत्वे सति द्व्यणुकादिप्रक्रमेणारब्धत्वाद्विषयस्तस्य हि विषयभावोपकारकत्वात्। विषयस्तूपभोग्य इन्द्रियग्राह्यो वाऽस्मदादेः। अथ त्र्यणुकं द्व्यणुकादिप्रक्रमेणोत्पन्नं शरीरेन्द्रि-

यान्यत्वे सत्यस्मदादीन्द्रियग्राह्यञ्च न भवति अव्यापीदं विषय-लक्षणमिति । द्व्यणुकादिप्रक्रमेणारब्ध इति विशेषणेन व्यवच्छेदात् । तथाहि–द्व्यणुकमादिर्यस्य प्रक्रमस्येत्यादिग्रहणम् । त्र्यणुकस्याप्यव-रोध इति । असौ द्व्यणुकादिः स चासौ प्रक्रमश्चेति तेनारब्धो विष-यः द्व्यणुकत्र्यणुकादिप्रक्रमेणारब्ध इति यावत् । त्र्यणुकं तु द्व्यणु-णुकैरारब्धं द्व्यणुकादिप्रक्रमेणेति । त्र्यणुकानां त्वनियमेनारम्भ-कत्वं द्वयोर्बहूनाञ्चेति तदारब्धस्येन्द्रियविषयता सम्भाव्यत इति । विषयस्य च सामान्यलक्षणलक्षितस्याप्यवान्तरभेदेनानन्त्यात् सङ्ग्रहमाह त्रिविधः । केन रूपेण ? मृत्पाषाणस्थावरलक्षण इति । मृच्च पाषाणश्च स्थावराश्चेति लक्षणं स्वभावो यस्यासौ तथोक्तः । स्वभावस्तु मृदि मृत्त्वं पाषाणेषु पाषाणत्वमिति । ननु मृदादिभेदेन त्रैविध्यमनुपपन्नमिष्टकादेर्विषयस्यासङ्ग्रहादित्याशंक्याह तत्र प्रा-काराश्चेष्टकाश्च तदादयो घटादयस्ते च मृद्विकारा इति मृच्छब्देन संगृहीताः । विकारस्तु विशिष्टवचनापन्नाया मृदोऽग्निसम्बन्धात्प-रमाणुक्रियाद्वारेण पूर्वद्रव्यविनाशे श्यामादिनिवृत्तावुत्पन्नपाकजैरा-रम्भादित्युच्यन्ते । तैरुत्पन्नपाकजैरारब्धेऽपि मृत्त्वं सामान्यं न नि-वर्तते इति मृच्छब्देनाभिधीयन्ते इति । पाषाणत्वसामान्ययोगिनो दर्शयति पाषाणादुपलमणिवज्रादय इति । तेषां च स्वरूपं तच्छा-स्त्रप्रसिद्धलोकव्यवहारतोऽवगन्तव्यम् । स्थावरत्वजातिसम्बन्धि-नो दर्शयति स्थावरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतय इति । तृणमुभयवादिप्रसिद्धम् । ओषधयः–फलपाकान्ता धान्यादयः । वृ-क्षाश्च वृक्षत्वजातिसम्बन्धिनोऽशोकादयः । एवं गुल्मलतावतानादि-विशेषाऽवगन्तव्यः । तदुक्तम्—

ओषध्यः फलपाकान्ता लतागुल्माश्च वीरुधः ।
फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः ॥ इति ॥

इति द्रव्यग्रन्थे पृथिवीनिरूपणम् ।

(भा०) अप्त्वाभिसम्बन्धादापः । रूपरसस्पर्शद्रवत्वस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वसंस्कारवत्यश्च । एते च पूर्ववत्सिद्धाः । शुक्लमधुरशीता एव रूपरसस्पर्शाः । स्नेहोम्भस्येव सांसिद्धिकं द्रवत्वञ्च । तास्तु पूर्ववद् द्विविधाः-नित्यानित्यभावात् । कार्यं पुनस्त्रिविधम्-शरीरेन्द्रियविषयसंज्ञकम् । शरीरमयोनिजमेव वरुणलोके पार्थिवावयवोपष्टम्भादुपभोगसमर्थम् । इन्द्रियं सर्वप्राणिनां रसोपलम्भकमन्यावयवानभिभूतैर्जलावयवैरारब्धं रसनम् । विषयस्तु सरित्समुद्रहिमकरकादिरिति ॥

(सू०) अप्त्वेति । अप्त्वं-जलत्वम्, तस्याभिमतसम्बन्धात्-समवायादापः पक्षीभूता इति शेषः । जलत्वन्तु त्रुटिपर्यन्तं स्फुटतरप्रत्यक्षसिद्धम्, जलत्रुटेर्महाजलत्वेन जलोपादेयजलसमवेतत्वानुमानाच्च परमाणुद्व्यणुकयोस्तत्सिद्धिरिति वदन्ति ।

एते-रूपादयः, पूर्ववत्-पृथिवीवत्, सिद्धा-मुनिसंमतिसिद्धास्तथा च 'रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च' (अ०२ आ० १ सू० २) इति सूत्रबलादेव जलस्य रूपादिविशेषगुणवत्त्वम्, रूपिषु चाक्षुषवचनात् सप्त संख्यादयः, पतनोपदेशाद् गुरुत्वम्, उत्तरकर्मवचनात् संस्कार इति । रूपरसस्पर्शानां प्रत्येकवत्त्वस्य घटादौ व्यभिचारेण जलेतरभेदकत्वासंभवादाह शुक्लमधुरशीता एव रूपरसस्पर्शा इति । शीता (स्पर्शा) इत्यत्र गुणवाचिनोपि शीतशब्दस्य न क्लीबता किन्तु पुंस्त्वमेव पुलिङ्गस्य स्पर्शशब्दस्य विशेषणत्वात् । शुक्लं रूपमित्यत्र शुक्लपदस्य क्लीबत्ववदिति ध्येयम् । यद्यपि शुक्लमात्ररूपवत्त्वं स्फटिकादौ व्यभिचारान्न जलेतरभेदकम्, तथापि शुक्लेतररूपासमानाधिकरणभास्वररूपव-

दवृत्तिद्रव्यविभाजकधर्मवत्त्वे स्नेहानाधिकरणावृत्तिशुक्लरूपवत्त्वे वा तात्पर्यम् । मधुरमात्ररसवत्त्वमपि मधुरान्यरसवदवृत्तिमधुररसवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वं वाच्यम्, नातः शर्करादावतिप्रसङ्गः । शीतमात्रस्पर्शवत्त्वं च शीतत्वशून्यस्पर्शवदवृत्तिस्पर्शवत्त्वपर्यवसितं ग्राह्यम् , नातः शीतत्वस्यैव व्याप्यतावच्छेदकत्वसम्भवाद्व्यर्थविशेषणत्वावकाशः ।

ननु स्नेहः क्षीरघृततैलादावतिप्रसक्तत्वात् कुतो जलस्य वै(सा)धर्म्यमत आह स्नेहोऽम्भस्येवेति। घृतादौ स्निग्धत्वप्रतीतेस्तदुपष्टम्भकजलस्नेहोपाधिकत्वादिति भावः । ननु द्रवत्वं घृतादिसाधारणत्वात् कुतो जलस्य लक्षणमत आह सांसिद्धिकञ्चेति । सांसिद्धिकत्वं पाकाप्रयोज्यद्रवत्वगतो जातिविशेषः शैत्यसमानाधिकरणत्वम् । अत्रापि संख्यादयः स्नेहवैशिष्ट्य एव जलेतरभेदकाः बोध्याः, संख्यादिमात्रस्य पृथिव्यादावतिप्रसक्तत्वाभिन्नधर्मिकत्वाच्च न व्यर्थत्वशंकापि ।

तास्त्विति । ता आपोपि पूर्ववत् पृथिवीवत् नित्यानित्यभेदेन द्विविधा इत्यर्थः । कार्यमित्यस्य अपामित्यादिः । नन्वाप्यशरीरस्य योनिजत्वे पृथिवीत्वव्याप्तौ जलत्वव्यावृत्तिरेव विरुद्धजात्योरेकत्र सत्त्वायोगादत आह शरीरमप्ययोनिजमेवेति । अथ जलीयमपि शरीरं यद्यस्ति तत् कुतो नानुभूयत इत्यत आह वरुणलोक इति । तथाच विप्रकृष्टत्वान्न तस्यानुभवः । जलत्वं शरीरसमवायिवृत्ति द्रव्यारम्भकनित्यवृत्तिजातित्वात् पृथिवीत्ववत् इत्यनुमानं च तादृशशरीरे मानमिति भावः । नन्वाप्यदेहस्य पृथिव्यनारभ्यत्वे धारणाकर्षणानुपपत्तौ कथमुपभोगः सम्पद्यतामत आह पार्थिवेति । पार्थिवभागानामुपष्टम्भकाख्यसंयोगसत्त्वादाप्यशरीरमपि भोगायतनमित्यर्थः । तथाच तत्र विजातीयानां सम-

वायित्वमेव नाभ्युपेयते न तु कारणान्तरत्वमपीति भावः। आप्यमिन्द्रियमाहेन्द्रियमिति। सर्वप्राणिनां—सर्वजातीयप्राणिनां रसोपलम्भकमिन्द्रियं जलावयवैरारब्धं रसनं रसनसंज्ञकमित्यन्वयः। पित्तोपहतजिह्वानां रसग्राहकेन्द्रियसत्त्वे प्रमाणाभावमावेदयितुं विजातीयानभिभूतैरित्युक्तम्। पित्ताद्यनभिभूतैरिति तदर्थः। अत्र घ्राणस्य पृथिवीत्व इव रसनस्य जलत्वे प्रागुक्तमेव प्रमाणमनुसन्धेयम्। करकादिरित्यादिना कूपाद्युपग्रहः। न च करकाया जलत्वे द्रवत्वापत्तिः तदारम्भकपरमाणौ सदैव द्रवत्वसत्वादिति वाच्यम्। तादात्म्येन करकाया एव समवायेन द्रवत्वं प्रति विरोधित्वात्। अदृष्टविशेषः करकायां द्रवत्वोत्पादप्रतिबन्धक इत्यपि कश्चित्॥

इति जलम्॥

(से०) पृथिवीनिरूपणानन्तरं प्रतिबन्धकजिज्ञासापगमे सत्यवसरलक्षणया सङ्गत्या जलनिरूपणम्। उद्देशक्रमलक्षणानन्तरं जललक्षणेऽवसरः तस्योद्देशानन्तरमुद्देशेऽपि सम्भवात्। अप्त्वेति। अनित्यस्नेहत्वेन जन्यतायां जनकतावच्छेदकत्वेन जन्यजलत्वसिद्धौ घटकत्वेन जलत्वसिद्धिः द्वितीयक्षणजन्मनि स्नेहादौ प्रथमक्षणे सतः करणतावच्छेदकत्वेन जातिभिन्नस्य तस्यासम्भवात्। स्नेहात्यन्ताभावानधिकरणत्वस्य शीतात्यन्ताभावानधिकरणत्वादिना विनिगमनाविरहेण गौरवेण चानवच्छेदकत्वात्। ननु स्नेहं प्रति स्नेहात्यन्ताभावानधिकरणत्वेन शीतादि प्रति तत्तदत्यन्ताभावानधिकरणत्वेन जनकतेति चेन्न। एतावज्जनकतावच्छेदककल्पने गौरवात्। विनिगमनाविरहाच्च क्वचित्स्नेहात्यन्ताभावः क्वचिच्छैत्यत्राधिकरणस्वभावस्यैव प्रयोजकत्वे तस्य वक्तुमशक्यत्वात्। जलमित्यनुगताकारप्रत्ययादपि जलत्वसिद्धिः। स्नेहात्यन्ताभावानधिकरणत्वादिना तत्प्रत्ययस्य स्नेहतदत्यन्ताभावाद्युपस्थितिसापेक्षत्वेन विलम्बितत्वात्

स्नेहादिना तत्समर्थने प्रथमक्षणे जलं जलं न स्यादेव स्नेहात्यन्ताभावानधिकरणत्वादिना तुल्यतुलाधिरूपाणां लाघवगौरवयोरभावेन नैकस्य प्रवृत्तिनिमित्तत्वं नानेकस्य नानार्थत्वापत्तेरिति जलत्वं जातिरेव तथेति संक्षेपः ।

अभिसम्बन्धो—अभिमतसम्बन्धः समवायलक्षणः । तेनैकार्थसमवायादिवारणम् । आपः इतरेभ्यो भिद्यन्त इति शेषः । चतुर्दशगुणान्वर्णयति रूपेति ।

पूर्ववदिति । रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धा इति सूत्रात् रूपादयः सिद्धाः । चाक्षुषवचनपतनोपदेशोत्तरकर्मवचनैस्संख्यादय इति । पृथिव्यामिवात्रापि सूत्रमेव मानमित्यर्थः । रूपस्पर्शयोः प्रयोजकयोरभावे प्रत्यक्षत्वानुपपत्तिः रसाभावे रसनेन्द्रियस्याप्यस्य नीरसत्वे असाधारणरसव्यञ्जकत्वानुपपत्तिः । रूपादिष्वेकासाधारणव्यंजकस्य तद्वत्त्वनियमात् । स्नेहसांसिद्धिकद्रवत्वयोरभावे नत्प्रत्यक्षस्य भ्रमत्वे तदाश्रयधर्मान्तरकल्पनापत्तिः । संख्यादौ तु पृथिव्याम् इव युक्तयोऽनुसन्धेया इति भावः । रूपरसस्पर्शानां येन रूपेणासाधारण्यं तदाह शुक्लेति ।

यद्यपि पृथिव्यामपि कस्यांचिच्छुक्लं तथापि न पाकाप्रयोज्यम् । तेजसि तथात्वेऽपि नाभास्वरम् । एवं चापाकजाभास्वररूपवत्त्वं शुक्लेतररूपासमानाधिकरणाभास्वररूपवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वं वा स्वाभाविकलक्षणम्, शुक्लमेव रूपमिति वदतो भाष्यकृतोपि द्वितीयलक्षणे तात्पर्यसत्त्वात् । अपाकजरसवत्त्वं मधुरेतररससमानाधिकरणद्रव्यविभाजकोपाधिमत्त्वं वा लक्षणम् । शीतस्पर्शस्तु स्वरूपेणैव लक्षणमित्यर्थः । क्वचित् शीतस्पर्शानुपलब्धिस्त्वातपादिस्पर्शेनाभिभवात् जलरूपस्य पाकजत्वेऽग्निसंयोगेन घटादाविव वैजात्यन्न्यूनाधिकभावो वा भवेत्, एवं रसस्यापि पाकदशायाम् । अपाकदशायां च क्वचिज्जले शुक्लेतरमधुरेतररूपरसोपलम्भस्तु पार्थिवद्रव्यौपाधिकः, एवं जलीययो रूपरसयोर्जलीयतदुभयावधिकोत्कर्षापकर्षप्रतीतिरप्यौपाधिकयेव तदीययो रूपरसयोरेकाकारत्वादिति निधेयम् ।

स्नेह इति । तत्र केचित्—. स्नेहो न जलधर्मः तैलादिवदनुपलब्धेः, नापि पृथिवीविशेषगुणो घटाद्यवृत्तित्वात् किन्तु घृतादिवृत्तिः

पृथिवीत्वव्याप्यो जातिविशेष एवासौ। स च क्षीरत्वादिवद्द्रव-यवावयविवृत्तिजातिरित्याहुः।

अत्राचार्याः। न तावत् परमाणावपि जातिरूपः स्नेहः तस्यापा-कपाततस्य स्नेहदशावर्तिनो रूपादेर्नाशे सति व्यञ्जकापगमेन व्यक्तिसत्त्वेऽपि जात्यपगमप्रसङ्गः। न चैतदुचितम्। न च रूपादिनाशेऽपि तद्योग्यताया व्यञ्जिकायास्सत्त्वान्न स्नेहापगम इति वाच्यम्। तद्योग्यतायाः पार्थिवपरमाणुमात्रे सत्त्वेन सर्वत्र सिद्धत्वापत्तौ सर्वपृथिव्यां पृथिवीत्ववत् स्निग्धत्वापत्तेः। न च परमाणौ स्निग्धत्वं नास्त्येव, किन्तु क्षीरत्ववद्द्व्यणुकारम्भकपरमा-णौ यथा तथा पाकजरूपादयः तद्विशिष्टैः क्षीरारम्भस्तथा स्निग्ध-द्व्यणुकारम्भकपरमाणुषु तदभावात्. विद्यमानानां रूपादीनां घृत-द्व्यणुकादिप्रयोजकत्वेन स्निग्धद्व्यणुकाप्रयोजकत्वात्। न हि घृततै-लवसापरमाणुसमानशीलं पाकजं रूपादि, येन तदारब्धेषु द्व्यणुकेषु स्नेह एकः स्यात्. किञ्च विसदृशरूपवद्भिः परमाणुभिर्विसदृशानि वसादीन्यारभ्यन्ते, एवं च वसाद्यारम्भप्रयोजकरूपादिसत्त्वात् भवतु परमाणुभिः वसाद्यारम्भः स्नेहवदारंभस्तु कथंचन घृतादिप्रयोजका-न्येव तत्प्रयोजकानि घृततैलवसापरमाणूनां परस्परं विजातीयरू-पवत्त्वात्।

ननु जातौ न व्यंजकनियमः सुखादौ तदभावेऽपि सुखत्वादिजाति-स्वीकारात्, तथा च परमाण्वादौ (?) परमाणौ पृथिवीत्वव्याप्यजा-त्यभावनियमस्य प्रामाणिकत्वे द्व्यणुकादौ वा स्नेहः कथास्यति। ननु प्रथमपक्षे तेषां परमाणूनां नियमतः स्निग्धारम्भकत्वे घृतभस्मन्यपि स्नेहः स्यात् घृतारम्भकाणामिव परमाणूनां 'यद्द्रव्यमित्यादिनयेन भ-स्मारम्भकत्वात् परमाणुवर्तिजातेः कार्ये वृत्तिनियमात्, तथा च द्वि-तीयस्य मते सोऽपि न कार्यमात्रवृत्तिजातेरणुगतकारणप्रयोज्यनियमात्, रजःपरमाणुसमानशीलैः परमाणुभिः स्निग्धारंभानुपपत्तेश्चेति चेन्न। कपालगताया जातेः घट इव तन्तुगतायाः पट इव च परमाणुगता-याः स्नेहत्वजातेरपि घृतभस्मन्यसत्त्वेऽविरोधात्। यथोद्भूतरूपाद्-व्यञ्जनतेजसस्तप्ततैलादावनुद्भूतरूपादपि तप्ततैलतेजस उद्भूत-रूपतेजस्तथाऽदृष्टवैचित्र्यात् स्निग्धादप्यस्निग्धादपि वा स्निग्धमस्तु। यथा वा तन्तोरतन्तुः पटस्तथा स्निग्धादस्निग्धं भस्म यथा वाऽपटात्-

ण्वोः पटास्तथाऽस्निग्धपरमाणोः स्निग्धारम्भः स्यात् अक्षीरात्पर-
माणोः क्षीरारम्भः स्फुट एव, तत्र रूपादिविशेषस्येवात्रादृष्टविशेष-
स्य प्रयोजकत्वात्। तथा च स्नेहो जातिरेवेति चेत्।

स्निग्धतरादिप्रतीत्योत्कर्षापकर्षवत्त्वेन तयोर्गुणकर्मैकनियतत्वेन
जातिरूपतया जातावसम्भावितत्वेन च स्नेहस्याजातित्वात्। तस्मा-
द्गुण एव स्नेहः विशेषगुणलक्षणसत्त्वात् विशेषगुणश्च, न च घृ-
तादावेव स्नेहः जलात्सङ्ग्रहाभावप्रसङ्गात् स्त्यानैर्घृतादिभिर्द्रुतैः का-
चादिभिर्गोधूमादिचूर्णसंग्रहाभावेन तस्योभयकारित्वात्। संग्रहश्च
धारणाकर्षणहेतुस्संयोगविशेषः न च घृतादावपि सः संयुक्तसमवा-
येन जलगतस्यैव तत्र प्रतीतेः सम्भवात् शैत्यानुरोधेन तत्र जलोपष्टं-
भकताया आवश्यकत्वात्। स्नेहस्योत्कर्षापकर्षवत्तया घृतादावुत्कृ-
ष्टस्नेह उपलभ्यते परत्र त्वपकृष्ट इति को विरोधः? तैले सांसिद्धिक-
द्रवत्वानुरोधेन जलभागस्यावश्यकतया तत्स्नेहेनैव प्रतीत्युपपत्तौ स्ने-
हकल्पनायां मानाभावात्। तैले जलभागसत्त्वेऽपि न दहनप्राति-
कूल्यमुत्कर्षविशेषस्नेहवत्त्वात् पार्थिवभागस्य वा तथैव स्वभावो
यथा तदुपष्टंभकं न प्रतिबध्नातीति। तस्मात्स्नेहत्वेनैव जलसाधार-
णविशेषगुण इति सिद्धम्। तैलादौ तु स्नेहात्म्यकल्पनात् इन्धनस्य
पार्थिवभागस्यैव वोपष्टभ्यस्य तथा महिमा यथोपष्टंभकेन प्रथमा
न भौमानलारंभप्रतिबंध इति कल्पनादित्युक्तमेव। यत्तु यथा जाठरो
जातवेदा उभयधर्मः तथा तैलादिप्रक्षेपस्थले भौमोऽपीति तत्रोपष्ट-
भ्योपष्टंभकयोः पार्थिवाप्ययोर्द्वयोरपि इन्धनत्वमेवेति। तन्न। भौमत्व-
व्यवहारात् पार्थिवमात्रेन्धनस्य तेजसो भौमत्वात्।

द्रवत्वं सांसिद्धिकद्रवत्वेन रूपेण जलस्यासाधारणमित्याह सां-
सिद्धिकमिति। तैलस्य भौमानलेन्धनत्वेन क्षीरस्य पिण्डीभावेन
पार्थिवत्वेऽवधारिते प्रतीयमानं सांसिद्धिकं द्रवत्वमम्भस इति भाव-
नीयम्। करकायामपि सांसिद्धिकमेव द्रवत्वं भौमोष्माभावसहकृ-
तेनादृष्टेन तु तत्र विलयनप्रतिबन्धो भौमोष्माणं निवर्णानां तु विशि-
ष्टाभावेन भवति जलान्तरावैशिष्ट्यं न तु तेजःसंयोगस्तत्र समवा-
यिकारणं येन नैमित्तिकत्वं स्यात् इति भावः। यत्तूपष्टम्भकपार्थिव-
भागमाहात्म्यात्तत्र काठिन्यप्रतीतिरिति। तन्न। भूमिपतितानामपि त-
थात्वापत्तेर्विलयनदशायां पार्थिवभागानुपलब्धेश्च। ननु भौमोष्मा-

भावसहचरितमदृष्टं विलयनं प्रतिबध्नातीत्यत्र विलयनशब्देन किंचिदन्यत् गृह्यते द्रवत्वमेव वा ? नाद्यः तस्मिन्प्रमाणाभावात्स्यंदनमेव गृह्यते इति चेत्। एवं हि द्रवत्वं तत्र तिष्ठतीति स्यात्, न चैतदुपपद्यते। चाक्षुषाणामनुपलब्धेः। न द्वितीयः एवं हि भौमोष्माभावसहकृतादृष्टाभावो विशिष्टाभावः कारणत्वेन वाच्यो, विशिष्टाभावश्च सम्बन्धाभावः। सम्बन्धश्च प्रकृते स्वरूपसम्बन्धोऽभावादृष्टयोः सम्बन्धान्तरस्याभावात्। स्वरूपसम्बन्धश्च धर्मिद्वयात्मक एव। एवं च प्रकृतधर्माभावः प्रकृते विशिष्टाभावः, स च भौमोष्मरूपोऽपि पर्यवस्यति। विशेषतास्य धर्मिणो भौमोष्मभावरूपत्वात्। एवं च भौमोष्मणस्तेजसः करकाद्रवत्वे कारणत्वमायातं, तथा च कथं न नैमित्तिकत्वमिति। भौमोष्मणामभावसहकृतमदृष्टमित्यत्र भौमोष्मसम्बन्धाभावसहकृतमदृष्टमिति वक्तव्यम्। भौमोष्मणां भूमौ सत्त्वेन सामान्यतस्तदभावाभावात्। एवं च भौमोष्मसम्बन्धकाभावकारणत्वेन तेजस्तेजःसम्बन्धयोगयोः कारणत्वेऽपि तेजःसंयोगासमवायिकारणत्वाभावेन नैमित्तिकत्वाभावात् तथा सति प्रतिबन्धकाभावान्तर्गततया निमित्तकारणत्वात् तेजःसंयोगत्वेनाकारणत्वात् भौमोष्माभावसहकृतादृष्टाभावत्वेनैव कारणत्वात्। एवं च तेजःसंयोगयोः करकाद्रवत्वे निमित्तकारणत्वेऽपि तत्रासमवायिकारणं द्रवत्वमेवेति न सांसिद्धिकत्वक्षतिरिति सङ्क्षेपः।

इदमत्र पर्यवसितसिद्धान्तरहस्यम्। करकागतं भौमोष्माभावविशिष्टमदृष्टं तथाभूतं तत्सम्बन्धाभावविशिष्टं वा तत्करकायां द्रवत्वप्रतिबन्धकं तदभावे कारणद्रवत्वात् कार्यं द्रवत्वमुपपद्यते। तत्र पूर्वनयेन करकासंयोगस्य सम्बन्धाभावपर्यवसन्नतया क्वचित् कारणत्वेऽपि न नैमित्तिकत्वं तस्य निमित्तकारणत्वात्। असमवायिकारणत्वे नैमित्तिकत्वापत्त्या घृतवत् करकभस्मारम्भकत्वापत्तेरिति भौमोष्माभावविशिष्टदेशावस्थितिरेव वा विलयनप्रतिबन्धिका भौमोष्मविशिष्टदेशास्थितिर्वा तत्कारणमन्यथा नैमित्तिकत्वापत्त्याऽकृतकबाधादिति।

पूर्ववत्–पृथिवीवत्। शरीरेति। स्पर्शवत्परमाणुत्वेन त्रिविधकार्यारम्भकत्वेन त्रिविधकार्यारम्भकत्वे सिद्धे जलपरमाणोरपि शरीरारम्भकत्वे शुक्रादेः पार्थिवत्वं नियततयाऽयोनिजपर्यवसाने व-

रुणलोकस्यापि दूरस्थतयाऽत्र योग्यानुपलब्धिबाधो न भवति । न च जलीयशरीरस्योतिश्लथतया कथं तेनाहारविहारादिरिति वाच्यम् । सर्वशरीराणां पाञ्चभौतिकत्वेनान्यावयवोपष्टम्भेन तदुपपत्तेः । जलीयेन्द्रियसिद्धिरपि घ्राणेन्द्रियसिद्धिरिव, तत्र गन्धसाक्षात्कारस्येव रससाक्षात्कारस्य तेन विनाऽनुपपत्तेः । न च तत्पार्थिवमेव तस्वे ग्राहकतापत्तेः लाघवात्पार्थिवेन्द्रियत्वेनैव गन्धग्राहकत्वात् । रूपाद्यव्यञ्जकत्वे सति पार्थिवरसव्यञ्जकद्रव्यत्वेन सक्तुरसाभिव्यञ्जकोदकवज्जलत्वसिद्धेः । मनसि व्यभिचारेण रूपाव्यञ्जकत्व इति । जलरसाभिव्यञ्जके कषायद्रव्यतदवयवे तु पार्थिवेति । सन्निकर्ष तद्वारयितुं द्रव्यत्वादिति । रूपाव्यञ्जकत्वं च पररूपाव्यजकत्वमतो दृष्टान्तासिद्धिः। पार्थिवरसाभिव्यञ्जकत्वं च परपार्थिवरसाभिव्यञ्जकत्वं नातः पररूपाभिव्याञ्जिकायाम् स्वरसाभिव्यञ्जिकायां शर्करायां व्यभिचारः। रसनेन्द्रियं च सर्वेषां प्राणिनां जलीयमेव क्वचिच्च रसानभिव्यञ्जकत्वमभिभूतरसवत्त्वादभिभूतत्वात् वा विषयरूपं तु जलं प्रत्यक्षसिद्धमपीति भावः ॥

इति जलम् ।

(व्यो०) इदानीं उद्देशवत् उदकस्य लक्षणपरीक्षार्थमाह—

अप्त्वाभिसम्बन्धादित्यादिप्रकरणम् । अप्त्वेनाभिसम्बन्धः अप्त्वेनाभिलक्षितः सम्बन्धः समवायो लक्षणमिति । तथाहि—आप इतरस्माद्भिद्यन्ते अप्त्वाभिसम्बन्धाद्ये तु न भिद्यन्ते न तेऽप्त्वाभिसम्बद्धा यथा क्षित्यादयः, न च तथापस्तस्माद्भिद्यन्त इति । व्यवहारो वा साध्यते विवादास्पदीभूतद्रव्यमापः द्रव्य इत्येवं व्यवहर्तव्यमप्त्वाभिसम्बन्धात् । ये त्वाप इत्येवं न व्यवह्रियन्ते न तेऽप्त्वाभिसम्बद्धा यथा क्षित्यादयः, न तथेदं तस्मादापः इत्येवं व्यवहर्तव्यमिति । शेषं च लक्षणस्याक्षेपप्रतिसमाधानं पृथिव्यधिकारे ज्ञेयम् । एवं शब्दार्थनिरूपणाय शक्तेरतीन्द्रियत्वप्रतिषेधार्थं चाप्त्वाभिसम्बन्धादिति वाक्यम् पूर्ववद्योजनीयम् । पूर्वं हि पृथिव्यादीनां नवानामपि समवायिकारणत्वं गुणवत्त्वं क्षित्युदकात्मनां चतुर्दशगुणवत्त्वञ्चेत्युक्तम् । तत्र केषामुत्पत्तौ समवायिकारणत्वं कैर्गुणैर्गुणवत्त्वम् के वा

चतुर्दशगुणाः किं वा गुणात्मकं लक्षणमित्याह रूपरसस्पर्शस्नेहसांसिद्धिकद्रवत्वादिसंस्कारपर्यन्ता विद्यन्ते यासां तास्तद्वत्य इति। एते च पूर्ववदिति। गुणविनिवेशाधिकारे सिद्धाः। तथाहि रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्चेति पञ्चविशेषणाः सिद्धाः ते चासाधारणत्वादितरस्माद्भेदका इत्यसाधारणताप्रतिपादनार्थमाह—शुक्लमधुरशीता एव रूपरसस्पर्शाः सूत्रेण सामान्यशब्देनाप्यर्थादभिहिता इति। तथाहि शुक्लमेव हि रूपं अभास्वरमप्सु मधुर एव रसः शीत एव स्पर्श इति। तथा स्नेहोम्भस्येव सांसिद्धिकञ्च द्रवत्वमिति। च परं स्नेहः सांसिद्धिकञ्च द्रवत्वमम्भस्येवेत्यसाधारणत्वमेषाम्। सांसिद्धिकमित्यग्निसंयोगानपेक्षम्, न त्वाकस्मिकं कार्यं कारणगुणपूर्वकम्। परमाणुषु च नित्यमिति। संख्यादयस्तु पूर्ववद्व्याख्येयाः। एवंलक्षणेन लक्ष्यमाणस्यैकानेकत्वोपलब्धौ संशये सति तन्निराकरणार्थमपत्वसामान्यस्य च भेदाधिष्ठानत्वादिति। तत्समर्थनार्थमद्वैतवादी चोदकस्योदकान्तराद्भेदं न प्रत्येति। तन्निराकरणार्थं सर्वस्य कार्यद्रव्यस्य विनाशे प्रलयावस्थायां च सर्गादौ पुनरुत्पत्तिर्न स्यात्। अभावाद्भावोत्पत्तेरयोगादिति। बीजप्रतिपादनार्थं च तासु पूर्ववद्द्विविधा इति वाक्यं व्याख्येयम्। यथा हि पृथिवी परमाणुस्वभावा नित्या कार्यलक्षणा त्वनित्या तद्वदापोऽपि इत्याह—नित्यानित्यभावादिति। नित्यत्वादनित्यत्वाच्चेत्यनेन द्वैविध्यमित्यवान्तरभेदेन वैधर्म्यं दर्शयति। कार्यन्तु सत्यप्यानन्त्ये त्रिविधमिति ज्ञेयम्। केन रूपेणेत्याह शरीरमिन्द्रियं विषय इति संज्ञा यस्य तत्तथोक्तम्। शरीरस्य च सामान्यलक्षणं पूर्वोक्तमित्युत्पत्तिरेवोच्यते—शरीरमयोनिजमेवेति। न शुक्रशोणितसन्निपातजमिति। तच्चाप्येभ्यः परमाणुभ्यो जायते। वरुणलोके प्रसिद्धमागमादिति। अथाप्यं शरीरं द्रवत्वाधिकरणतया न विशिष्टोपभोगाय कल्प्यत इत्याह पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थमिति। तथा ह्याप्यावयवाः समवायिकारणम् तत्संयोगाश्चासमवायिकारणम् पार्थिवावयवाश्च निमित्तकारणमिति। एवं तैजसा वायवीयाश्चेति। ननु चायुक्तमेतत्। शरीरस्य पाञ्चभूतिकत्वश्रवणात्। तथाहि—गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभूतिकमिति। गन्धोपलब्धेः क्षितेः कारणत्वं क्लेदाच्चापां पाकात्तेजसः व्यूहाच्च रचनाविशेषाद्वायोरवकाशदातृत्वेन चाकाशस्येति पांचभूत-

कत्वम् । तच्च असत् । विभिन्नजातीयानामेकद्रव्योत्पत्तौ समवायि-त्वस्यादर्शनात् । न च विभिन्नजातीयावयवेषु समवेतं शरीरमुप-लभ्यते । यदि च पञ्चानां समवायित्वं स्यादेवञ्च सत्येभ्यः कः पा-र्थिवान्यस्त्वाप्यस्तैजसावयवीयास्तेषु समवेतं शरीरमुपलभ्यते(?) । न चैवं तथा विचित्रगुणाधिकरणत्वात्समवायिकारणानां कार्येपि तद्वै-चित्र्यं स्यात् । एवं च सति पार्थिवावयवे शुक्लादीनामन्यतमत्वं रूपं पाकजस्पर्शं स्यात् । आप्यावयवे च शुक्लमेव रूपं शीत एव स्पर्शः स्यात् । तैजसे भास्वररूपं उष्ण एव स्पर्शो वायवीये चानुष्णाशीतत्वे सति अपाकजस्पर्श एव स्यादिति । विचित्रावयवै-रारब्धत्वाच्छरीरे वैचित्र्यमुपलभ्येत । न तूपलभ्यते तस्मादयुक्तमेतत् । अथावयवस्याप्यनेकभूतैरारम्भः । तथाहि-पार्थिवाप्याभ्यां परमाणुभ्यां द्व्यणुकं पुनराप्यतैजसाभ्यां तथा तैजसवायवीयाभ्यामारब्धमिति । एवं वायुशब्दतन्मात्राभ्यां एतानि द्व्यणुकान्युत्पन्नानि त्र्यणुकादिप्रक्रमेण शरीरमारभन्त इत्यभ्युपगमे च रूपादीनामुत्पत्तिर्न भवेत् । तथाहि-गुणाश्च गुणान्तरमारभन्त इति सूत्रेणानेकस्य गुणस्य गुणारम्भक-त्वमुक्तम् । एवं च सति पार्थिवाप्याभ्यामणुभ्यामारब्धे द्व्यणुके गन्धो-त्पत्तिर्न स्यात् । तस्य द्व्येकत्वेनाजनकत्वादेवमाप्यतैजसाभ्यामारब्धे द्व्यणुके रूपाभावः । तथा वायुशब्दतन्मात्राभ्यामारब्धे स्पर्शाभाव इति । तदेवम् गन्धरसरूपस्पर्शानां द्व्यणुकेष्वभावे तत्कार्यकार्येष्वप्य-भावादिति शरीरेष्वभावप्रसङ्गः । एतच्च द्व्यात्मकादिष्वपि समानम् । तथाहि-पार्थिवाप्याभ्यामारब्धे शरीरे गन्धानुत्पत्तिः । पार्थिवतैज-साभ्यामारब्धे गन्धरसानुत्पत्तिः पार्थिववायवीयाभ्यामारब्धे गन्धर-सानुत्पत्तिः । एवं पार्थिवाकाशाभ्यामारब्धे चतुर्णामनुत्पत्तिरिति । न च द्रव्यारम्भकत्वं आकाशस्यामूर्तत्वादिति । मूर्तस्य हि स्पर्शव-तो द्रव्यस्य द्रव्यारम्भकत्वदर्शनात् । एवमण्वादेरपि इतरसहकारि-त्वेनारम्भे दूषणमूह्यम् । तथा त्रयाणां पृथिव्यादीनां चतुर्णां चारम्भ इति पञ्चानां च कारणत्वमिष्यत इति पाञ्चभौतिकत्वमिष्टम् । समवा-यित्वं चैकस्यैवेति । पार्थिवे हि शरीरे पार्थिवस्यान्यास्मिन् गन्ध अन्यस्ये-ति(?) । पार्थिवे च क्लेदोपलम्भः संयुक्तसमवायेन पाकस्त्वान्तरानलसं-योगात्स च नोपलभ्यत एवेन्द्रियेण शरीरे सर्वदा, केवलं तु गुणान्तर-प्रादुर्भावात् पूर्वशरीरनिवृत्ता उत्पन्नपाकजरारम्भः कल्प्यते । व्यू-

हस्त्ववयवरचनाविशेषः । स तु वायुकार्यो न भवत्येवावकाशदातृत्वञ्च मूर्तद्रव्याभावस्यैवेत्याकाशस्य लिङ्गमित्यलम् ।

इन्द्रियस्वरूपनिरूपणार्थमाह—इन्द्रियञ्च रसव्यञ्जकमिति । रसोपलब्धिः करणकार्या क्रियात्वाद्या या क्रिया सा सा करणकार्या यथा छिदिक्रिया, तथा चेयं क्रिया, तस्मात्करणकार्येति । यच्च रसोपलब्धिसम्पादकं करणं तदाप्यन्तद्रसनम् । रूपरसादिषु मध्ये नियमेन रसव्यञ्जकत्वाद्यद्यत् रूपादिषु मध्ये नियमेन रसव्यञ्जकं तत्तदाप्यं दृष्टम । यथादन्तान्तर्गतोदकम् । तथा चैवमेतत् । तस्मादाप्यमिति । रसनव्यापाराद्रसत्वादीनामपि ग्रहणस्य सम्भवादसम्भवित्वं स्यादिति रूपादिषु मध्ये इति पदम् । तथाहि—शुष्ककण्ठस्य मोदकादिषु रसोपलब्धिर्नोपलब्धोदकसद्भावे तु रूपादिषु मध्ये रसस्यैकस्योपलब्धिरिति सपक्षे सत्त्वमनाप्ये चैतन्न सम्भवतीति विपक्षाद्व्यावृत्तिरिति । तदेतदसाधारणत्वादितरस्मात् भेदकमपीति ज्ञेयम् । अथ कस्मात् किञ्चिदेवाप्यं द्रव्यं रूपादिषु मध्ये नियमेन रसव्यञ्जकमिन्द्रियं चेत्याह—अन्यावयवानभिभूतैरपित्सम्पृक्तैरपि जलावयवैरारब्धं रसनमिति रसस्यैव व्यञ्जकमिति । अन्ये त्वन्यावयवानभिभूतैरसंपृक्तैः शुद्धैर्जलावयवैरारब्धमिति ब्रुवते । अस्य च सूत्रस्येदं भाष्यम्–भूयस्त्वाद्रसवत्त्वाच्चोदकं रसज्ञाने प्रकृतिरिति । भूयस्त्वादिति । भूयसामाप्यावयवानां रसोपलब्धिप्रापकादृष्टापेक्षाणां संयोगे सतीपदितरावयवसम्पर्के च विशेषोत्पाद उपदिश्यते । अत एवान्यावयवाभिभवानुपपत्तिः । जलावयवानां भूयस्त्वादितरेषां चाल्पत्वादिति । रसवत्त्वञ्च रसनेन्द्रियस्य रसोत्कर्षः । सामान्यशब्देनाप्यर्थोऽनुक्त इति रसो ज्ञायतेऽनेनेति रसज्ञानमिन्द्रियम् तस्मिन्नुत्पाद्ये प्रकृतिः कारणमुदकं भूयस्त्वाव्याकृतार्ज्ञामित्वात् तस्मादेतदेवेन्द्रियम् । रूपादिषु मध्ये नियमेन रसप्रकाशकञ्चेति । यदि वा "कार्यनियमः कारणनियमं विना न घटत इति" नियमेन रसनेन्द्रियाद्रसोपलब्धेरेवोत्पत्तिः कुत इत्याह भूयस्त्वाद्रसवत्त्वाच्च निमित्ताद्रसे ज्ञप्तिः ज्ञानं तत्र प्रकृतिः कारणं रसनेन्द्रियमिति । तथाहि–संयुक्तसमवायाविशेषेपि नियमेन रसोपलम्भान्यथानुपपत्त्या ज्ञायते नियमहेतुः स चान्यस्यासम्भवाद्रसोत्कर्षं भूयस्त्वं चेति कल्प्यते । यदि वा रसोपालम्भान्यथानुपपत्त्यान्यस्यासम्भवात् ज्ञायते रसोत्कर्षे किं नि-

मित्तमित्याह-भूयस्त्वमिति । तथाहि-आप्यत्वाविशेषेपि रसस्यैवोत्कर्षो न रूपादेरिति भूयस्त्वं विशिष्टोत्पादे निमित्तम् । स चादृष्टवशाददृष्टस्य च व्यवस्थाहेतुत्वादिति । विषयं निरूपयति शरीरेन्द्रियव्यतिरिक्तो द्व्यणुकादिप्रक्रमेणारब्धो विषयः । तस्य हि विषयभावेनैवोपकारत्वादिति । स तु सरित्समुद्रहिमकरकादिरिति ॥

(भा०) तेजस्त्वाभिसम्बन्धात्तेजः । रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् । पूर्ववदेषां सिद्धिः । शुक्लं भास्वरञ्च रूपम् । उष्ण एव स्पर्शः नैमित्तिकं द्रवत्वञ्च । तदपि द्विविधम्-अणुकार्यभावात् । कार्यं शरीरादित्रयम्-(१)शरीरमयोनिजमेव आदित्यलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम् । इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमन्यावयवानभिभूतैस्तेजोवयवैरारब्धं चक्षुः । विषयसंज्ञकम् चतुर्विधम्-भौमं दिव्यमुदर्यमाकरजञ्च । तत्र भौमं काष्ठेन्धनप्रभवमूर्द्ध्वज्वलनस्वभावम् पचनस्वेदनादिसमर्थम् । दिव्यमबिन्धनं सौरविद्युदादि । भुक्तस्याहारस्य रसादिभावेन परिणामसमर्थमुदर्यम् । आकरजं सुवर्णादि । तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति ॥

(सू०) तेजस्त्वेति । तेजस्त्वस्याभिमतः सम्बन्धः समवायस्तमन्तर्भाव्य तेजः प्रत्यक्षीकर्तव्यमिति शेषः, नातः पञ्चम्यसङ्गतिः । पूर्ववदिति । 'तेजो रूपस्पर्शवत्' इति सूत्रकारवचनाद्रूपस्पर्शौ, रूपिषु चाक्षुषवचनात् सप्त संख्यादयः, अद्भिः सामान्यवचनात् द्रवत्वम् , उत्तरकर्मवचनात् संस्कारस्तेजसीत्यर्थः । रूपमात्रं नीलघटादावतिप्रसक्तत्वान्न तेजसो भेदकमतो व्याचष्टे शुक्लं भास्वरञ्च रूपमिति । शुक्लं भास्वरं रूपं तेजसो लक्ष-

(१) शरीरेन्द्रियविषयसंज्ञकम इत्यधिकः पाठः ।

णमित्यर्थः। शुक्लमपि रूपं यद्यपि स्फटिकादावतिप्रसक्तं, तथापि उष्णत्वसमानाधिकरणं तद्ग्राह्यं अत एवाभास्वरं चेत्युक्तम्। भास्वरत्वं तेजोरूपमात्रगतो जातिप्रभेदः। स्पर्शमात्रं पृथिव्यादौ गतमत आह उष्ण एवेति। उष्णान्यस्पर्शाभावविशिष्टः स्पर्श उष्णस्पर्शो वा तेजसः साधर्म्यमित्यर्थः। तदपि-तेजोऽपि, अणुर्नित्यः। तेजसः कार्यं विभजते कार्यमिति। शरीरादीत्यादिना इन्द्रियविषययोः परिग्रहः। तैजसदेहस्य योनिजत्वे पार्थिवत्वापत्तिरत आह शरीरमिति। योग्यानुपलब्धिबाधं निरसितुमाहादित्यलोक इति। भोगहेतुधारणाकर्षणादिसम्पत्यर्थमाह पार्थिवेति। सर्वप्राणिनां—पृथिवीजलादिसर्वजातीयजन्तूनां, रूपव्यञ्जकं तेजोवयवैरारब्धमिन्द्रियं चक्षुश्चक्षुर्नामकमित्यन्वयः। सर्वदा जलाद्युपहतगोलकस्य चक्षुष्ट्वसत्त्वे प्रमाणाभावादाहान्यावयवानभिभूतैरिति। जलाद्यवयवानभिभूतैरिति तदर्थः। आकरः—खनिस्ततो जातमाकरजम्। तत्र—भौमादिषु मध्ये। काष्ठेति। काष्ठरूपं यदिन्धनमुद्दीपकं तत्प्रभवमित्यर्थः। ऊर्ध्वेति। ऊर्ध्वं वह्निर्ज्वलतीति प्रतीतिसाक्षिकः क्रियाभेद ऊर्ध्वज्वलनं तदेव स्वभावोऽनौपाधिको यस्य स तथा, काष्ठादौ तु ज्वलनं तदाश्रयीभूताग्निसम्पर्कप्रयुक्तमिति भावः। न चायः पिण्डादिवह्नावव्याप्तिः, ऊर्ध्वज्वलनसमवायिकारणतावच्छेदकजातिमत्त्वस्य विवक्षितत्वादिति। पचनं—रूपादिपरावृत्तिः। स्वेदनं-कफाद्यपगमः। आदिना समयभेदेन सुखदुःखयोः परिग्रहः। दिव्यन्तेजो निर्वक्ति दिव्यमिति। अबिन्धनम्—आप एव इन्धनमुद्दीपकं यस्य तत्तथा। किन्तथाविधमित्याकांक्षायामाह सौरविद्युदादीति। आदिना खद्योतादितेजःपरिग्रहः। तदर्थं निर्वक्ति भुक्तस्येत्यादिना। भुक्तस्योदनादेर्यो रसादिपरिणामः पाकज-

रसमलधातूनामुत्पादस्तेषु निमित्तमित्यर्थः । सुवर्णादीनामित्यादिना रजतताम्राद्युपग्रहः । यद्यपि गुरोः पीतस्वर्णस्य पार्थिवत्वमेव तदुपष्टम्भस्य च तेजोन्तरे प्रमाणाभावः, पार्थिवस्वर्णस्य चात्यन्ताग्निसंयोगेऽपि द्रवत्वानुच्छेदः पीतान्यरूपानुत्पादश्च द्रवत्वस्यात्यन्तोच्छेदे रूपान्तरोत्पादे च तादृशस्वर्णस्य प्रतिबन्धकत्वकल्पनयापि सम्पादयितुं शक्यः, तथापि सिद्धान्तमात्रमनुरुध्य सुवर्णादेस्तैजसत्वमभिहितमिति ध्येयम् ॥

ननु सुवर्णादेस्तैजसत्वे द्रावितस्य तस्य मधुरादिरसाद्यनुभवो न स्यात्तैजसो नीरसत्वादाह तत्रेति । वस्तुतः पीत एव द्रावितस्वर्णस्याप्युपलब्धिः स च पार्थिवत्वात् सरस एवेति न माधुर्याद्यनुपपत्तिरिति द्रष्टव्यम् । इति तेजः ॥

(सं०) रूपरसगन्धस्पर्शलक्षणचतुर्गुणां पृथिवीं निरूप्य त्रिगुणं जलं निरूपितम् । इदानीं द्विगुणं तेजो निरूपयति तेजस्त्विति । तेजःशब्दस्य पदतया प्रवृत्तिनिमित्तवत्तया भास्वरोष्णयोरविनिगम्यतया विनिगमनाविरहस्योभयविधिनिषेधान्यतरनिष्ठतयोभयविधौ नानार्थत्वापत्त्योभयनिषेधपर्यवसानेऽप्रवृत्तिनिमित्ततया तेजस्त्वजातिरापतति । न चाकाशादिपदे पारिभाषिकतया निर्निमित्ते व्यभिचारः, निमित्तवत्तायामपारिभाषिकपदत्वस्य हेतुत्वात् आकाशादिपदेऽपि निमित्तस्वीकाराद्वा । भास्वररूपोष्णस्पर्शयोरननुगततया भास्वरत्वोष्णत्वाभ्यामनुगमे ताद्वाशष्टविशिष्टस्य तेतःशब्दवाच्यताया गौरवापत्तेश्च भास्वररूपादिकारणतावच्छेदकप्रविष्टतया तज्जातिः सिद्धेति भावः । तद्गुणान् गणयति रूपेति । पूर्ववदिति । यथा पाथःपृथिव्योर्गुणाः सूत्रकारवचनात् सिद्धाः तथा तेजसोऽपीत्यर्थः । तेजो रूपस्पर्शवदिति सूत्रं रूपस्पर्शयोर्मानम् चाक्षुषत्वप्रतिपादकसूत्रं संख्यादिषु अद्भिः सामान्यप्रतिपादकं सूत्रं द्रवत्वे उत्तकर्मप्रतिपादकं संस्कारे भास्वरत्वं परप्रकाशकत्वव्यङ्ग्यं रूपत्वावान्तरजातिविशेषः तद्रूपं तेजस एव । एवं च भास्वरत्ववत्तेज इति भास्वरञ्च रूपमेवेति रूपपदोपादानं न तु लक्षणप्रविष्टत्वेन । शुक्लपदमपि तेजसो रूपं शुक्लमेवेति

स्वरूपकथनाय लक्षणे वैयर्थ्यात् । अग्नेररुणादिरूपोपलब्धिस्तु पा-
र्थिवौपाधिकी तद्विरहे चन्द्रादौ शुक्लस्योपलम्भात् । ननु चन्द्रादौ
शुक्लत्वप्रतीतिरेवमन्यौपाधिकी तत्रैव जलस्योपाधेः सम्भवादिति
चेत् । जलरूपस्यान्यरूपानभिभावकत्वात् । जलान्वितस्य नीलस्य
सितिम्नोऽनुपलम्भात् । ननु वह्निरूपस्याभिभूतत्वे परप्रकाशकत्वं
न स्यात् उद्भूतानभिभूतमहत्त्वसमानाधिकरणभास्वररूपस्यैव पर-
प्रकाशकत्वात्, अन्यथा नयनरूपसुवर्णरूपतेजःपरमाणुरूपघट-
रूपाणां परप्रकाशकत्वप्रसक्तेरिति चेत् । न, वह्निरूपशुक्लत्वस्या-
भिभूतत्वेऽपि वह्निरूपस्यानभिभवादित्येके । अनभिभूता वह्निप्रभै-
वाभिव्यञ्जिकेत्यपरे । सुवर्णरूपं त्वभिभूतत्वान्न प्रकाशयति न वा
प्रकाशते महत्त्वसमानाधिकरणोद्भूतानभिभूतरूपस्यैव प्रत्यक्षत्वा-
त् । अभिभवश्च बलवत्सजातीयसम्बन्ध एव, तेनान्धकारेऽपि तद-
भिभूतम् ग्रहणपर्यन्तस्य गौरवप्रसक्तत्वात् । ननु सुवर्णमन्धकारे किमि-
ति न गृह्यते तेजोग्रह आलोकस्यासहकारित्वात्, प्रत्यक्षताप्रयोज-
कस्य महत्त्वे सत्युद्भूतरूपस्य सत्त्वादिति चेन्न । रूपपुरस्कारेण च-
क्षुषः प्रवृत्तेः । तत्र पृथिवीरूपस्यालोकाभावेन ग्रहात् तेजोरूपस्य
चाभिभूतत्वादिति । उष्ण एवेति । चन्द्रादिषु तूष्णत्वानुपलम्भोऽनु-
द्भूतत्वात् । एवकारश्चन्द्रचामीकरचक्षुरादिष्वनुपलम्भेऽनुक्तां वि-
प्रतिपत्तिमपनेतुमित्याचार्याः । चामीकरग्रहणमनुभास्वरपतित(?)स्प-
र्शस्याभिभूतत्वात् । अनुद्भूतत्वे सुवर्णस्याप्रत्यक्षत्वापत्तेः । उभयोरु-
द्भवस्य बहिर्द्रव्यप्रत्यक्षत्वप्रयोजकत्वेन वाच्यत्वात् । तथा च संख्या-
देः पृथिवीजलत्वेनानभिभूतत्वेऽपि द्रव्यत्वप्रत्यक्षत्वानुपपत्तेः आ-
श्रयाप्रत्यक्षत्वे सामान्यगुणाप्रत्यक्षत्वात् । अणुकार्यभावान्नित्यकार्य-
भावात् । कार्यरूपमिति स्पर्शवत्परमाणुत्वेन तृतीयारम्भकत्वसिद्धौ
शरीरारम्भकत्वप्राप्तौ शुक्रशोणितयोरभावेनायोनिजमेव शरीरम् ।
अनुपलम्भसत्त्वादलोकस्थत्या व्यवधानमित्यर्थः । पार्थिवेत्यादि
पूर्ववत् ।

इन्द्रियमिति । स्पर्शवत्परमाणुतया इन्द्रियारम्भकत्वसिद्धौ तै-
जसेन्द्रियसिद्धौ तच्चक्षुरेव । चक्षुस्तैजसं रसाव्यञ्जकत्वे सति रूप-
व्यंजकद्रव्यत्वात् इत्यर्थः । ननु चक्षुः प्राप्यकार्यन्यथा वा ? आद्ये-
ऽप्यधिष्ठान एव स्थितं प्राप्नोति बहिर्गतं वा ? नाद्यः—अधिष्ठानस्थ-

तत्प्राप्तस्यार्थस्याधिष्ठानप्राप्तिप्रसङ्गाद्रसनवत् । नोत्तरः-तस्याधिष्ठानं परित्यज्य बहिर्गमनेऽग्राहकत्वप्रसङ्गादधिष्ठानसम्बद्धस्येन्द्रियस्य ग्राहकत्वात्, अपरित्यज्य बहिर्गमने चक्षुषा स्वाधिकपरिमाणवस्त्वग्रहणप्रसङ्गः । स्वारभ्यस्यास्य तावदवच्छेदेन प्राप्त्यभावात्-कियद्-शस्याप्राप्तस्य ग्रहणं न स्यात् क्रमिकगत्या क्रमप्राप्त्या क्रमिकबोधसामग्रीसत्त्वात् । न चाग्निज्वालेरपि पूर्वबोधसामग्री गौरवात् । न च चक्षुरूर्जुरेखागतं सङ्कुचीभूय तथाग्रं प्रसारयति यथा परापरयोर्द्वयोर्युगपत्सम्बध्नातीति वाच्यम् । एतावदप्रामाणिककल्पनाया अनुचितत्वात् । न च निर्गतं चक्षुरेव मध्यभाग एव परेण सम्बद्ध्यते तदनन्तरं चाग्रभागेन परेणापि योगपद्यमुपपद्यते, पूर्वपरेणासम्बन्धस्तु वक्रगत्येति वाच्यम् । अपरस्या अपि कल्पनायाश्च प्रामाणिकत्वात् । अग्रावच्छेदेनैव चक्षुःसम्बन्धस्य ग्राहकत्वाङ्गीकाराद्यथा मलमिलितनल(?)गोलकापलापिप्रसङ्गात् । यत्तु नयनात् संसर्गि द्रव्यतया विनिर्गतं चक्षुर्बाह्यालोकाभ्यां आत्ममनसाभ्यां आनीतं तेजोन्तरञ्च युगपदुभयं परिच्छिनत्ति तदारभ्यमाणञ्च नोद्भूतं रूपादि नानि इन्द्रियजातिपातः । न चोद्भूतरूपणाद्भूतरूपजननानियमोऽवयविनोऽनुद्भूतरूपेणापि तैलेन तद्रूपस्य तेजसोऽजननात् । न च तत्रादृष्टाकृष्टास्तादृशा एव भागास्तथाभूतमारभन्त इति वाच्यम् । अदृष्टस्य अनुद्भूतत्वप्रयोजकतया आवश्यकत्वे तदाकर्षणपर्यन्तकल्पनाया अनुचितत्वादिति । एतञ्च महारत्नावन्धेन(?) चक्षुषा प्राप्तस्य पृष्ठदेशस्थस्यापि ग्रहणप्रसङ्गात् । अपि च चक्षुषः प्राप्यकारित्वे स्फटिकाद्यन्तरितोपलम्भानुपपत्तिः स्फटिकादीनां प्रतिबन्धकत्वेन प्राप्त्यभावादपि च प्राप्यकारितायाञ्चक्षुषो महता घातेन दहनशिलाया इव इतस्ततो नाद्भुतदेशास्थितपदार्थग्रहा न स्यात्, तस्मात् अप्राप्यकारि चक्षुः तथाच गोलकमेवग्राहकं च तददृष्टविशेषविशिष्टं कर्णशष्कुलीवत् । नातः प्रसक्तान्धस्य ग्रह इति चेत् ।

अत्राहुः-चक्षुः प्राप्यकारिग्राहकं तैजसत्वात् प्रदीपप्रभावत् । न च तैजसशरीरेण प्राप्तस्यापि ग्राहिणा व्यभिचारः शरीरभिन्नत्वेन विशेषणात् । न च गोलकतायां तैजसत्वमसिद्धम् तैजसत्वस्य प्राक्साधनेन गोलकताया वक्तुमशक्यत्वात् । न च प्राप्यकारित्वे रसनवदधिष्ठानसम्बद्धार्थग्राहि तं स्यादिति वाच्यम् । प्राप्यकारिणोऽपि

प्रदीपस्याधिष्ठानासम्बद्धार्थग्राहकत्वात् । पृथुतरग्राहित्वमपि प्रदीप-प्रभावत् पृथुतरतयोपपद्यते, अन्यथा परभागावच्छिन्नस्यापि यच्छता(?)-देर्ग्रहणप्रसङ्गः । एवं च यदा यावानग्रभागो भवति तदा तावत्तद्ग्राह्यं परिच्छिनत्तीति न किमपि विरुध्यते शाखाचन्द्रमोधियो यौगपद्यधि-यस्तु भ्रान्तत्वमेवातिशयितवेगतया कालभेदानाकलनेन भ्रमसम्भ-वात्प्रमात्वबाधकप्राप्यकारित्वे भित्त्यादिव्यवहितग्रहणमसमञ्जसमेव । स्फटिकाद्यन्तरितोपलम्भोऽपि स्फटिकादीनां स्वभावस्वच्छतया ते-जोवात्यप्रतिबन्धकतया, अन्यथा दीपप्रभाया अपि प्रतिबन्धापत्तेः । विद्युत्प्रभाया इव चातिशयितवेगतयैव न नायनस्य तेजसो वाय्वा-दिना दूरमपनयनं कराभ्यां तु तस्यापि वारणं वस्तुस्वभाववैचित्र्य-स्य नियोगपर्यनुयोगानर्हत्वेन हुताशनशिखाया वायुनाऽन्यत्र नयने-ऽपि चक्षुषोऽनपनयनात् । किञ्चाप्राप्यकारित्वे भित्त्यादिव्यवहितस्य कुतो न ग्रहणम् । ग्राह्यग्राहकयोरन्तरालवर्तिनः प्रतिबन्धकत्वादिति चेत् । अन्तरालवर्तिना तृणादिना परभागवर्तिनो महीधरादेरग्रह-णप्रसङ्गात् । ग्राह्याधिकपरिमाणमध्यवस्थितं प्रतिबन्धकमिति चेत् । न । उच्चमारुह्य ग्राह्याधिकपरिमाणे मध्यस्थितेऽपि परभागस्थितस्य ग्रहणात् । ग्राह्यग्राहकयोर्महदन्तरालस्थप्रतिबन्धकमिति चेत् । ग्रा-हकपदेन गोलकग्रहणे उच्चस्थितान्तरालमित्यादेस्तत्सम्भवात्सक-लशरीरग्रहणेऽपि तत्सम्भवात्, तस्माद्भित्त्यादिप्रतिविधानकत-यैव प्रतीतिप्रतिबन्धकमिति प्राप्यकारितासिद्धिरिति । यत्तु क्षणमात्रा-वस्थायिषु भावेषु कश्चित्कचित् कार्ये योग्यः कश्चित् क्वचिदेव प्रत्य-क्षस्वरूपयोग्यो घटः प्रत्यक्षीक्रियते नान्यः, तथाभूतश्च भित्तिपर-भागस्थितो घट इति न प्रत्यक्ष इति । तन्न । सर्वान् प्रति भित्तिपर-भागस्थितस्यायोग्यत्वे भित्तिपरभागस्थितिनाप्यग्रहणप्रसङ्गात् । भि-त्यर्वाग्भागस्थितं प्रति भित्तिपरभागावस्थितोऽयोग्य इति चेत् । पूर्वन्यायेन निराकृतत्वात् । कुर्वद्रूपत्वमेव योग्यत्वमिति चेन्न । अस्य क्षणभङ्गनिराकरणेन निराकर्तव्यत्वात् । भित्तिपरभाग एवाकुर्वद्रूप-त्वं नार्वाग्भागस्थिते कदापि इत्यत्र नियामकस्यान्वेष्टव्यत्वात् । त-स्मात्सिद्धं चक्षुः प्राप्यकारि गोलकमितश्च । एवं च रसनादयोऽपि जिह्वादिभिन्ना इन्द्रियत्वेनातीन्द्रियत्वादिति सर्वमनवद्यमिति । किञ्च चक्षुर्घटयोः सहकारितया परस्परसम्बन्धापेक्षायामपि प्राप्य-

कारित्वादिति संक्षेपः ।

भौमादयो-भूम्यादौ भवाः । आकरं खनिः, काष्ठपदमुपलक्षण- तया तृणादीनपि संगृह्णाति । ऊर्ध्वेति जातिनियतो धर्मस्वभाव इ- त्युच्यते । परार्थतामाह-पचनेति । पाको विक्लेदनं रूपादिपरावृत्तिः, स्वेदनं वातश्लेष्मणोरपगमः, आदिग्रहणाच्छीतादिदुःखोपशमः । अविन्धनमाप एवेन्धनं यस्य तेनौदर्यव्यावृत्तिः । भौमेप्येतदर्थमेव पा- र्थिवमात्रेन्धनत्वं विवक्षणीयम् । विद्युदादीत्यादिपदाद्वडवानलादिः । आहारस्येत्यत्र भावव्युत्पत्तौ भुक्तस्येत्यनेन सामानाधिकरण्यानुप- पत्त्या कर्मव्युत्पत्तिरास्थेया । तत्र चोदनादित्वेनैव तद्ग्रहो नातः तत्पौनरुक्त्यम् । रसादीत्यादिग्रहणात् मलादिपरिग्रहः रसादय एव परिणामः । सुवर्णादीत्यादिपदाद्रजतादयः ।

ननु सुवर्णं पीतमगुरुत्वाश्रयत्वेन प्रतीयमानं पार्थिवमेव, अपि च नैमित्तिकद्रवत्वाश्रयतयापि तत्तथा तस्य पार्थिवे एव घृतादौ दर्शना- त् । न च पृथिवीत्वेन न नैमित्तिकद्रवत्वसमवायिकारणता-घटादौ द्रवत्वापत्तेः, नापि पृथिवीत्वव्याप्येन घृतत्वादिनाऽननुगमापत्तेरि- त्यदृष्टविशेषसाचिव्येन तत्प्रयोजकत्वे तेजस्यपि नैमित्तिकं द्रवत्वमि- ति वाच्यम् । तेजसि नैमित्तिकद्रवत्वस्य सुवर्णातिरिक्ते क्वाप्यप्रसि- द्ध्या सुवर्णादेः पार्थिवत्वान्नैमित्तिकद्रवत्वप्रयोजकादृष्टसाचिव्यस्य पृ- थिवीतेजसोर्द्वयोः कल्पनापेक्षया पृथिव्यां दृष्टत्वेन पृथिव्यामेव क- ल्पनायाः उचितत्वात् । एवं च सुवर्णं पार्थिवं नैमित्तिकद्रवत्वाश्रय- त्वात् घृतवत् । न चाप्रयोजकत्वं निरुपाधित्वादिति चेन्न ।

अत्यन्ताग्निसंयोगेन किञ्चिद्द्रवत्वमुच्छिद्यते किञ्चित्तु नेति सर्वानुभवसिद्धम् । तत्रोच्छेद्यतावच्छेदकं न नैमित्तिकद्रवत्वं द्रवत्वं वा सुवर्णद्रवत्वस्योच्छेदापत्तेः । नापि घृतादिद्रवत्वमननु- गमापत्तेः । नापि तेजोद्रवत्वं घृतादावभावात् इदानीं तेजसि द्रव- त्वासिद्धेश्च । तस्मात्पृथिवीत्वमेवोच्छेद्यताप्रयोजकम् । एवं च सुवर्णद्रवत्वं यदि पार्थिवं स्यात् तदाऽसति प्रतिबन्धके बहुला- नलसंयोगेनोच्छिद्येत, जलामिलितघृतादौ तथा दर्शनात् । न- न्वग्निसान्निध्येन जलशोषणेन जलद्रवत्वमप्युच्छिद्यते, तथाच कथं पार्थिवत्वमुच्छेद्यताप्रयोजकमिति चेन्न । तत्र जलनाशेन द्र- वत्वनाशात् । अग्निसंयोगेन नाशात् लाघवेन पार्थिवत्वस्य तेषू-

च्छेदप्रयोजकत्वे तथात्वासिद्धेः । एवं च सुवर्णं न पार्थिवमिति सिद्धे सांसिद्धिकद्रवत्वाभावेनाजलत्वे सिद्धे रूपवत्त्वेन तेजस्त्वं सिध्यति । रूपवत्त्वं च बहिरिन्द्रियप्रत्यक्षद्रवत्ववत्त्वात् तस्य प्रत्यक्षत्वाभावे द्रवत्वस्याप्यप्रत्यक्षत्वापत्तेः सामान्यगुणत्वात्, न तु सुवर्णादिभिन्नानित्यद्रवत्वमेवोच्छेद्यताप्रयोजकम् गौरवात् । ननु द्रुतद्रुततरादिक्रमेण सुवर्णद्रवत्वोपलम्भात्पूर्वपूर्वसुवर्णद्रवत्वमप्यग्निसंयोगादुच्छिद्यत इति चेन्न । तस्याप्याश्रयनाशेनैव द्रवत्वनाशात् , अन्यथा काष्ठां प्राप्तस्यापि द्रवत्वस्य तत्राग्निसंयोगेन नाशापत्तेः, अग्निसंयोगेनोच्छिद्यमानद्रवत्वाधारस्य भस्मपर्यवसानदर्शनाच्च । यत्तु पृथिव्यां रूपस्यात्यन्तानलसंयोगेनाप्रतिबध्यमानोच्छेददर्शनेन सुवर्णस्य चातथात्वेनापार्थिवत्वाभावे तद्रूपस्यातीन्द्रियतया विवाददशायामुच्छेदानुच्छेदयोरसिद्धेः । पार्थिवभागद्रवत्वरूपयोरुच्छेद्यप्रतिबन्धकतया द्रुतद्रव्यान्तरसिद्धौ द्रुतस्य घृतस्य लाक्षायां तदुभयोच्छेदाप्रतिबन्धकतापातत्वात् पृथिवीभिन्नत्वसिद्धौ सांसिद्धिकद्रवत्वासिद्ध्या पारिशेष्यप्राप्तौ तेजस्त्वसिद्धिः । न चोच्छेदकजातीयस्य कथं प्रतिबन्धकत्वं तदसिद्धिदशायामस्य विचारस्याश्रयासिद्धत्वात् , सिद्धिदशादशायां धर्मिग्राहकप्रमाणबाधितत्वात् उपष्टम्भकभागरूपाद्युच्छेदकप्रतिबन्धकत्वेन सिद्ध्या च न तृणादौ तदुभयोच्छेदकप्रतिबन्ध इत्यपरे । तदपि न विचारचातुरीतरङ्गिणीतरलतरङ्गपातप्रयासमतिकामति । तथाहि—धर्मिग्राहकप्रमाणाद्धि पीतपार्थिवभागातिरिक्तद्रुतं किञ्चित्प्रतिबन्धकत्वेन सिद्ध्यति द्रुतस्य जलस्य प्रतिबन्धकत्वदर्शनात् अदृष्टादेः कस्यचित् तथात्वेन फलतोऽदृष्टकल्पनापत्तेः । तच्च पार्थिवेन सिद्ध्यतु । न न चोच्छेद्यद्रवत्वाश्रयजातीयं कथमुच्छेदप्रतिबन्धकद्रवत्वाश्रय इति वाच्यम् । उच्छेदकजातीयस्य तेजसः कथं प्रतिबन्धकत्वमिति समानत्वात् धर्मिग्राहकमानस्योभयत्र साम्यात् । पृथिवीत्वासिद्धिपर्यन्तं तत्र धर्मिव्यापार इति चेत् । तेजस्त्वसिद्धिपर्यन्तमपि तदभावात् । प्रत्युत पृथिव्यां द्रवत्वदर्शनात् पृथिवीत्वकल्पनाया एवोचितत्वात्, तस्मादनया रीत्या तेजस्त्वासिद्धिः । अपि चोपष्टम्भकभागरूपावच्छेदकप्रतिबन्धकत्वं तस्य धर्मिग्राहकात्सिद्ध्यतु तन्मात्रप्रतिबन्धकत्वं कुत इति विचारणीयम् । पीतो भागः स्वरूपोच्छेदप्रतिबन्धकद्रवद्रव्य-

सम्बद्धो भूयःकालिकप्रबलानलसम्पर्केऽपि अनुच्छिद्यमानरूपवत्त्वात् जलमध्यस्थितपटवदिति वानुमानात् दृष्टान्ताभिरुद्ध्या स्वरूपमात्रप्रतिबन्धकेत्याद्यसाधनात्। न च यदेकत्र यथा सिध्यति तदाऽपरत्र न सिध्यति शब्दकारणत्वेन सिद्धस्याकाशस्य संयोगादिकारणत्वात्। न च तत्र प्रमाणसत्त्वाद्भवतु तथा प्रकृते तु तदभावात्, प्रत्युत बाधकसत्त्वात् न तथेति वाच्यम्। तर्हि मदुपन्यस्तां विचारसोपानपरम्परामारुह्य दूरमागम्यताम्। धर्मिग्राहकप्रमाणस्य तथा सामर्थ्योपन्यासस्त्वसन्न्यास एव, तस्मात्पार्थिवद्रवत्वेनैव लाघवात् अत्यन्तानलसंयोगनाश्यतायाः कल्पनात् सुवर्णद्रवत्वमपार्थिवम्। जलादावपि सुवर्णवद्द्रवत्वं नाग्निसंयोगान्नश्यति इति उदीरितमेव। पार्थिवश्च भागो यदि द्रुतस्तदा द्रुततेजोभागसम्बन्धादेव तद्द्रवत्वं नोच्छिद्यते घृतादौ जलसम्बन्धस्य प्रतिबन्धकत्वेन प्रकृते द्रुतान्तराभावेन तेजस एव तथा सामर्थ्यकल्पनात्। अपूर्वकल्पनातः पूर्वसजातीयकल्पनायाः पूर्वतनाचार्यैः पूरितत्वात्। यदि च द्रुततेजोमिलितं मध्यमध्यासितस्यास्य जलमिलितमषीलक्ष्यं तदा न काप्यनुपपत्तिरिति तर्ककार्कश्यविलासलालसमनसां सुमनसामस्मत्प्रदर्शितनयेन सुगमः पंथाः। ननु तेजसि तत्र कथं रसानुपलब्धिरत आह तत्रेति। इति तेजः॥

(व्यो०) इदानीं उद्देशवतस्तेजोलक्षणपरीक्षार्थमाह—तेजस्त्वाभिसम्बन्धादिप्रकरणम्। तेजस्त्वेनाभिसम्बन्धस्तेजस्त्वोपलक्षितसमवायो लक्षणमिति। तथाहि—तेज इतरस्माद्भिद्यते तेजस्त्वाभिसम्बन्धाद्ये तु न भिद्यन्ते न ते तेजस्त्वाभिसम्बन्धाः, यथा क्षित्यादयः, न च तथा तेजः, तस्मादितरस्माद्भिद्यत इति। व्यवहारो वा साध्यते। तथा तेजश्शब्दस्य सामान्यवाचकत्वं इति ज्ञापनार्थमतीन्द्रियशक्तिप्रतिषेधार्थञ्च पूर्ववद्व्याख्येयम्। एवं समवायित्वगुणवत्त्वप्रतिपादनार्थं च रूपादिवाक्यम्। तथाहि रूपस्पर्शादयः संस्कारपर्यन्ता विद्यन्ते यस्य तत्तद्वदिति।

पूर्ववदेषां सिद्धिरिति। यथा पृथिव्याधिकारे रूपादयो विशेषगुणा गुणविनिवेशाधिकारे सिद्धास्तद्वदिहापीति। तथा तेजो रूपरसस्पर्शवदिति सूत्रेण विशेषगुणा उक्तौ तौ चासाधारणत्वादितरस्माद्भेदकावित्यसाधारणतामाह। शुक्लं भास्वरञ्च रूपं प्रकाशनशीलमिति। उष्ण एव स्पर्शः न स्पर्शान्तरमिति। नैमित्तिकञ्च द्रवत्वमिति सं-

रूपादयश्च पूर्ववदिति । त्रपुसीसलोहरजतसुवर्णानां तैजसानामग्निसंयोगाद्द्रवता सम्पद्यते । अद्भिः सामान्यं यथा भवतीति सूत्रेण द्रवत्वमुक्तम् ।

लक्षणेन लक्ष्यमाणस्यैकानेकत्वोपलब्धौ संशये सति तन्निरासायाद्वैतवादिनश्च प्रतिषेधाय सामान्यसमर्थनाय बीजसद्भावप्रतिपादनाय च तदपि द्विविधमिति पूर्ववद्वाक्यं व्याख्येयम् । तथाहि—न केवलं पृथिव्युदकञ्च द्विविधम् । किन्तर्हि ? एतदपीति । तेजोपि द्विविधमिति । केन रूपेणेत्याह अणुकार्यभावादिति । परमाणुस्वभावं नित्यं कार्यस्वभावं चानित्यम् । कार्यस्याचानन्त्यादपरिज्ञानं मा भूदित्याह कार्यं शरीरादित्रयमिति । शरीरमिन्द्रियं विषयमित्यनेन रूपेण ज्ञेयमित्यवान्तरवैधर्म्यम् । शरीरस्य सामान्यलक्षणमुक्तमित्युत्पत्तिरेवोच्यते शरीरमयोनि जमेवेति।अयोनिजं हि शुक्रशोणितसन्निपातानपेक्षम् । धर्मविशेषसहितेभ्योऽणुभ्य इति । तैजसाः परमाणवः समवायिकारणं तत्संयोगाश्चासमवायिकारणं पार्थिवाद्यवयवाश्च निमित्तकारणमिति । तच्चादित्यलोके सिद्धमागमात् । अथ तेजोवयविनः क्षणिकतायां तदारब्धं विशिष्टोपभोगाजनकमित्याह । पार्थिवावयवोपष्टंभाच्चोपभोगसमर्थमिति । तच्च शरीरं सामान्यलक्षणलक्षितत्वे सति तेजोवयवैरारब्धत्वादितरस्माद्भिद्यत इति विशेषलक्षणं ज्ञेयम् ।

अथेन्द्रियस्वरूपनिरूपणार्थमाह—इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकमिति । रूपोपलब्धिः करणकार्या क्रियात्वाद्या या क्रिया सा सा करणकार्या, यथा छिदिक्रिया, तथा चेयं क्रिया तस्मात्करणकार्येति । यद्रूपोपलब्धेः सम्पादकं करणं तच्चक्षुरिति । तच्च तैजसं रूपादिषु मध्ये नियमेन रूपव्यञ्जकत्वात् यद्यद्रूपादिषु मध्ये नियमेन रूपव्यञ्जकम् तत्तैजसम् यथा प्रदीपं, तथा च रूपादिषु मध्ये नियमेन रूपव्यञ्जकं चक्षुस्तस्मात्तैजसमिति । चक्षुषो हि रूपवद्द्रव्यादिप्रकाशकत्वोपलब्धेर्नियमेन रूपप्रकाशकत्वमसिद्धं स्यादिति रूपादिषु मध्य इति पदम् । रूपरसगन्धस्पर्शेषु मध्ये नियमेन रूपव्यञ्जकत्वं विवक्षितमिति । अथ तैजसत्वाच्चक्षुषा रूपस्येवोष्मप्रकाशकत्वमपि स्यात् , तस्य हि तैजसत्वात्संयुक्तसमवायस्याविशेषादन्यस्य च विशेषहेतोरभावादित्याह अन्यावयवानभिभूतैस्तेजो-

वयवैरारब्धं चक्षुरतो रूपस्यैव व्यञ्जकम् । तथाहि-ईषत्पार्थिवावयव-संयुक्तैरनभिभूतैस्तेजोवयवैरारब्धं चक्षुरिति रूपस्यैव व्यञ्जकम् । अथेत्थंभूतारम्भे किं प्रमाणम् ? कार्यनियमः । तथाहि—चक्षु-र्व्यापाराद्रूपादिषु मध्ये रूपस्यैवोपलब्धिर्दृष्टा । सा च कारणनियमं विना न स्यादित्यन्यस्यासम्भवाद्विशिष्टोत्पादोऽत्र निमित्तम् । स चादृष्टात् रूपोपलब्धिसम्पादकात्तस्य हि वस्तुव्यवस्थाहेतुत्वादिति । अस्य च सूत्रस्येदं भाष्यम् । भूयस्त्वाद्रूपवत्त्वाच्च रूपज्ञाने प्रकृतिः कारणं तेज इति । रूपं ज्ञायते ऽनेनेति रूपज्ञानं चक्षुस्तस्मिन्नुत्पाद्ये प्रकृतिः कारणं तेजो भूयस्त्वान्निमित्तादतो रूपस्यैव प्रकाशकमिन्द्रियञ्चेति । भूयस्त्वं हि भूयसां तेजोवयवानां विशिष्टादृष्टोपगृहीतानामीषदितरावयवसम्पर्के चारम्भकत्वमिति । यदि वा रूपे ज्ञानं तस्मिन्नेव रूपादिषु मध्ये कारणं चक्षुः । कुत इत्याह—भूयस्त्वाद्व्याकृताद्रूपवत्त्वाच्चेति । रूपवत्त्वं हि रूपोत्कर्षो विवक्षितः, अन्यथा हि तैजसत्वादुष्णस्पर्शवत्त्वमपि संभाव्यत इति विशेषाभिधानमनर्थकं स्यात् । यदि वा रूपादिषु मध्ये रूपस्यैवोपलम्भान्यथानुपपत्त्या ज्ञायते रूपोत्कर्षः । कुतो भवतीत्याह-भूयस्त्वादुक्तरूपादिति । अथ महत्त्वादनेकद्रव्यत्वाच्चक्षुषः कस्मादिन्द्रियेणोपलंभो न भवति ? प्रदीपस्येव विशिष्टरूपाभावाद्यत्र हि रूपवद्द्रव्यस्य चक्षुस्पर्शनाभ्यामुपलंभ इति । रूपविशेषस्तु यत्कृतार्थोचाद्विषये रूपोपलब्धिर्यदभावाच्च महदनेकद्रव्याश्रयस्याप्यनुपलब्धिस्स उद्भवसमाख्यातो रूपधर्मसहकारिविशेष इति । दृष्टं च रूपविशेषाभावाद्वारिस्थिते तेजसि महदनेकद्रव्यत्वेप्यग्रहणम् उद्भूतरूपस्य । प्रदीपस्यान्धकारेपि ग्रहणम् । उपभोगार्था हि सृष्टिर्भावानामिति रूपस्योद्भवे चक्षुषोऽन्धकारेपि ग्रहणे दृष्टसत्त्वानामुपभोगानुत्पत्तिः स्यादिति तदुपभोगप्रापकादृष्टवशेनानुद्भूतरूपं चक्षुर्जनितं प्रजापतिना । तथोष्णस्पर्शोद्भवेप्यनेकचक्षुस्सान्निपातात्प्रीतिकरे वस्तुनि नर्तक्यादौ ग्रीष्मसमयेत्युष्णैर्मरीचिभिरिव दाहः स्यादित्यदृष्टवशादेवोष्णस्पर्शस्याप्यनुद्भवः कल्प्यते इति ।

विषयस्वरूपनिरूपणार्थमाह—विषयलक्षणं विषयस्वरूपम् । चतुर्विधमिति । केन रूपेणेत्याह—भौमं दिव्यमुदर्यमाकरजञ्चेति । विषयलक्षणेन शरीरेन्द्रियाद्व्यावृत्तस्य विषयस्यावान्तरवैधर्म्यमेतदिति ।

तत्र भूमौ भवं भौमम् । काष्ठान्येवेन्धनानि यस्य तेभ्यः प्रभवत्युत्पद्यते इति तत्प्रभवमितीन्धनविशेषादितरस्माद्भिद्यते । तच्चोर्ध्वज्वलनस्वभावमिति अमुष्मादपि इतरस्माद्भिद्यत एव । यदेवार्थक्रियाकारि तदेव परमार्थसदिति दर्शनस्य सत्तासम्बन्धेनापि सत्त्वाभ्युपगमवादेन प्रतिषेधार्थः । क्रियानिरूपणञ्च न स्वेदनादिसमर्थमिति । दिव्यमबिन्धनविशेषाद्विशिष्यते इत्याह—अबिन्धनमिति । आपः इन्धनं यस्य न त्वाप एवेति । तच्च सौरमित्यादित्यसम्बद्धम । विद्युदादीत्यादिपदेन उल्कापातादिग्रहणमिति । एवमुदरे भवमुदर्यम् । तच्च भुक्तस्याहारस्य रसादिपरिणामेति । रसमलधातुपरिणामार्थम । परिणामश्च परमाणुषु पूर्वरूपादिनिवृत्तौ उत्पन्नपाकजैर्द्व्यणुकादिप्रक्रमेण रसादिद्रव्यारम्भ इति वक्ष्यामः पाकजोत्पत्तौ । आकरजं चेति । आकराज्जातं सुवर्णादि । आदिग्रहणात्त्रपुसीसलोहरजतानां ग्रहणम् । अथैतेषां तैजसत्वे किं प्रमाणम् ? आगमः "तथा चाग्नेरपत्यं प्रथमं सुवर्णम् इत्यादि वैष्णवी ? सूर्यसुताश्च गावः" इति । अथाग्नेर्जातं तज्जातीयं भवतीति अनेकान्तादसाधनमेतत् तथा चाग्नेर्जातं धूमादि न तज्जातीयम्, तदसत् अपत्यव्यवहारस्य साजात्यापेक्षयैव दृष्टत्वात् । तथाहि—न कार्यमात्रे अपत्यव्यवहारो दृष्टः । किं तर्हि ? समानजातीये यथा मानुषापत्यमिति । नन्वेवं चेतनेष्वेवापत्यव्यवहारोपलब्धेरचेतनेऽनुपपत्तिः । न । तेजोधिष्ठायकचेतनस्य चेतनतया तदपेक्षयास्योपपत्तेः । यदि वाग्निकार्यस्यानेकत्वेऽप्यग्नेरपत्यं सुवर्णमिति विशेषाभिधानात्समानजातीयत्वं लभ्यते । अविशेषविवक्षायां तु कार्यान्तरमपत्यमित्यभिदध्यात्, आगमान्तराद्वा विशेषप्रतिपत्तिरित्यलम् । तथा प्रथमं सुवर्णम् इत्यभिधानाद्गुरुत्वाधिकरणत्वात् पार्थिवं सुवर्णादीत्यनुमानमागमबाधित्वादप्रमाणम् । आगमिके हि विषयेऽनुमानप्रवृत्तेः प्रतिषेधात् । तेषां तैजसत्वे रसाद्युपलब्धिस्तर्हि कथम् ? संयुक्तसमवायात् । तथाहि—संयुक्तं सुवर्णादौ पार्थिवं द्रव्यं तत्र समवेता रसादयः उपलभ्यन्त इत्याह—तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति । अथ द्रव्यत्वमप्येवमस्तु, किमर्थं तस्य तेजोगुणवत्त्वमिति चेत् । न पार्थिवादस्य विशेषोपलब्धेः । तथाहि—पार्थिवं लाक्षादि अग्निसंयोगाद्द्रवतामापाद्यमानं दृष्टम् । सुवर्णादौ च भृशमप्यग्निसंयोगातिशयेन द्रवत्वमेव । उष्णस्पर्शानुद्भवश्चात्राऽदृष्टात् ॥ इति तेजः ॥

(भा०) वायुत्वाभिसम्बन्धाद्वायुः। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान्। स्पर्शोऽस्यानुष्णाशीतत्वे सत्यपाकजः। गुणविनिवेशात् सिद्धः। अरूपिष्वचाक्षुषवचनात् सप्त संख्यादयः। तृणकर्मवचनात् संस्कारः। स चायं द्विविधोऽणुकार्यभावात्। तत्र कार्यलक्षणश्चतुर्विधः—शरीरमिन्द्रियं विषयः प्राण इति। तत्रायोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्। इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं शरीरव्यापि त्वगिन्द्रियम्। विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्शशब्दधृतिकम्पलिङ्गः तिर्यग्गमनस्वभावो मेघादिप्रेरणधारणादिसमर्थः। तस्याप्रत्यक्षस्यापि नानात्वं संमूर्छनेनानुमीयते। संमूर्छनं पुनः समानजवयोर्विरुद्धदिक्क्रिययोर्वाय्वोः सावयविनोरूर्ध्वगमनेनानुमीयते तदपि तृणादिगमनेनेति। प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदात् प्राणापानादिसंज्ञां लभत इति॥

(सू०) वायुत्वेति। वायुत्वं नाम जातिभेदस्तस्याभिमतसम्बन्धं समवायमन्तर्भाव्य वायुः पक्षीकृत इति शेषः। न च तादृशे मानाभावः, स्पर्शविशेषस्य वह्निमात्रस्य च जनकतावच्छेदकत्वेन च तत्सिद्धेरिति भावः। वायोर्द्रव्यत्वसिद्ध्यर्थं गुणानाह स्पर्शेत्यादि। स्पर्शवत्तामात्रं पृथिव्यादौ गतमत आह स्पर्शोऽस्येति। अस्य—वायोरनुष्णाशीतापाकज—साधर्म्यमित्यर्थः। अत्रानुष्णपदेन तेजसः अशीतपदेन जलस्य अपाकजपदेन पृथिव्यादेर्व्युदासः। न चावयविनां घटादीनां स्पर्शस्य

पाकजन्यत्वासम्भातिव्याप्तिताद्वस्थ्यम्, अपाकजपदेन पाक-जस्पर्शवद्वृत्तिद्रव्यविभाजकधर्मसमानाधिकरणस्य पृथिव्यवृत्तेर्वा विवक्षितत्वात् इति भावः। स चेति। निरुक्तस्पर्शश्चेत्यर्थः। वायुः स्पर्शवानिति सूत्रसिद्ध इत्यर्थः। संख्यादिषु सूत्रकार-संमतिमाह अरूपिष्विति। अरूपिषु नीरूपयावत्द्रव्येष्वचाक्षुष-संख्यादिवचनाद्वायौ सप्त संख्यादयः सिद्धा इति विभक्तिव्यत्ययेनान्वयः। यद्यपि संख्यादीनां प्रत्येकं वायुत्वेऽप्यतिप्रसक्तम्, तथापि नीरूपस्पर्शवद्वृत्तित्वेन विशेषितमेव संख्यापृथक्त्वसंयोगविभागानां प्रत्येकधर्मवत्त्वं साधर्म्यम्। परत्वापरत्वसंस्कारास्तु नीरूपस्पर्शवद्वृत्तित्वेनैव विशेषितास्तथेत्यदोषः। तृणेति। तृणे कर्म वायुसंयोगात् इति सूत्रकारवचनात्संस्कार इत्यर्थः। तथाच नोदनाद्यजन्यं बाणादिकर्म वेगवद्द्रव्याभिघातजं विलक्षणक्रियात्वादित्यनुमाने तस्य तात्पर्यादिति भावः। ननु यद्यसावणुरेव तर्हि तदीयस्पर्शो न ग्राह्यः स्यादणुगतस्पर्शस्यातीन्द्रियत्वनियमात्,अथाणुभिन्न एव तदावयवधारायां अनवस्था अणुभिन्नमूर्तानां सावयत्वनियमादत आह स चायमिति। अयं वायुर्द्विविधोऽणुलक्षणोऽणुभिन्नस्वरूपः। तत्र तयोर्मध्ये। चत्वारो विधा दर्शयति शरीरमिति। ननु वायवीयत्वे तस्यायोनिजत्वे पृथिवीत्वापत्तौ वायुत्वव्याघात इत्यत आह तत्रायोनिजमेवेति। तत्र वायौ शरीरमित्यग्रेऽन्वयः। सप्तम्यर्थः समवेतत्वम्। तत्र तेषु शरीरादिषु मध्ये इत्याचार्याः। तादृशदेहयोग्यानुपलब्धेर्बाधं निरस्यति मरुतां लोक इति। वायुत्वं शरीरवृत्ति द्रव्यारम्भकनित्यवृत्तिजातित्वादित्यनुमानादेव तत्सिद्धेरिति भावः। ननु पार्थिवान्यस्य भोगावच्छेदकपार्थिवावयवोपष्टम्भत्वनियमात्तदनुपष्टम्भस्य कथमुपभोगावच्छेदकत्वमत आह पार्थिवेति। चोऽव-

धारणे । पार्थिवावयवोपष्टम्भादेवेत्यर्थः । उपभोगस्य समर्थमव-च्छेदकम् । वायवीयमिन्द्रियमाह इन्द्रियमिति । सर्वप्राणिनां पार्थि-वाप्यादिसर्वजातीयप्राणिनां रूपग्राहकं वाय्ववयवैरारब्धं त्वगि-न्द्रियं त्वगिन्द्रियसंज्ञकमित्यर्थः । कुष्ठाद्युपहतचर्मणां स्पर्शग्राह-केन्द्रियसत्त्वे मानाभावादाह पृथिव्यनभिभूतैरिति । नन्वगिन्द्रि-यं यदि करचरणादीनामेकमात्राधिष्ठेयं तदाऽन्यसंयुक्तदशायां घटादेः स्पार्शनं न स्यादत आह सर्वशरीरव्यापीति । सर्वावय-वावच्छेदेन शरीरवृत्तीत्यर्थः । केशदन्तनखलोम्नां न शरीरावय-त्वं देहानन्तरमेव तदुत्पादस्यागमसिद्धत्वादतो नातिप्रसङ्गः । विषयात्मकं वायुमाह उपलभ्यमानेति । साक्षात्कारयोग्यस्पर्शा-श्रयीभूत इत्यर्थः । तेन यस्य वायोः स्पर्शो नोपलभ्यस्तत्र ना-व्याप्तिः । वायोर्नीरूपत्वे प्रत्यक्षसम्भवात्तत्रानुमानमाह स्पर्शेति । स्पर्शः शब्दो धृतिः कम्पश्च लिङ्गानि यस्य स तथा । तथा-हि व्यजनचालनोत्तरमनुभूयमानः पृथिव्याद्यवृत्तिस्पर्शो द्रव्या-श्रितः स्पर्शत्वाद्घटस्पर्शवत् । एवं पत्रादेर्मर्मरशब्दः सवेगस्प-र्शवद्द्रव्याभिघातजो विलक्षणशब्दत्वात् दलद्वयविभागजशब्द-वत् । तथा धृतिः वेगवद्द्रव्यसंयोगप्रयुक्ता अप्राणिगुरोरप-तनत्वात् नौकादिपतनवत् । पक्षिप्रभृतेः प्रयत्नप्रयुक्ते तदपतने न व्यभिचारः । एवमश्वत्थदलादेः कंपः सस्पर्शवेगवद्द्रव्याभिघात-जः कर्मविशेषत्वात् दण्डाभिहतघटादिक्रियावत् इत्यादिप्रयोगसं-भवादिति भावः । तिर्यग्गमन इति । तिर्यग्गमनस्वभावोऽस्य कादा-चित्कत्वं फूत्कारादेः सरलगतिर्विशेषसामग्रीवशादिति । मेघादी-ति । आदिना पत्रघर्मादिप्रेरणम् । संचारो धारणम् पतनप्रतिबन्ध-कम् । आदिना शैत्याद्युपष्टंभः । तेषु समर्थोऽनुकूल इत्यर्थः ॥ इति वायुः ॥

(से०) इदानीं रूपादिषु स्पर्शमात्रगुणं वायुं निरूपयति—वा-

युर्जात्यभिन्नद्रव्यविभाजकोपाधिमाननेकवृत्तिद्रव्यविभाजकोपाधिमत्त्वात् पृथिवीवत्। वायुत्वस्यानेकसमवेतत्वनित्यत्वयोर्जातिस्वरूपयोर्बाधकाभावात्। न च क्लृप्ततया पाकजानुष्णाशीतस्पर्शेनैव वायुत्वव्यवहारः, तस्याननुगततयाऽनुगमकजातिविशेषान्तर्भावेन प्रकृतोपाध्यन्तर्भावेन वा शक्यते गौरवात्, भ्रमदशायां शीतो वायुरिति प्रत्ययाच्च। तथा सति शीतोष्णाशीतापाकजस्पर्श इति प्रत्ययार्थः स्यात्। स च विरुद्धविषयकतयाऽनुपपन्नः नहि विशेषदर्शने सति भ्रमा विभ्रमं बिभ्रति। अपि चावयवगतप्रकृतस्पर्शसमवायिकारणतावच्छेदकमनित्यवायुत्वम्। नच वायुत्वासिद्धौ इदं सिध्यति दण्डत्वासिद्धौ नीलदण्डत्वासिद्धेः। न च तादृशस्पर्शवत्त्वमेव तत्, प्राग्दर्शितनयात्। नच प्रकृतस्पर्शात्यन्ताभावविरोधिमत्त्वस्पर्शात्यन्ताभावात्यन्ताभाववत्त्वप्रकृतस्पर्शात्यन्ताभावानधिकरणत्वेषु एकं तथा, विनिगमनाविरहात् नानार्थत्वापत्तेः। शीतो वायुरित्यादिप्रत्ययविरोधाच्च प्रकृतस्पर्शात्यन्ताभावात्यन्ताभावादेः शीतादिविरोधित्वात्, तस्माद्वायुत्वं जातिसिद्धम्।

तस्य द्रव्यत्वसाधकतया गुणानाह स्पर्शेति। येन रूपेण वायुत्वव्यवस्थापकता स्पर्शस्य तदाह स्पर्श इति। अत्र सत्यन्तेन जलतेजसोर्व्यावृत्तिः, अपाकज इति पृथिव्याः। अपाकजत्वञ्च पाकाप्रयोज्यत्वं, तेन न पार्थिवावयविन्यतिव्याप्तिः। तत्सिद्धिस्तु व्यापकनिवृत्त्याऽवान्तरविशेषस्य पाकजत्वव्यापकत्वात् पृथिव्यां मृदुकठिनत्वादेरिव वायुस्पर्शे तदभावात्। वायुः स्पर्शवान् इति सूत्रेण स्पर्शवत्त्वसिद्धिः। स्पर्शवतां विना द्रव्यारम्भकत्वानुपपत्तेश्च स्पर्शवत्परमाणुत्वेनैव द्रव्यारम्भकत्वात्। अन्यथा मनसोऽपि तदापत्तेः। अरूपिद्रव्यसमवायेन संख्यादिष्वचाक्षुषत्वं वदता सूत्रकृता बाधकं विना सामान्यशब्दस्य विशेषनिष्ठत्वकल्पनेन वायावपि अरूपिद्रव्ये समवायः स्वीकृतः। परमाण्वादिषु संख्यां विना द्व्यणुकादिषु परिमाणानुपपत्तिः तदभावेऽग्रिमकार्ये तदभावः, संयोगाभावेऽसमवायिकारणाभावाद् द्व्यणुकाद्यनुत्पत्तिः, विभागाभावे परमाणुद्वयसंयोगस्य नित्यतया द्व्यणुकनाशानुपपत्तिः, पृथक्त्वाभावे सङ्ख्यापरिमाणयोरनुपपत्तिः व्यापकनिवृत्तेः, संयुक्तसंयोगाऽल्पीयस्त्वादेः परत्वादिकारणसुलभत्वात् परत्वापरत्वयोरपि सिद्धिः। तृणे कर्म वायुसंयोगादिति सूत्रेण संस्का-

रः सिद्धयति । तस्य हि नोदनत्वाभिघातत्वाभ्यां कारणता तत्र च परत्ववेगप्रवेश इत्याह गुणेत्यादिना । अणुकार्यभावाद्-अकार्यकार्यभावात् । पृथिव्यादीनां कार्यं त्रिविधं वायोस्तु चतुर्विधमित्याह तत्रेति । स्पर्शवत्परमाणुतया वायुपरमाणूनां त्रितयारम्भकत्वे सिद्धे शरीरारंभकत्वमपि सिध्यति । तच्च शरीरमयोनिजमेव शुक्रादेरभावात् । स्थितिरस्य वायुलोके । उपभोगसामर्थ्यं तु पार्थिवाद्यवयवोपष्टंभादित्याह तत्रेति । पूर्वेणेन्द्रियारम्भकत्वे सिद्धे तत्त्वगिन्द्रियमेव । तत्त्वगिन्द्रियं वायवीयं रूपाव्यञ्जकत्वे सति परकीयस्पर्शव्यञ्जकद्रव्यत्वात् स्वेदशैत्याभिव्यंजकव्यजनपवनवत् । मनसि व्यभिचारवारणाय सत्यन्तम् । ऊष्मणां प्रत्यासत्तिघटकतया स्वस्पर्शव्यञ्जकव्यभिचारवारणाय परकीयेति । प्रत्यासत्तौ तद्वारणाय द्रव्यत्वादिति । तुल्यन्यायतया सर्वेषामेव त्वगिन्द्रियं वायवीयं क्वचित्स्पर्शाव्यञ्जकमभिभूतात्वधत्वादभिभूतत्वाद्वेत्याह इन्द्रियमिति । सर्वशरीरव्यापीत्यनेन यावति त्वगिन्द्रियं तावदेव शरीरमित्युक्त्या केशादीनां त्वगिन्द्रियानाधारत्वान्न शरीरत्वं किन्तु संयोगिद्रव्यत्वमात्रमित्युक्तं भवति ।

विषय इति । उपलभ्यमानस्पर्शत्वेन वायोः प्रत्यक्षत्वं वार्यतेऽथ पाताभिधाने वैयर्थ्यात् प्रत्यक्षे पृथिव्यादौ तथानभिधानात् । ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् प्रत्यक्षो वायुः । उपलभ्यमानस्पर्शाधिष्ठानित्वं तु प्रत्यक्षत्वसाधकतयैव प्रत्यक्षत्वे विप्रतिपन्नं प्रति भाष्यकृता निरुक्तम् । न चोष्मणि व्यभिचारः, पक्षसमत्वात् । ननूद्भूतरूपवत्त्वं उपाधिः, नच रूपादौ साध्याव्यापकता, बहिर्द्रव्यत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात् । यत्र बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं तत्र घटादौ वा रूपसत्त्वात् साध्यव्यापकत्वात् । बहिर्द्रव्ये प्रत्यक्षस्पर्शाश्रये वायौ रूपासत्त्वेन साधनाव्यापकत्वात् । न चाप्रयोजकतया न स साध्यव्यापको, बहिर्द्रव्यप्रत्यक्षानुगतस्य कार्यस्य तस्यैवानुगतस्य कारणत्वात् । न तावत् बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं कार्यमहत्त्वगुणसमानाधिकरणविशेषगुणवत्त्वं वा तत्र प्रयोजकं, रसनगतपित्तद्रव्यस्योद्भूततिक्तरसस्य वायूपनीतोद्भूतगंधचम्पकादिभागस्य च प्रत्यक्षत्वापत्तेः । नापि बहिरिन्द्रियग्राह्यानेकविशेषगुणवत्त्वं, प्रभाया त्रसरेणोश्चाप्रत्यक्षत्वापत्तेः तत्र रूपमात्रस्य प्रत्यक्षत्वात्, तस्मात् महत्त्वस-

द्रव्यत्वमुद्भूतरूपवत्त्वमेव तत्र प्रयोजकं तथा चोपाधिः साध्यव्यापक इति चेत्। नोद्भूतरूपापेक्षयोद्भूतस्पर्शस्यैव सामान्यस्य प्रयोजकत्वौचित्यात्। न च वायोः प्रत्यक्षत्वे तद्गतसंख्यादिप्रत्यक्षतापत्तिः पृष्ठलग्नवस्त्रादेस्तदप्रत्यक्षत्वेऽपि प्रत्यक्षत्वात्, तस्माद्वायुः प्रत्यक्षः। अपि च त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतेर्वायुः प्रत्यक्षः। न च स्पर्शं गृहीत्वा तेनैव लिङ्गेन वायुर्वातीति प्रत्येतीति वाच्यम् ।वायुलिङ्गस्यानुष्णाशीतापाकजस्पर्शस्याप्रत्ययेपि शीतो वायुर्वातीति प्रत्ययात्। स्पर्शेन वायोरनुमाने च स्पर्शोयं क्वचिदाश्रित इत्याद्याकारिकानुमितिः स्यात्, तस्याः प्रसिद्धसाध्यकस्थले पक्षविशेष्यकत्वनियमात् न त्वनुमेयवायुविशेष्यकापि च स्पर्शेन वाय्वनुमानेपि तत्र गतिप्रतीतिर्न स्यात्। प्रत्यक्षत्वं वायोस्तद्गतकर्मणोऽपि प्रत्यक्षत्वात् उपपद्यते। न च संयोगविभागाभ्यां गत्यनुमानं, तयोरप्रत्यक्षगतयोरप्रत्यक्षत्वात्। न च सुखदुःखविशेषाभ्यां संयोगविभागावनुमाय ताभ्यां तदनुमानम्, सर्वस्य वायोः सुखदुःखाजनकत्वेन सुखदुःखाजनकेऽपि वायौ वायुर्वातीति प्रतीतेः। न हि सर्वासु अवस्थासु वायुसंयोगे विभागे सुखं दुःखं वाऽऽवश्यकमिति प्रामाणिकम्, भवति तु ग्रीष्मोष्मतप्तजन्तोः पवनसंयोगे सुखं तद्विभागे च दुःखमेवमन्यत्रापि क्वचित्, न तु सर्वत्र। भवति तु सुखदुःखाभावस्थलेऽपि वायुर्वातीति प्रतीतिरिति। न च वायोः स्पार्शनत्वे चाक्षुषप्रत्यक्षत्वमपि स्यात् द्रव्यस्य तथाभूतस्यैव स्पार्शनत्वनियमादिति वाच्यम्। बाध्यमानप्रयोजकत्वेन तथा नियमानङ्गीकारात्। न हि द्रव्यचाक्षुषत्वं द्रव्यस्य स्पार्शने कारणं चक्षुषानुपलंभेऽपि अन्धकारे त्वचा घटोपलंभात्। न च विनिगमनाविरहात् रूपस्पर्शयोरुभयोरपि प्रत्यक्षत्वप्रयोजकत्वम्, सामान्यविशेषभावेनोत्सर्गस्यैव विनिगमकत्वात्। न चोद्भूतस्पर्शस्य प्रयोजकत्वे प्रभाया अप्रक्षत्वापत्तिः, इष्टापत्तेः। तत्र ग्रहणं तु तेजोरूपस्यैव, तस्माद्वायुः प्रत्यक्ष इति चेत्।

अत्राहुः-उद्भूतस्पर्शवत्त्वस्य प्रयोजकत्वे प्रभाया अप्रत्यक्षत्वं स्यात् तथासति चलति पक्षकादौ प्रभारूपदर्शने तत्संयोगविभागयोर्ग्रहणं न स्यात्। न च पूर्वदेशानुपलंभोत्तरदेशोपलभाभ्यां विभागसंयोगयोरनुमानम्, देशस्य मानसतया तत्रोपनीतस्य देशस्य भानात् का प्रत्यक्षापेक्षेति वाच्यम्। उपनायकत्वेन तत्र प्रत्यक्षापेक्षणात्। तस्मादुद्-

भूतरूपवत्त्वमेव प्रत्यक्षताप्रयोजकमिति वायुरप्रत्यक्ष इति ।

परे तु—उद्भूतरूपवत्त्वस्य प्रत्यक्षताप्रयोजकत्वे नयनगतपित्तद्रव्यप्रभयोः प्रत्यक्षता स्यात् । इष्टापत्तौ तद्गतसंख्यादिग्रहणापत्तिरनिष्टा स्यात् । एवमुद्भूतस्पर्शवत्त्वस्य प्रयोजकत्वे ग्रीष्मोष्मप्रभृतेरपि प्रत्यक्षसंख्यादिव्याप्यं प्रत्यक्षत्वं स्यात्, तथाच सामान्यतया प्राप्तमुत्सर्गमुल्लंघ्यापि विनिगमनाविरहात् रूपस्पर्शवत्त्वे प्रत्यक्षत्वप्रयोजके, तथाच तदभावात् वायुरप्रत्यक्ष इति कीर्तयन्ति ।

नच तत्र नये प्रभाया अप्रत्यक्षत्वे पक्ष्यादिसंयोगाप्रत्यक्षत्वापत्तिः, नयद्वयेऽपि वायोरप्रत्यक्षत्वस्वीकारे संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगकर्मणामप्रत्यक्षत्वापत्ति । न चेष्टापत्तिः, क्रमेण हस्तलग्ने संख्यायाः अर्धकरतलाद्यवच्छेदेन लग्ने परिमाणस्य क्रमेण लग्ने पृथक्त्वस्य करतलादौ लग्ने संयोगस्य तद्विहाय गते विभागस्य कफोणिकरतललग्नयोरन्यफूत्कारयोरपरत्वपरत्वयोर्मन्दामन्दभावेन प्रसरतोर्वेगकर्मणोश्च प्रत्यक्षत्वात् । अपि चोद्भूतरूपवत्त्वस्य प्रत्यक्षत्वप्रयोजकत्वे प्रभा त्वचा परिच्छिद्येत । न च त्वाच एव उद्भूतस्पर्शवत्त्वं प्रयोजकमिति वाच्यम् । चाक्षुषत्व एवमुद्भूतरूपवत्त्वस्य प्रयोजकत्वे सामान्यप्रयोजककल्पनानौचित्यात् इति वायुः प्रत्यक्ष इति । एवञ्चैवं पर्यवसन्नम्–द्रव्यचाक्षुषत्व उद्भूतरूपवत्त्वं प्रयोजकं द्रव्यस्पार्शनत्वे उद्भूतस्पर्शवत्त्वम् बहिर्द्रव्यप्रत्यक्षं तु कार्यतावच्छेदकमेव न भवति येन रूपवत्त्वस्योभयोर्वा प्रयोजकत्वे वायुरप्रत्यक्षः स्यात् । एवं च नयनगतपित्तद्रव्यादेरुद्भूतरूपवत्त्वसत्त्वाच्चाक्षुषत्वमेव वायुप्रभृतेरुद्भूतस्पर्शवत्त्वसत्त्वात् त्वाचत्वमेव घटादावुभयसमावेशेषणादुभयम् । न च वायोस्त्वाचत्वे घटवत्संख्यादेः त्वचा ग्रहणापत्तिः, महावायोः संसर्गिद्रव्यतयाऽवान्तरवायुभिरारब्धस्य त्वचा स्वसंबन्धेनैकत्वग्रहात् अवयवानां तु संख्यान्तरं मिलनेन न परिच्छिद्यते घटितघटानां कपालानामिव । परिमाणमपि यावदवच्छेदेन त्वचा सम्बन्धः तावदवच्छेदेन परिच्छिद्यत एव पर्वतादेरिव न हि चक्षुष इव त्वचोऽपि पृछप्रता(?) (स्वच्छता)येनाधिकग्रहापत्तिः स्वरूपापत्तिमासादयेत् । पृथक्त्वमपि त्वक्सम्बद्धयोर्वायुघटयोरध्यक्षमेव द्वयोस्त्वक्सम्बन्धानन्तरं घटाद्वायुः पृथगिति प्रत्ययात् । घटे वायुः संयुक्त इति करपरामर्शेन सततगतेः संयोगोऽपि नाभवत्ययोग्यः । एवं संयुज्य प्रयातस्य पवनस्य वि-

भागो नापरिभाव्य इहेदानीमतो विभक्तो वायुरिति प्रत्ययात् । पर-त्वापरत्ववेगकर्मणां तु गतिरुक्तैव । प्रभायाश्चाक्षुषत्वे संख्यादेः प्र-त्यक्षतायामस्यैव न्यायस्यानुसरणीयत्वम् । तस्मान्न वायुरस्पार्शनं इति चेत् ।

अत्र ब्रूमः बहिरिन्द्रियतज्जन्यद्रव्यलौकिकप्रत्यक्षत्वं बहिर्द्रव्यलौ-किकप्रत्यक्षत्वं वा कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्म-त्वात् घटत्ववत् न हि कार्यमात्रवृत्तिन एव कार्यतावच्छेदकाः भ्र-मत्वादीनामतथात्वापत्तौ दोषादीनां प्रमोषापत्तेः । न चात्र नी-लघटत्ववदार्थः समाजो बाधकस्तत्र न हि नीलसामग्र्या नीलगु-णस्य घटसामग्र्या घटस्य जनयानोभयोः(?) सम्बन्धेन नीलघटोपप-त्तौ नीलघटत्वेन कार्यता अन्यथैव नीलघटस्य सिद्धत्वात्, प्रकृते तु न भिन्नसामग्रीककार्यद्वयघटितं कार्यतावच्छेदकं येन तथा स्यात् । नापि जन्यघटज्ञानादाविव इह कारणासम्भवो बाधक उद्भूतरूपवत उद्भूतस्पर्शवतो वा कारणत्वसम्भवात् । एवं च महत्त्वे सत्युद्भूतरूपवत्त्वं महत्त्वे सत्युद्भूतस्पर्शवत्त्वं च तादृशा-प्रत्यक्षताप्रयोजकमिति वायुरप्रत्यक्षः । न च विनिगमनाविरहादुभ-योः प्रयोजकत्वे प्रभापक्षिसंयोगयोरप्रत्यक्षापत्तिः अस्मिन्नये कर्मणां प्रत्यक्षत्वेन तेन पूर्वदेशविभागोत्तरदेशसंयोगानुमानात् । अयं पक्षी पूर्वदेशविभागपरदेशसंयोगवान् कर्मवत्त्वादित्यनुमानसम्भवात् । येषां कर्मातीन्द्रियं तेषां का गतिरिति चेत् । अपरगृहचर्चायाः साम्प्रतमप्रस्तुतत्वात् । एवं च फूत्कारादौ संयोगविभागादिप्रतीतिः आनुमानिक्येव । न च वायोरप्रत्यक्षत्वे शीतो वायुर्वातीति प्रतीतिः कथं स्यात्, शीतस्पर्शेन वायुलिङ्गत्वारोपदशायां वाय्वनुमानेऽपि स्पर्शो वायवीय इति धीः स्यात् न तु वायुः शीत इति वाच्यम् । आनुमानिकबोधोत्तरं तथाविधमानसोपनीतभानस्वीकारात् । गत्यवगतिरपि धूल्यादिगतिविशेषाणां शरीरदुःखविशेषाणां वाय्व-भिघातजन्यत्वमनुमाय तेन कर्मानुमानात् । अयं दुःखविशेषो वाय्व-भिघातजो दुःखविशेषत्वात् इत्यनुमानसम्भवात् । शीतो वायुर्वा-तीति विशिष्टप्रतीतिरप्युपनीतबोधाद्यादाय सुगमैव उपनीतमानस-बोधस्येवासौ दुःखविशेषः शीतवाय्वभिघातजन्मा इत्याद्यनुमान-स्य सम्भवात् । निरुक्तस्य कार्यतावच्छेदकत्वे प्रमाणप्रतिपक्षे विनि-

गमनाविरहात् रूपस्पर्शयोर्द्वयोः प्रत्यक्षत्वप्रयोजकत्वे प्रमिते प्रभा-वाय्वादौ संयोगादिप्रतिपत्तेः आनुमानिकत्वेनैव प्रतिपत्तव्यत्वात्। एवं च सामान्य इव चाक्षुषत्वयोरपि तदेव प्रयोजकम्। न च सामान्यविशेषयोरेकप्रयोज्यताऽयुक्ता द्रव्यत्वेन जन्यगुणसंयोगयोः प्रयोजकत्वात्। भवतु वा चाक्षुषत्वे रूपवत्त्वं स्पार्शनत्वे स्पर्श-वत्त्वं प्रयोजकं सामान्यसामग्रीविरहादेव न प्रभोष्मणोश्चाक्षुषत्वस्पा-र्शनत्वे। न चोत्सर्गात् स्पर्शवत्त्वमेव प्रयोजकम्, ऊष्मणः प्रत्यक्षत्वे तद्गतसङ्ख्यादिप्रत्यक्षतापत्तेरुक्तत्वादिति न वायुः प्रत्यक्ष इति। न च यत्र सुखदुःखाजनकत्वं तत्र कथं कर्मप्रत्ययः? स्पर्शप्रत्य-याभ्यां संयोगविभागावनुमाय कर्मानुमानात्।

वस्तुतस्तु रूपस्पर्शयोः सामान्यविशेषभावाभावेन उत्सर्गासं-भवेऽपि नोद्भूतरूपस्पर्शयोस्तथाभावः। तथा च विनिगमनाभा-वेन द्वयोरध्यक्षताध्यक्षत्वेन जगत्प्राणः प्रत्यक्षप्रमाणप्रमेय इति। न चोद्भूतस्पर्शवत्त्वस्य प्रयोजकत्वे प्रभा प्रत्यक्षा न स्यादिति वाच्यम्। उद्भूतरूपस्य तथात्वेनोष्मा तथा स्यादिति वक्तुं शक्यत्वात्। न चोष्मणस्तथात्वे तद्गतसंख्यादिख्यातिस्त्वाची स्यादिति वाच्यम्। प्रभाया अपि तथात्वे तद्गतसंख्यादश्चा-क्षुषत्वापत्तेरभ्युपतेत्वात्। न च प्रभाया एकतया तद्गतमेकत्वं गृह्यत एव तदवयवानां त्वत्युष्णसंसृष्टतया न संख्याभेदप्रत्यय इति वाच्यम्। ऊष्मण्यप्यस्य न्यायस्य समानत्वात्। किञ्चोष्मसङ्ख्यादेः प्रत्यक्षत्वे चाक्षुषत्वं स्यादिति नोद्भूतस्पर्शवत्त्वमात्रं प्रत्यक्षताप्रयो-जकम्। न चोभयोः प्रयोजकत्वे प्रभाया अप्रत्यक्षत्वे पक्षिकाण्डादौ तत्संयोगादिग्रहो न स्यादिति वाच्यम्। रूपेण प्रभामनुमाय त-त्पूर्वापरदेशोपलंभाभ्यां विभागसंयोगयोरनुमानात्। एवं च वायुर्न प्रत्यक्ष इति सिद्धमिति सङ्क्षेपः।

न चैवमुद्भूतरसोऽपि प्रयोजके प्रविशत्विति वाच्यम्। उभय-वादिसिद्धतया प्रत्यक्षाणां वह्न्यादीनामप्रत्यक्षत्वापत्तेरिति।

अनुमेयत्वे वायोस्तत्र लिङ्गमाह स्पर्शेति। अयं स्पर्शः क्वचिदाश्रि-तस्स्पर्शत्वात् घटस्पर्शवत्। न जलानलाश्रितो अनुष्णाशीतत्वात्। न चैतदाश्रयः पृथिवी रूपरहितत्वात्। न चाभिभूतत्वादग्रहेण रूप-राहित्यमसिद्धमिति वाच्यम्। अभिभावकस्य रूपस्याभावात्। ते-

जोरूपस्य पृथिवीरूपाभिभावकत्वे घटादावपि तथात्वापत्तेः। अन्धकारेऽभिभावकाभावेन प्रत्यक्षत्वापत्तेश्च, सुवर्ण उपष्टम्भकस्येवात्र नियतसम्बद्धस्य कस्यचिदभिभावकस्याभावात्। न चोद्भूतमेव रूपं, पार्थिवरूपस्पर्शयोः पाकजतया तुल्ययोगक्षेमतयैकोद्भवे परोद्भवनियमात्।

ननु नायं नियमो नयनगतपित्तद्रव्यस्य रूपोद्भवेऽपि स्पर्शानुद्भवात्। एवं स्पर्शोद्भवे रूपानुद्भवस्य सुवचत्वात् तुल्ययोगक्षेमतया नयननिष्ठपित्तद्रव्येणैव क्षारीकृतत्वात्। अपि च पृथिव्यां रूपस्पर्शावेव पाकजाविति न, किन्तु रूपरसगन्धस्पर्शाः। एवं च तज्जन्यानां तन्महिम्ना तुल्ययोगक्षेमत्वे रसनगतपित्तद्रव्यवायूपनीतचम्पकभागयो रसगन्धयोरुद्भूततया अन्येषामपि तथात्वं स्यात् पाकजत्वे समानेऽप्यदृष्टवैषम्यात् वैषम्यस्य रूपस्पर्शयोरपि साम्यात्। एवं च शब्दधृतिकम्पा अपि अनुद्भूतरूपोद्भूतस्पर्शपार्थिववर्तिन एव द्रव्यान्तरकल्पनायां कल्पनागौरवञ्च। शीतद्रव्याद्युपनायिकापि तथाविधा पृथिव्येवेति चेत्।

अत्र वल्लभाचार्याः—त्वगिन्द्रियं न मनो बहिरिन्द्रियत्वात्, न श्रोत्रं शब्दाग्राहकत्वात्, न पार्थिवं जलीयन्तैजसं वा गन्धरसरूपाग्राहकत्वात्। न च पृथिव्यादिषु एकप्रकृतिकमेव घ्राणादि भेदात्तु न गन्धादिग्राहकत्वमिति वाच्यम्। लाघवेन पार्थिवेन्द्रियत्वादिनैव घ्राणादिषु त्वग्भिन्नत्वस्य विशेषणस्य त्वचः पार्थिवत्वादिति सिद्धिसापेक्षत्वात्। एवञ्च त्वचः पार्थिवत्वसिद्धौ घ्राणलक्षणे त्वग्भिन्नत्वं विशेषणम्, दत्ते च तस्मिन् विशेषणे पार्थिवेन्द्रियस्यापि त्वचो न गन्धग्राहकत्वमिति अन्योन्याश्रयः। तस्मात्त्वगिन्द्रियोपादानत्वेन द्रव्यान्तरसिद्धौ वायुत्वं तत्प्रसिद्धस्यापि भुक्ताप्रभंजनादेः तत्रैवान्तर्भावः। पृथिवीत्वे रूपानुद्भवादितदुपपादकादृष्टकल्पनागौरवात्। गौरवाभावाच्च न पार्थिवम् धूमे त्वधूमतामापन्ने गौरवावसायात् वायौ तु कस्यामपि दशायां तदभावात्। एवं च शब्दादयोऽपि रूपवद्द्रव्यमन्तरा भवन्तस्तत्कृता एवेति संक्षेपः।

शब्दादिषु अनुमानप्रकारस्तु—असौ पर्णादिषु शब्दसन्तानः स्पर्शवत्वेगद्रव्यसंयोगजन्मा विभागाजन्यशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत्। विभागजे हेतोः अभावादेव न व्यभिचारः। शब्दजे तु विभागामूलके संयोगमूलकत्वादेव केवलशब्दमूलकस्य

शब्दस्याभावात् । नभसि तृणादीनां धृतिः स्पर्शवत्द्रव्यसंयोगजा ऽस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत् । अत्र पृथिव्यादीनां बाधात् पक्षधर्मताबलात् वायुसिद्धिः । एतत्तृणकर्म नोदनाभिघा- तान्यतरजन्यं गुरुत्वाद्यजन्यकर्मत्वात् प्राच्यप्रवाहपतिततृणकर्मवत् । अत्रापि बाधात्रधूतपृथिव्यादिसिद्धिः पक्षधर्मतैव पवनसाक्षिणीति।

वह्नेरूर्ध्वज्वलनवदत्र तिर्यग्गमनं स्वाभाविकमित्याह तिर्यगिति । प्रयोजनमाह मेघादीति । ननु वायोरप्रत्यक्षत्वे तत्र नानात्वप्रत्ययः कुतः इत्यत आह तस्येति । यद्यपि अप्रत्यक्षस्य संख्या प्रत्यक्षा न भ- वति, तथापि अनुमानादवगन्तव्येत्यर्थः । न च वायुर्नाना स्पर्शवत्त्वा- त् इति एकस्मिन् घटे व्यभिचारः, प्रत्यक्षस्पर्शवत्त्वादित्यपि तथा त- त्कथं नानात्वानुमानमत आह संमूर्छनेनेति ।

ननु सम्मूर्छनमेकस्मिन् घटे घटान्तरे वास्ति न तु तत्र नाना- त्वमत आह संमूर्छनस्पुनरिति । वायुत्वमनेकवृत्ति सजातीयमूर्छन- वद्वृत्तिधर्मत्वात् जलत्ववदिति । सजातीयगर्भत्वार्थमेव वायोरित्यु- क्तम् । संमूर्छनलक्षणं तु तत्तद्वाहिर्भावेनैव अन्यथा पृथिव्यादीनां सं- मूर्छनं न स्यात् । अनुमानं तु वायुत्वमनेकवृत्ति तत्प्रयुक्तसाजात्य- कसंयोगवद्वृत्तिधर्मत्वात् जलधर्मवदित्याकारं सम्मूर्छनगर्भस्य हेतु- त्वे वैयर्थ्यात् । सजातीयसंयोगवद्वृत्तिधर्मत्वादिति हेतुत्वे तद्धट- त्वे व्यभिचारः धर्मान्तरेण यः सजातीयः तत्संयोगवत्यैतद्घटे स- त्त्वात् । संयोगगर्भत्वेनैव हेतोरुपपत्तौ सम्मूर्छनकथनं तिर्यग्गमन- स्वभावस्य वायोः कथमूर्ध्वगमनमिति शङ्कास्कन्दनार्थं निम्नाभिस- र्पणस्वभावानामपामिव सम्मूर्छनेनोर्ध्वगमनोपपत्तेः । ननु सन्निपा- तः संयोगः सोऽपि कथमतीन्द्रियस्य ज्ञातव्य इत्यत आह सोऽपीति। वायुः सम्मूर्छनवान् ऊर्ध्वगमनविशेषवत्त्वात् जलविशेषवदित्यनुमा- नात्सम्मूर्छनसिद्धिरित्यर्थः । अतीन्द्रियस्य ऊर्ध्वगमनमपि । अतीन्द्रि- यं कथं ज्ञातव्यमिति शङ्कायां तस्यानुमेयत्वमुक्तम् । अनुमानञ्च वायुरूर्ध्वगमनवान् स्वसंयोगे ऊर्ध्वगमनविशेषकारित्वात्तृणाद्यूर्ध्व- गमनकारिहुताशशिखावत् । सावयविनोरित्यनेनावयवानामवयव- विवक्षायां महत्त्वविशेषवचनेन वायुस्तृणादीन् ऊर्ध्वं नयतीति स्वभा- वोक्तिः । सावयविनोरित्यनेन महत्त्वविशेषवत्ता विवक्षिता नातस्त्र- सरेण्वादावतिप्रसक्तिः ।

चतुर्थीं विधामाह प्राण इति। शरीराभ्यन्तरचारी वायुः प्राण इत्यर्थः। विषयात्स्थानभेदमुक्त्वा क्रियाभेदमाह रसेति। आहारस्य सारो विकारो रसः, मलं मूत्रादि, धातवो रुधिरादयः शुक्रान्ताः; एतेषां प्रेरणादिहेतुरित्यर्थः। ननु प्राणस्य पञ्चविधत्वे कथं मूर्तानां समानदेशताऽत आह एक इति। यथा एक एव देवदत्तः पाठकः पाचक इति क्रियाभेदाद्व्यवह्रियते तथा एक एव शरीराभ्यन्तरचारी वायुर्मुखनासिकाभ्यां निर्गमनात् प्राण इति रसादीनामधोनयनादपान इति ऊर्ध्वनयनादुदान इति समं नयनात्समान इति नाडीमुखेषु वितननात् व्यान इति संज्ञां लभत इत्यर्थः। लाघवादपि प्राणवायुः एक एव संज्ञाभेदेन संज्ञिनो भेदाभावादिति॥ वायुः॥

(व्यो०) इदानीं वायोरुद्देशवतो लक्षणपरीक्षार्थम्। वायुत्वाभिसम्बन्धादित्यादिप्रकरणम्। वायुरिति लक्ष्यनिर्देशो वायुत्वाभिसम्बन्धादिति लक्षणम्। वायुत्वेनाभिसम्बन्धः वायुत्वेनोपलक्षितः समवाय इति। समवायो ह्यतिव्यापकत्वादलक्षणं स्यादिति वायुत्वपदम्। वायुत्वं चासम्बद्धमपक्षधर्मतया गमकं न स्यादिति पक्षधर्मताज्ञापनार्थमभिसम्बन्धपदम्। तथा च वायुत्वेनेतरस्मात् भिद्यते वायुत्वाभिसम्बन्धात् यत्तु न भिद्यन्ते न ते वायुत्वेनाभिसम्बद्धाः, यथा क्षित्यादयः। न च तथा वायुत्वेनानभिसम्बद्धो वायुः। तस्मादितरस्माद्भिद्यत इति। व्यवहारो वा साध्यते। शेषञ्च लक्षणस्य दूषणप्रतिसमाधानं पृथिव्यधिकारे ज्ञेयम्। तथा वायुशब्दस्य सामान्यवानर्थ इति ज्ञापनार्थमतीन्द्रियशक्तिप्रतिषेधार्थं च पूर्ववद्भाष्यं व्याख्येयम्। समवायित्वगुणवत्त्वप्रतिपादनार्थं स्पर्शादिवाक्यम्। स्पर्शादयः संस्कारपर्यन्ता विद्यन्ते यस्यासौ तद्वानिति। स्पर्शश्चासाधारणत्वादन्यस्माद्भेदकत्वादिति असाधारणतामाह स्पर्शोऽस्यानुष्णाशीतत्वे सत्यपाकज इति। अनुष्ण इत्युष्णस्पर्शव्यवच्छेदः। अशीत इति शीतस्पर्शादपाकज इति पार्थिवात्। स च गुणविनिवेशात् द्वितीयाध्याये सिद्धो वायुः स्पर्शवानित्यनेन सूत्रेण। अत्र च स्पर्शवानिति सामान्यशब्देनाप्यर्थादयं विशेषो विवक्षितः अनुष्णाशीतत्वे सत्यपाकजस्पर्शवानिति। अरूपिष्वचाक्षुषत्वादिति सूत्रेण संख्यादयः सिद्धाः। तथाहि—रूपविशेषवति द्रव्ये चाक्षुषाः तद्विपरीते चाचाक्षुषा इत्यपरेणापि सूत्रेण रूपिषु संख्यादीनां सद्भावोऽभिहित एव।

तथा चारूपिषु समवेताः संख्यादयः परं चक्षुर्ग्राह्या न भवन्तीति प्रतिषेधः । तथा तृणकर्मवचनादिति वायुसंयोगात्तृणे कर्मेति सूत्रं द-र्शयति । वायुसंयोगश्च तृणकर्मोत्पत्तौ सापेक्षः कारणमिति प्रयत्ना-देरभावाद्वेगापेक्षः कारणमिति संस्कारः सिद्धः । तथा वायुत्वसा-मान्यस्य भेदाधिष्ठानत्वादिति तत्समर्थनार्थाल्लक्षणेन लक्ष्यमाण-स्यैकानेकत्वोपलब्धौ संशये सति तन्निरासार्थमद्वैतवादिप्रतिषेधार्थं बीजसद्भावप्रतिपादनार्थश्च । स चायं द्विविधः अणुकार्यभावादिति वाच्यम् । तथा ह्यणुस्वभावो नित्यः कार्यस्वभावस्त्वनित्य इति ।

अवान्तरवैधर्म्यं दर्शयति । कार्यलक्षणः कार्यस्वभावश्चतुर्विध इति । केन रूपेणेत्याह—शरीरमिन्द्रियं विषयः प्राण इति । शरीरो-त्पत्तिमाह-शरीरमयोनिजञ्चेति । अयोनिजञ्च शुक्रशोणितसन्नि-पातमनपेक्ष्योपजातम् । धर्मविशेषसहितेभ्योऽणुभ्य इति । तथा-हि-वायवीयाः परमाणवः समवायिकारणम् तत्संयोगाश्चासम-वायिकारणम् क्षित्यादि च निमित्तकारणमिति । तच्च मरुतां लो-के सिद्धमागमात् । अथ वायोर्तिर्यग्गतिशीलत्वात् क्षणिकत्वा-च्च तदारब्धशरीरमुपभोगजनकं न स्यादित्याह—पार्थिवावय-वोपष्टम्भाच्चोपभोगसमर्थमिति ।

इन्द्रियस्वरूपनिरूपणार्थमाह-इन्द्रियं स्पर्शोपलम्भकमिति । त-थाहि-स्पर्शोपलब्धिः करणकार्या क्रियात्वाद्या या क्रिया सा सा क-रणकार्या यथा छिदिक्रिया । तथा चेयं क्रिया, तस्मात्करणकार्ये-ति । यत्तत्स्पर्शोपलब्धेः सम्पादकं करणं तद्वायवीयम् रूपादिषु मध्ये नियमेन स्पर्शव्यञ्जकत्वात्, यद्यद्रूपादिषु मध्ये नियमेन स्प-र्शव्यञ्जकं तद्वायवीयं दृष्टम् यथा व्यजनानिलः, तथा च रूपादिषु मध्ये नियमेन स्पर्शव्यञ्जकं त्वगिन्द्रियम् । तस्माद्वायवीयमिति । त्व-गिन्द्रियस्य स्पर्शत्वद्रव्यत्वादिव्यञ्जकत्वोपलब्धेर्नियमेन स्पर्शव्यञ्जक-त्वमसिद्धं स्यादिति रूपादिषु मध्य इति विशेषणम् । व्यजनानिले तु तद्गतस्पर्शव्यक्तौ यद्यपि रूपाद्यसम्भवः तथापि शीतादिस्पर्शव्यञ्जकत्व-सद्भावाद्विशेषणसद्भावः । अथ वायवीयत्वाविशेषे कस्मात्किञ्चिदेव स्पर्शव्यञ्जकमिन्द्रियमिति त्वगिन्द्रियं चेत्याह पृथिव्याद्यनभिभूतैर्वा-यवीयैर्विशिष्टादृष्टोपगृहीतैरीषदितरावयवसंपृक्तैः शुद्धैर्वाऽऽरब्धम् । अतः स्पर्शस्यैवाभिव्यञ्जकमिन्द्रियञ्चेति । तच्च शरीरव्यापि स-

र्वत्र स्पर्शोपलम्भाद्विज्ञातम् । तस्य च संज्ञा त्वगिन्द्रियमिति । त्वगिति शरीरावगुण्ठकं चर्म, तत्स्थानमिन्द्रियमुपचारेण त्वगिन्द्रियमित्युक्तम् । अथ त्वगिन्द्रियस्य विशिष्टोत्पादे किं प्रमाणम् ? । कार्यनियमः । तथा च रूपादिषु मध्ये स्पर्शस्यैवोपलम्भान्यथानुपपत्त्या ज्ञायते कारणनियमः । स चान्यस्यासम्भवाद्विशिष्योत्पादे निमित्तमिति कल्प्यते । अस्य च सूत्रस्येदं भाष्यम् । भूयस्त्वात् स्पर्शवत्त्वाच्च स्पर्शज्ञाने प्रकृतिर्वायुरिति । स्पर्शो ज्ञायते ऽनेनेति स्पर्शज्ञानमिन्द्रियमिति तस्मिन्नुत्पाद्ये प्रकृतिः कारणं वायुर्भूयस्त्वान्निमित्तादतस्तदेवेन्द्रियं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकमिति भूयस्त्वमिति। भूयसां विशिष्यादृष्टोपगृहीतानां वाय्ववयवानामीषदितरावयवसंपर्कैरारम्भकत्वम् । यदि वा स्पर्शो ज्ञातिर्ज्ञानम् तस्मिन्नेव रूपादिषु मध्ये प्रकृतिः कारणं वायुः । कुत इत्याह भूयस्त्वाद्याकृतात् स्पर्शवत्त्वाच्चेति । स्पर्शवत्त्वं चास्य स्पर्शोत्कर्षो विवक्षितः । यदि वा स्पर्शस्यैवोपलम्भान्यथानुपपत्त्या ज्ञातः स्पर्शोत्कर्षः कस्माद्भवतीत्याह–भूयस्त्वान्निमित्तादिति ।

ननु सर्वमेतदसम्बद्धम्, वायुसद्भावे प्रमाणाभावात् । न, प्रत्यक्षेणोपलम्भात् । तथाहि–स्पार्शनव्यापारादपरोक्षज्ञानमुत्पद्यमानं दृष्टम्–वायुर्वाति शीतो वायुरुष्णो वायुरिति । न चेदं लिङ्गं लिङ्गसम्बन्धानुस्मरणं परामर्शज्ञानान्तरमुत्पद्यत इति नानुमानप्रभवम् । शब्दं विनाप्युत्पत्तेर्न शाब्दमितीन्द्रियानुविधानादिन्द्रियजम् । यत्र चापरोक्षज्ञानं तत्प्रत्यक्षम् । अथ महत्त्वादनेकद्रव्यवत्त्वात् रूपविशेषाच्च द्रव्यं प्रत्यक्षमिति सूत्रविरोधः । न,सूत्रार्थापरिज्ञानात् । तथाच सूत्रार्थः अपरोक्षज्ञानसद्भावे सति समस्तं व्यस्तञ्च लक्षणमिति ज्ञेयम्।यत्र ह्यपरोक्षं ज्ञानं तत्र अमीषां समस्तव्यस्तानां कारणत्वम् । तथा ह्यात्मा महत्त्वादेव प्रत्यक्षः । वायुस्तु महत्त्वानेकद्रव्यवत्त्वाभ्याञ्च । यत्र चक्षुःस्पर्शनाभ्यां विज्ञानं द्रव्ये तत्र समस्तं लक्षणमिति । प्राधान्यं तु यथादर्शनमभ्युपेयम् । तथाहि–रात्रावग्निर्दूरेप्युपलभ्यते रूपातिशयान्महत्त्वानेकद्रव्यवत्त्वयग्रहणं पर्वतादेरिति रूपस्य प्राधान्यमेवमालोकस्य सद्भावे दूरेपि पर्वतादेर्ग्रहणम् । महत्त्वे त्वल्पप्राधान्यमित्युत्प्रेक्ष्यम् ।

अथ यत्र स्पार्शनप्रत्यक्षत्वं तत्र दर्शनस्यापि व्यापारो दृष्ट ओघ-

शब्दादौ संख्यादयश्च प्रत्यक्षा इति इहापि तथाभावः स्यात्, न चास्त्यतः स्पर्शमात्रमेव प्रत्यक्षं वारिस्थिते तेजस्युष्णतावदिति । यथा वारिस्थिते तेजस्याश्रयाप्रत्यक्षत्वेऽप्युष्णताग्रहणं तद्वदिहाप्याश्रयाप्रत्यक्षत्वेऽपि स्पर्शस्यैव ग्रहणमिति । नैतदेवम् । वारिस्थिते तेजसि रूपस्यानुद्भूतत्वात्स्पर्शमात्रस्य प्रत्यक्षत्वं युक्तम् । यत्र हि रूपोद्भवः कारणं प्रत्यक्षत्वे । न चावश्यं चक्षुषापि ग्रहणम् । संख्यादयश्च प्रत्यक्षा रूपानुद्भवे च न ग्रहणमिति । दृष्टश्च वायौ न रूपविशेषः प्रत्यक्षतायां कारणमिति चक्षुषाऽग्रहणम् । संख्यादेरप्रत्यक्षत्वं युक्तम् । अथ रूपविशेषाभावे अप्रत्यक्षत्वमेव स्यादिति चेत् । न आत्मना व्यभिचारात् । तथा ह्यात्मा रूपविशेषाभावेऽप्यन्तःकरणप्रत्यक्षः । संख्यादयः प्रत्यक्षा अप्यात्मनि रूपविशेषाभावादेव अप्रत्यक्षा इति । अथ द्रव्यस्पार्शनप्रत्यक्षत्वं रूपविशेषसद्भावे सत्येवं दृष्टम् घटादौ, तथा च रूपस्पर्शव्यतिरिक्तद्रव्यालम्बनत्वेऽनुसन्धानज्ञानं च प्रमाणमस्ति 'यमहमद्राक्षं चक्षुषा तमेवैतर्हि स्पृशामि यं वाऽस्प्राक्षं स्पार्शनेन तं पश्यामीति', न च वायावेतदस्तीति स्पर्शमात्रालम्बनमिति चेत् । तदेतदसत् । रूपं विनापि वायोः स्पार्शनेन प्रत्यक्षत्वात् । अथ साध्यमेतत् । दृष्टस्य साध्यत्वे सत्यतिप्रसङ्गात् । तथाहि—स्पर्शनव्यापाराद्वायावपरोक्षज्ञानमिन्द्रियाभावव्यतिरेकाभ्यामुत्पद्यमानं दृष्टमित्युक्तम् । तस्य च साध्यत्वे घटादावपि दर्शनस्पर्शनप्रत्यक्षं साध्यमेव स्यात् । अथेन्द्रियानुविधानान्न साध्यमेतत्, समानं वायावपि । यथेदमनुसन्धानम् । तद्धीन्द्रियग्राह्यत्वाद्घटादावुपपन्नम्, वायोरेकेन्द्रियग्राह्यत्वादसम्भवेनातीन्द्रियवदिति । न चानुसन्धानादेव घटादिज्ञानस्य रूपादिव्यतिरिक्तद्रव्यालम्बनत्वम् । किन्तर्हि ? घटादिज्ञानस्य विलक्षणत्वात् रूपादिव्यतिरिक्तार्थालम्बनत्वम् । तत्र चानुसन्धानस्यापि प्रामाण्यमिति । नैवं वायुर्वाति शीतो वायुरिति ज्ञानस्य स्पर्शज्ञानविलक्षणत्वाद्व्यतिरिक्तार्थालम्बनत्वम् । न च स्पर्शोपलम्भनादनुमानजं ज्ञानमेतदिति वाच्यम् । अविनाभावसम्बन्धानुस्मरणादेरभावात् । अननुभूयमानस्यापि सम्बन्धानुस्मरणादपि व्यापारस्य कल्पनाऽन्याय्या—घटादिज्ञानस्याप्यनुमानताप्रसङ्गात्, वायुप्रत्ययसमानाधिकरणश्चायं प्रत्यय इति वाय्वालम्बन एव ।

अन्ये त्वनुमानेनापि वायोः प्रत्यक्षतां व्यवस्थापयन्ति । स्वयं प्रत्यक्षेणोपलब्धोऽप्यर्थः परस्मै प्रतिपाद्यमानोऽनुमानेनैव प्रतिपाद्यत इति मन्यमानाः । तथा चाऽस्मदाद्युपलभ्यमानस्पर्शाधिष्ठानो वायुः अस्मदादित्वगिन्द्रियप्रत्यक्षः अनुद्भूतरूपान्यत्वे सति अस्मदाद्युपलभ्यमानस्पर्शाधिष्ठानत्वात्, यो योऽनुद्भूतरूपान्यत्वे सत्यस्मदाद्युपलभ्यमानस्पर्शाधिष्ठानः स सोऽस्मदादित्वगिन्द्रियप्रत्यक्षः यथा घटादिः । तथा चानुद्भूतरूपान्यत्वे सत्यस्मदाद्युपलभ्यमानस्पर्शाधिष्ठानो वायुस्तस्मादस्मदादित्वगिन्द्रियप्रत्यक्ष इति । परमाणूनां हि योगिविवक्षयोपलभ्यमानस्पर्शाधिष्ठानत्वमिति अस्मदादिविशेषणं हेतोर्द्धर्मिणश्चेति । साध्यस्याप्यन्येन्द्रियविवक्षया प्रत्यक्षत्वानभ्युपगमात्त्वगिति विशेषणम् । योगिनां चेन्द्रियान्तरेणापि ज्ञानं सम्भवतीति अस्मदादिग्रहणम् । अस्य च प्रत्यक्षधर्मत्वसद्भावेऽपि प्रतीत्यभावो दूषणम इत्युक्तम् । तच्चासत्, प्रतीतेः समर्थितत्वात् । अथ प्रतीतिरेवास्त्वलमनुमानेन विप्रतिपद्यमानस्यानुमानोपन्यासात् ।

नन्वेवं सर्वेषामप्यतीन्द्रियाणामस्मदादिप्रत्यक्षत्वं स्यात प्रमेत्वादिति हेतुना । न परप्रतिपत्त्यैव बाध्यमानत्वात् । तथाहि—परो विजानाति न मेऽस्ति परमाण्वादिविषयज्ञानमिति । स्वयमपरोक्षज्ञानसद्भावे सति परप्रतिपादनायानुमानोपन्यासो युक्तः । स च वायावस्ति न परमाण्वादाविति । तथा परमाण्वादेरस्मदादीन्द्रियविषयत्वे परमाण्वादिरूपतां जह्यात् । महत्वादियोगिन्यस्मदादीन्द्रियव्यापारोपलब्धेरिति ।

इदानीं प्रत्यक्षेण वायुसद्भावे व्यवस्थापिते विषयनिरूपणार्थमाह विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूत इति । उपलभ्यमानश्चासौ स्पर्शश्च तस्याधिष्ठानभूत इति व्याख्या । तत्र चास्मदादिप्रतिपादनाय शास्त्रस्यारम्भादस्मदादिविशेषणमप्यूह्यम् । उपलम्भोपीन्द्रियद्वारेणैव विवक्षित इति । अन्यथा हि प्रमाणान्तरेणोपलम्भः शरीरादावप्यस्तीति उपलभ्यमानस्पर्शाधिष्ठानत्वं व्यभिचारि विषयलक्षणं स्यात् । एवमस्मदादीन्द्रियोपलभ्यमानस्पर्शाधिष्ठानत्वादितरस्माद्भिद्यते । विषय इति वा व्यवहर्तव्यः । तथा न परं विषयलक्षणो वायुरस्मदादीन्द्रियप्रत्यक्षोऽनुमानावगम्यश्चेत्याह—

स्पर्शशब्दधृतिकम्पलिङ्ग इति । स्पर्शश्च शब्दश्च धृतिश्च कम्पश्चेति लिङ्गानि यस्यासौ तथोक्त इति । तथा ह्यनुष्णाशीतत्वे सति अपाकजस्पर्शः क्वचिदाश्रितो गुणत्वात्, यो यो गुणः स स आश्रितो दृष्टः । यथा रूपादिः, तथा चायं गुणस्तस्मादाश्रित इति । गुणत्वं चास्य सामान्यवत्त्वेऽद्रव्यत्वे च सति नियमेनाचाक्षुषप्रत्यक्षत्वाद्रसवदिति । अचाक्षुषप्रत्यक्षत्वं घटादावस्तीति नियमग्रहणम् । तथापि स्पर्शत्वादिसामान्ये नियमेनाचाक्षुषप्रत्यक्षत्वं न च गुण इति व्यभिचारः तदर्थं सामान्यवत्त्वे सतीति विशेषणम् । सामान्यवत्त्वं द्रव्यादित्रयस्यास्तीति नियमेनाचाक्षुषप्रत्यक्षपदम् । सामान्यवत्त्वे सति नियमेनाचाक्षुषप्रत्यक्षत्वं वाय्वादावस्तीति अद्रव्यत्वे सतीति पदम् । अस्य पक्षधर्मत्वे सति पक्षैकदेशवर्तमानस्यात्यन्तं विपक्षाद्व्यावृत्तस्याबाधितविषयत्वादसत्प्रतिपक्षत्वेन गमकत्वम् । अथास्त्वनुष्णाशीतत्वे सत्यपाकजस्पर्शस्याश्रितत्वमपाकजत्वे तु किं प्रमाणम् ? पाकजरूपादिवियोगात्तथाहि—पाकजस्पर्शः पाकजरूपादिसहितो दृष्टो घटादाविति । अस्यापि पाकजत्वे तथाभावः स्यात् । अथ सद्भावेऽप्यनुद्भूतत्वात्तेषामनुपलम्भः, तन्नान्यत्राऽभावात् । न हि पाकजस्पर्शोपलम्भे रूपादीनामन्यत्रात्यन्तानुपलम्भो दृष्ट इति । न चात्र रूपादीनामस्तित्वप्रमाणमस्तीत्यनुद्भवानुपपत्तिः । सद्भावेऽनुद्भवकल्पनोपपत्तेः । अथासद्भावे किं प्रमाणमिति चेत् । अत्यन्तानुपलब्धिरेव । तथाहि—विवक्षितस्पर्शाधिकरणं गुरुत्वरहितं सम्भवतीति । सहचरिता रूपादयो न कदाचिदुपलभ्यन्ते प्रमाणत इत्यसन्तः । तथा पाकजस्पर्शस्य गुरुत्वसाहचर्योपलब्धेरस्यापि पाकजत्वे तत्सद्भावः स्यात् । गुरुत्वसम्बन्धे चोर्ध्वं पर्णादिधारणानुपपत्तिः । तस्यापि गुरुत्वसम्बाधितया तत्प्रसङ्गात् । न च पाकजस्पर्शाधिकरणं गुरुत्वरहितं सम्भवतीति । पार्थिवस्पर्शविलक्षणत्वान्न पृथिव्यां वर्त्तते, नाप्युदकतेजसोरनुष्णाशीतत्वादन्यत्रासम्भव एवेति । यत्रायं वर्तत असौ वायुरिति ।

तथाऽऽद्यः शुकशुकाशब्दः सन्ततानुमितः स्पर्शवद्द्रव्यसम्बन्धकार्यः विभागजशब्दजशब्दान्यत्वे सति शब्दत्वात्, यो यो विभागजशब्दजशब्दान्यत्वे सति शब्दः स स्पर्शवद्द्रव्यसंयोगकार्यो यथा भेरीदण्डसंयोगजः शब्दः । तथा चायं तस्माद्यथोक्तसाध्य इति । ननु

विभागजशब्दादस्य विशेषानुपलब्धेः सन्दिग्धं तदन्यत्वे सतीति विशेषणम् । न, रूपादिमतां घनावयवसन्निवेशभाजां कारणविभागपूर्वकविभागस्य शब्दारम्भकत्वोपलब्धेस्तदभावस्त्वविवादास्पद इति विभागजत्वाभावात् । तथा विभागजत्वे शुकशुकादिशब्दस्य शाखादिषु कम्पसमानकालोपलब्धिर्न स्यात् । सा तु दृष्टा । नचात्र शाखादिवायुविभागस्य शब्दारम्भकत्वं युक्तम् कारणविभागजत्वानुपपत्तेरतस्तदन्यत्वे सतीति विशेषणम् न सन्दिग्धमेव । धृतिः धारणमाकाशे पर्णादीनामवस्थानम्। तच्च स्पर्शवद्द्रव्यसंयोगकार्यं प्रयत्नाभावे सति धारणत्वात्, यद्यत्प्रयत्नाभावे सति धारणं तत्तत् स्पर्शवद्द्रव्यसंयोगकार्यं यथाऽऽधारगतोदकं तथा चेदं तस्मात्स्पर्शवद्द्रव्यसंयोगकार्यमिति । पक्षीणां मूर्छनमित्याह—सम्मूर्छनं पुनः समानजवयोर्वाय्वोर्विरुद्धदिक् क्रिययोः सन्निपातो हि संबन्धः । स च कयोर्वाय्वोः किं विशिष्टयोरित्याह समानजवयोः । समानस्तुल्यो जवो वेगो ययोस्तौ समानजवौ तयोरिति । अन्यथा ह्येकस्याल्पजवत्वे बलीयसाभिभवान्न संमूर्छनमिति । तथा ह्येकादिक्क्रिययोर्न संमूर्छनमित्याह विरुद्धे दिशिक्रिये ययोस्तौ विरुद्धदिक्क्रियाविति । तथा ह्येकस्य प्राचीनदिग्गमनमन्यस्य च तदभिमुखमागमनमिति क्रिययोर्विरोधः । अन्ये तु विरुद्धायां दिशि क्रिये ययोस्तौ तथोक्ताविति मन्यन्ते । अत्राविरोधश्चिन्तनीयः । अथेत्थंसन्निपातः कुतः प्रतीयत इत्याह सोपि सन्निपातः सावयविनोरूर्ध्वगमनेनानुमीयते । सहावयविभिर्वर्तेते यौ तौ सावयविनाविति तदवयवा अपि महान्तोऽवयविन इति ज्ञापनार्थमिदमुक्तम् । अन्यथा हि सावयवयोरिति स्यात् । अन्ये त्ववयविनोऽत्र तृणादयो विवक्षिताः न तदवयवा इति मन्यन्ते । अथ वायोरेवोर्ध्वगमनं कथं प्रतीयत इत्याह तदपि तृणादीनामूर्ध्वगमनेनेति । तथाहि तृणादीनामूर्ध्वगमनं चेतनत्वान्न प्रयत्नात् भवति । नापि वेगात् क्वचिन्मन्दगतित्वात् । आद्यकर्मोत्पत्तौ च तदभावात् । अन्यस्य च सामर्थ्यानुपलब्धेर्वेगवद्द्रव्यसम्बन्धोऽनुमीयते । न च तत्पार्थिवमाप्यं वा तस्यापि गुरुत्वाधिकरणतयोर्ध्वगमने गुरुत्वरहितं निमित्तान्तरं वाच्यम् । न चात्राग्नेरूर्ध्वज्वलनस्वभावतया तत्संयोगात्तृणादीनामूर्ध्वगमनमिन्धनविशेषाभावेनोर्ध्वज्वलनासंभवात्तदनुपलब्धेश्च । न चान्यस्यात्र सामर्थ्यमिति । वायुसम्ब-

न्धात्तृणादीनामूर्ध्वगमनमिति ज्ञायते । तस्य तिर्यग्गतिशीलतयोर्ध्वं गमनम् अन्तराले नान्यथा संभाव्यत इति वाय्वन्तरेण प्रतिबन्धः । तथाहि वायुर्बलीयानपरेण च बलीयसा प्रतिबन्धसन्निपातात्स्वां गतिं विरहय्योर्ध्वं गच्छति । तत्संयोगाच्च तृणादीनामूर्ध्वगमनमिति सिद्धं–तृणादीनामूर्ध्वगमनेन वायोरूर्ध्वगमनम्, तेन च सन्निपातः स्तस्मान्नानात्वमिति ।

अथ प्राणाख्यस्य वायोरुपलभ्यमानस्पर्शाधिष्ठानतया विषयान्तर्भावेऽपि प्राधान्यज्ञापनार्थं विशिष्यार्थक्रियाकारितया पृथगभिधानम् । तथा तत्त्वज्ञानिनो योगाभ्यासे प्रवर्तमानस्य प्राणोऽत्यन्तमुपकारीति पृथगुच्यत इत्याह—प्राणोऽन्तःशरीरे रसमलधातुप्रेरणादिहेतुरिति । तथा ह्यन्तःशरीरे वर्तमानत्वात् प्राण इत्युक्ते रसादिभिर्व्यभिचारः, तदर्थं रसमलधातूनां प्रेरणादिहेतुरिति । तथापि रसादिप्रेरणादिहेतुत्वात् प्राण इत्युक्तेऽदृष्टादिषु व्यभिचारः, तदर्थमन्तःशरीरे वर्तमान इति । न चादृष्टादयोऽन्तःशरीरे वर्तन्ते अदृष्टस्य चात्मवृत्तित्वादीश्वरस्य चावृत्तिमत्त्वादिति । तदेवमन्तःशरीरे वर्तमानो रसादिप्रेरणहेतुत्वादितरस्माद्भिद्यते । प्राण इति वा व्यवहर्तव्यः । यदि वा वायुसामान्यलक्षणानुवृत्तौ सत्यामन्तःशरीरे वर्तमानत्वाद्रसादिप्रेरणहेतुत्वाच्च प्राण इत्युक्ते व्यभिचाराभावः । अथासौ किमेकोऽनेक इत्याह–एकः सन् क्रियाभेदादपानादिसंज्ञां लभत इति । अथ वास्तवभेदः कस्मान्नेष्यते ? बाधकोपपत्तेस्तथाहि-पञ्च वायवः शरीरे यदि व्याप्त्या वर्तन्ते तदा संबन्धादेको वायुर्भवतीति पञ्चत्वनिवृत्तिः, अथाप्राप्त्या तथाप्येकेन शरीरस्य व्यापकत्वादपरेषामसंभव इति मन्यमानः क्रियाभेदेन भेदमाह । स एव मुखनासिकाभ्यां निष्क्रमणशीलो वायुः प्राणाख्योऽधोनयनान्मलादेरपानः समं नयनात् समानः ऊर्ध्वं नयनादुदानः विविधमनेकप्रकारेण नयनाद्व्यानः इति । ॥ इति वायुः ॥

(भा०) इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते । ब्राह्मेण मानेन वर्षशतस्यान्ते वर्त्तमानस्य ब्रह्मणोऽपवर्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य सञ्जिहीर्षास-

मकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः। तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिंश्च सति पूर्वपूर्वस्य विनाशः, ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माधर्मसंस्कारानुविद्धाश्चात्मानस्तावन्तमेव कालम्।

ततः पुनः प्राणिनां भोगभूतये महेश्वरस्य सिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां पूर्वादिशा परस्परसंयोगेभ्यो द्व्यणुकादिप्रक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेवाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिप्रक्रमेण महापृथिवी समुत्पन्ना संहताऽवतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिर्देदीप्यमानस्तिष्ठति। एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमुत्पद्यते॥

तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्माऽतिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूप-

ज्ञानभोगायुषः सुतान्प्रजापतीन् मानसान् मनुदेवर्षि-पितृगणान् मुखबाहूरुपादतश्चतुरो वर्णान् अन्यानि चोच्चावचानि च सृष्ट्वाऽऽशयानुरूपैर्धर्मज्ञानवैराग्यै-श्वर्यैः संयोजयतीति ॥

(मू०)प्रसङ्गादाह चतुर्णामिति । चतुर्णां पृथिव्यादीनां महाभूता-नां परमाण्वपेक्षयाऽपकृष्टपरिमाणवताम्, तेन द्व्यणुकस्याप्युपग्रहः । सृष्टिसंहारस्य–सृष्टिप्राक्कालीनप्रलयस्य, तेन महाप्रलयस्य व्युदासः । विधिः–क्रमः । सृष्टिसंहारयोरुत्पत्तिप्रलययोर्विधिः कथ्यत इत्यर्थ इत्याचार्याः । ब्राह्मेण मानेनेति ।

मानुषेणैकवर्षेण देवानां दिनमुच्यते ।
तेषां शतत्रयं षष्टियुक्तं वर्षस्तु दैवतः ॥
दैववर्षसहस्राणि द्वादशाहश्चतुर्युगम् ।
चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते ॥

इति स्मृतिसिद्धब्रह्मदिनमानेन यद्वर्षशतं तस्याऽन्ते ब्रह्मणो-ऽपवर्गकाले मृत्युकाले । ब्रह्मेशानप्रभृतीनामपीन्द्रादिवज्जीवप्रभे-दत्वमतेनेदम् । ब्रह्मणः परमात्मनोऽस्मदाद्यदृष्टोपगृहीतयातृदेह-विच्छेदकाल इति वाऽर्थः । संसरतीति संसारः शरीरं तत्र, खिन्नानां–त्रिविधदुःखानुभाविनाम् । निशीति । ब्राह्मेण मानेने-त्यनुषज्यते ।

चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते ।
रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना ॥

इति स्मृतेः । निशीत्यस्य निशातुल्य इत्यर्थ इत्याचार्याः । विश्रामार्थं–खेदोपशमार्थम्, सकलभुवनपतेस्त्रिभुवननियन्तुर्महेश्वरस्य परमात्म-नः, संजिहीर्षा–संहारसामग्रीविशिष्टेच्छा तत्समकालमदृष्टानां

वृत्तिनिरोधे सतीत्यत्रान्वितमिदम् । संजिहीर्षासमकालं–संजिहीर्षोत्तरकालमिति त्वाचार्याः । तेषां चापरमाण्वन्तो विनाश इत्यत्रान्वयोऽभिप्रेतः । यद्यपि शरीरादिकमपि महाभूतमेव, तथाप्यत्र महाभूतपदं प्रागुक्तविषयपरम् । उपनिबन्धकं–जनकम् । सर्वात्मगतेति । सर्वेषामात्मवृत्त्यदृष्टानां वृत्तिः फलोपधानं तस्य निरोधे प्रतिबन्धे सतीत्यर्थः । फलानुत्पत्त्या जन्यद्रव्यत्वावच्छिन्नं प्रति ब्रह्मरात्रित्वेन प्रतिबन्धकत्वमित्यभिप्रायः । प्रलयहेतुभूतादृष्टमेव जन्यद्रव्यनिरोधकमिति त्वाचार्यमतन्तु प्रलयप्राक्क्षण एव तादृशादृष्टस्योत्पत्त्यभ्युपगमे शोभत इति ध्येयम् ।

महेश्वरेति । महेश्वरेच्छासहितैरात्मपरमाणुसंयोगैर्जनितेभ्यः परमाणुकर्मभ्य इत्यर्थः । पञ्चम्या जन्यत्वमर्थस्तच्चाग्रिमविभागेऽन्वितम् । तत्संयोगनिवृत्तौ–शरीराद्यारम्भकाणां परमाणुसंयोगानां निवृत्तावित्यर्थः । तेषां–शरीराणामिन्द्रियाणां च, आ–सम्यक्प्रकारेण द्व्यणुकनाशादिक्रमेणेति यावत् । परमाण्वन्तः–परमाण्ववसानकः । प्रलये विषयसंज्ञकानां नाशे विशेषं दर्शयन्नाह तथेति । महाभूतानां–विषयसंज्ञकानाम् । अनेनैवेति । परमाणुक्रियाविभागादिक्रमेणैवेत्यर्थः । उत्तरोत्तरस्मिन्निति । प्रथमं पार्थिवस्यैव विषयस्य विनाशस्ततो जलस्योत्तरकालं तेजसः पश्चाद्वायोर्विनाश इत्यर्थः। अयं च क्रमः श्रुतिसिद्धत्वादुपात्त इत्याचार्याः । ननु पृथिव्युदकज्वलनपवनानां क्रमेणैव ध्वंसवतः कालस्य प्रलयत्वानुपपत्तिः, कार्यद्रव्यानाधिकरणकालस्यैव तत्त्वादत आह तत इति । पृथिव्यादिचतुर्णां नाशोत्तरमित्यर्थः । प्रविभक्ताः–कार्यद्रव्यरहिताः । कार्यद्रव्यराहित्यं कार्यभावानधिकरणत्वेऽप्युपपद्यमानं न खण्डप्रलयत्वनिर्वाहकम् महाप्रलयस्यापि तत्त्वादतस्तद्व्यावृत्त्यर्थमाह धर्मेति । धर्माधर्मभावनाख्यसं-

स्कारैरनुविद्धा विशिष्टा आत्मानश्चात्रतिष्ठन्त इति पूर्वेणान्वयः । चकाराद्गगनादिनित्यवर्गस्य पाकजरूपाद्यनित्यवर्गस्य चोपग्रहः । तावन्तमेव कालं–ब्राह्ममानेन शतवर्षपर्यन्तं कालमित्यर्थः । तथाच स एव कालः कार्यद्रव्यानधिकरणत्वे सति कार्याभावानधिकरणत्वात् खण्डप्रलयो न त्वन्यस्तथेति भावः ।

खण्डप्रलये धर्मादेः सत्त्वे प्रमाणमावेदयितुमुत्तरसृष्टिं व्युत्पादयति तत इति । महाभूतानां सृष्टिसंहारयोर्द्वयोर्विधानस्य पूर्वं प्रतिज्ञातत्वात् संहारविधिमुक्त्वा सृष्टिविधिमाह तत इति त्वाचार्यस्वरससिद्धस्तत इत्यस्यावतारक्रमः । प्राणिनां–संसारिणाम्, भोगस्य– सुखदुःखान्यतरस्य, भूतये–निष्पत्त्यर्थम्, सिसृक्षाया सृष्टिसामग्र्युपहितेच्छाया अनन्तरं उत्तरकाले सर्वाणि यान्यात्मगतान्यथ च वृत्तिलब्धानि लब्धवृत्तीनि अदृष्टानि तत्सापेक्षेभ्यः तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ सत्यां तेषां पवनपरमाणूनां पूर्वदिशा विभागादिक्रमेण(जातेभ्यः)परस्परसंयोगेभ्यो यानि द्व्यणुकानि तदादिक्रमेण महान् वायुरुत्पन्नो नभस्याकाशादौ दोधूयमानोऽत्यर्थं कम्पमानस्तिष्ठति । मूर्तान्तरानुत्पत्त्या तदुपगमस्याप्रतिहतत्वादिति भावः । तदनन्तरं–महापवनस्योत्पत्त्यनन्तरम्, तस्मिन्नेव पवने आप्येभ्यो जलारम्भकेभ्यः परमाणुभ्यः (प्रागुक्तरीत्या)तेनैव क्रमेण द्व्यणुकादिक्रमेण महान् सलिलनिधिः समुत्पन्नः पोप्लूयमानोऽत्यर्थं प्लवनशीलस्तिष्ठति । पवनाभिभूतस्य पयसः प्लवनातिशये बाधकाभावादिति भावः। तदनन्तरं सलिलनिधेरुत्पत्त्यनन्तरं, तस्मिन्नेव–सलिलनिधौ, संहता–कठिना, देदीप्यमानोऽ–त्यर्थं प्रकाशमानः । एवं–वायुजलतेजःक्रमेण, अयं च क्रमः श्रुतिसिद्ध इत्युपात्तः । महेश्वरस्याभिध्यानं–ब्रह्माण्डोत्पत्तिगोचरज्ञानमिच्छा वा । तन्मात्रान्न तु तदीयशरीरमध्य-

पेक्षणीयमिति मात्रशब्दस्यार्थः । तैजसेभ्य इति समवायिकथनम् । पार्थिवेत्युपष्टम्भककथनम् । तथासत्येव तैजसाण्डस्य हिरण्मयत्वसंभवात् । सर्वलोकानां तदण्डस्थानां पितामहं सर्वैर्भूर्भुवःस्वरादिलोकैः सहितं, प्रजासर्गे—प्रजासृष्टिनिमित्तं, नियुंक्ते—प्रजाः संसृजेत्याज्ञापयति महेश्वर इत्यर्थाद्गम्यते, अत एवाह स चेति । न च महेश्वरेणैव सहकारिवशेन प्रजानिर्माणसंभवाद्व्यर्थं ब्रह्मणेति वाच्यम् । शरीरनिष्पाद्यानामादिकार्याणां निःशरीरेणेश्वरमात्रेणानिष्पत्तिस्तदर्थं ब्रह्मणोऽप्यपेक्षणीयत्वात् ।

अथ ब्रह्मैव यद्यज्ञः स्यात्कथं कर्म कुर्यात्, यदि वा कश्चिदनुरक्तः स्यात्कथं तदनिष्टमुत्पादयेत्, यदि चानीश्वरः स्यात् जानानोऽप्यसौ दुष्करं वैधकर्म कथं साधयेदत उक्तमतिशयज्ञानेत्यादि । यदा त्वीश्वर एव तत्तत्कार्यवशाद्ब्रह्मादिदेहं परिगृह्णाति 'नमः कुलालेभ्यः कर्मकारिभ्य' इत्यादिश्रुतिप्रमाणकत्वादिति मतम्, तदा ब्रह्मणीश्वरस्य नियोगः कार्यानुकूलतत्तत्कृतिसहकृतत्वरूपो बोध्यः । कर्मविपाकमिति । प्राणिनां यानि कर्माणि तेषां त्रिविधं पाकं फलोपधानकालं विदित्वेत्यर्थः । मानसान् अयोनिजान् सुतान् मरीच्यत्रिप्रभृतीन्, सृष्ट्वेत्यग्रेऽन्वयः । प्रजापतीन्—दक्षादीन् । मनवः—स्वायंभुवाद्याः, देवा आदित्यादयो, ऋषयो भरद्वाजाद्याः, पितरः— कव्यवाहनाद्याः तेषां प्रत्येकं गणानित्यर्थः । मुखेति । मुखाद्ब्राह्मणं बाहुभ्यां क्षत्रियम् ऊरुभ्यां वैश्यं पद्भ्यां शूद्रमित्येवं चतुरो वर्णानित्यर्थः । तथाच श्रुतिः "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इति । उच्चावचानि—उत्कृष्टापकृष्टानि भूतप्रेतादीनि । आशयः—पूर्वजन्मसंस्कारः, तदनुरूपैस्तत्सदृशैरित्यर्थः । धर्मज्ञानवैराग्यैश्वर्यैरित्युपलक्षणम् । अधर्माज्ञानावैराग्यानैश्वर्यैरित्यपि द्रष्टव्यम् ॥

(से०) ननु 'नहि कदाचिदनीदृशञ्जगत्' इति न्यायेन प्रलयाभावेन वर्तमानलोकसन्तानैरेव वेदसम्प्रदायानुवर्तने किमिति भगवतो वेदवक्तृत्वस्वीकारः, प्रलयस्वीकारं तु कथं तदनन्तरं घटादिलिप्यादिसम्प्रदायः ? कथं वा शक्तिपरिच्छेद उपदेष्टुरभावात् । न च भगवानुपदेष्टा, निष्प्रयोजनस्योपदेष्टृत्वाभावात् । किञ्च परमाणूनां साम्येन कथं कार्ये वैचित्र्यम् । न चादृष्टवैचित्र्यात् । तददृष्टादेरारम्भकस्य सत्त्वे प्रलयानुपपत्तेः । न चादृष्टस्य वृत्तिनिरोधे सति सः, पश्चाद्वृत्तिप्रापकाभावात् सृष्ट्यनुपपत्तेः । अपि चानधिष्ठितानामेषां कार्यजनकत्वानुपपत्तिरचेतनत्वात्, अधिष्ठातृत्वं च न परमाण्वसाक्षात्कर्तृणामस्मदादीनां तदसाक्षात्कर्तुः तदधिष्ठातृत्वानुपपत्तेः । नापि भगवता निष्प्रयोजनस्याधिष्ठातृत्वादर्शनादिति समाकुलं जिज्ञासुकुलं समाश्वासयन् आह इदानीमिति । सृष्टिसंहारयोर्विधिः न तु सृष्टेः संहारस्य विधिः सृष्टिप्रकारकथनविरोधात् । प्रथमं संहारकथनस्य तु सृष्टिसंहारयोः प्रवाहेणानादित्वद्योतनं प्रयोजनम्, आकस्मिकप्रतिज्ञाक्रमातिक्रमस्य परमसावधानस्य भाष्यकर्तुः अन्यथानुपपत्तेः । एवं च प्रतिज्ञाक्रमातिक्रमस्यानादित्वद्योतनमेव प्रयोजनम्, अन्यथा वैयर्थ्यात् इति क्रमातिक्रमादेवाऽनादित्वं प्राप्यत इत्येके । संहारं प्रतिपाद्य तदानन्तर्यविशिष्टां सृष्टिं बोधयता प्रकृतसंहारः सृष्टेः पूर्वं न च सृष्टिं विना संहार इति पूर्वमपि सृष्टिरायाति इति प्रवाहित्वमेतयोरित्यपरे ।

ब्रह्मणेति । चतुर्युगसहस्रामितं ब्रह्मणो दिनं तावत्येव रात्रिरीदृशेनाहोरात्रेण पक्षादि परिकल्प्य वत्सरं परिकल्प्य ब्रह्मणः वर्षशतगणना कर्तव्येत्याशयः । वर्षशतान्ते वर्षशतं प्राप्य न तु वर्षशतात्यये तत्रापवर्गस्यैव भावेन ब्रह्मणोऽवर्तमानत्वात् । यदा कथंचित् एव सुकृतविशेषवशेन ब्रह्मा भवति तदा ब्रह्मणो ऽपवर्गकाले मोक्षकाल इति व्याख्येयम् । अस्मिन्पक्षे येऽसङ्कल्पितफलकर्मकर्तारः साकारोपासनापरिवासितचेतसो यतयस्ते "हिरण्यगर्भपदवीमनुप्राप्य परिमुच्यन्त" इत्यागमस्य ब्रह्मत्वं प्राप्यापवृक्ता भवन्ति इत्यर्थकतया अस्मिन्नर्थे प्रामाण्यम् । यदा तु भगवानेव त्रिमूर्तिर्भवतीति पक्षः, तदा ब्रह्मणो नित्यमुक्ततया अपवर्गकाले देहत्यागकाल इति व्याख्येयम् । श्रुत्यर्थस्तु–हिरण्यगर्भपदवीमनुप्राप्य ब्रह्मलोकं गत्वा मु-

को भवतीत्येवश्रेयः। नो विरोधः अन्यथाऽऽगमेन ब्रह्मणोऽमुक्तत्वप्रतिपादनेन भगवतो ब्रह्मत्वमिति पक्षस्यामूललूनत्वापत्तेः।

संसारे जन्ममरणादिप्रवाहे खिन्नानां विविधोपद्रवैः निस्सहीभूतानां निशि रात्रिकल्पे निरस्तैतद्दीपवर्तिरविरश्मिजालस्य कालविशेषपदेन चानित्यद्रव्याधारत्वग्रहणेन प्रलयस्य रात्रित्वाभावात्। न च तच्छून्यस्यैव लक्षणत्वे रात्रित्वं तत्रास्त्विति वाच्यम। "नाहो न भूमिर्न च खं न रात्रिः" इत्यागमविरोधात्। न च यथा नखमित्यस्य खव्यवहारो नास्तीत्यर्थः तथा न रात्रिरित्यस्य रात्रिव्यवहारो नास्तीत्यर्थे इति वाच्यम्। आकाशस्य नित्यतया तत्र मुख्यार्थबाधेन लक्षणयाऽऽगमस्य नेयत्वात्, एकत्र लक्षणया यत्र लक्षणां विनाप्युपपत्तिः तत्र लक्षणाया अकर्तव्यत्वात्। नच भाष्यवाक्ये वा लक्षणा तस्मिन् वा लक्षणेत्यत्र किं नियामकमिति वाच्यम्। लौकिकवाक्यानुरोधेन वेदस्यान्यथा नेतुमनुचितत्वात्। अस्यार्षत्वेऽपि लौकिकत्वात् अन्यथा "सर्वौदुम्बरी वेष्टयितव्येति" वाक्यमनुरुध्यौदुम्बरीं स्पृष्ट्वा इत्यादिश्रुतिरपि अन्यथा नीयेतेति सङ्क्षेपः।

विश्रामार्थे—प्रलये शरीराद्यभावेन दुःखाभावात्।महेश्वरत्वे हेतुत्वेन सकलभुवनपतेरित्युक्तम्। समकालमनन्तरकालं कार्यकारणयोः पौर्वापर्यनियमात्। ननु भगवदिच्छाया एकतयेदानीमपि कथं न प्रलयो भगवत्संजिहीर्षायाः सत्त्वात् इति चेन्न। सञ्जिहीर्षात्वविशिष्टायास्तस्या इदानीमभावात्, सिसृक्षात्वविशिष्टाया एव सत्त्वात्। ननु सञ्जिहीर्षात्वं न जातिः एकव्यक्तिकत्वात्। न चाऽस्मदादीच्छायामपि सञ्जिहीर्षात्वसत्त्वादनेकत्वम्, जातेरकदाचित्कत्वेनेदानीमपि भगवदिच्छायां सञ्जिहीर्षात्वसत्त्वापत्तेः। न च व्यक्तौ कादाचित्की जातिरिति घटादौ दृष्टं येनात्रापि तथा कल्प्येत। न च संहारविषयकत्वं सञ्जिहीर्षात्वं तच्च नेदानीं भगवदिच्छायामिति वाच्यम्। विषयिणि सति पश्चात्तद्विषयकत्वस्याभावात्। न च घटज्ञानं जातं सत् पश्चात् घटं विषयीकरोति इति कस्यापि सम्मतम्। किञ्चेच्छादावन्यप्रवणं विषयत्वमन्यत्रात्र, ज्ञानञ्च भगवतः सर्वदा सर्वविषयकं, तथाचेच्छादयोऽपि तथा, न चास्मदादीनां घटविषयकज्ञानेच्छा घटविषयकत्वे विलम्बत इति कस्यापि रोचते। न च सञ्जिहीर्षात्वं संहारसामग्रीसमकालीनत्वमिति तस्याः कादाचित्कत्वान्नेदानीं भगवदिच्छायाः

संजिहीर्षात्वमिति वाच्यम्। प्रकृतिप्रत्ययकविभागकल्पनायामस्यार्थस्याप्रतीतेः, जिगमिषेत्यत्र गमनेच्छाया इव संजिहीर्षेत्यत्र संहारेच्छाया एव प्रत्ययात्। न च संजिहीर्षाशब्दः सामग्रीविशेषविशिष्टेच्छायां रूढ एवेति वाच्यम्। कस्य कारणस्य विलम्बादिदानीं सामग्रीविलम्ब इत्यनिर्वचनात्। न तावददृष्टविलम्बः, तस्य प्रलयाव्यवहितकाल उत्पत्तौ प्रमाणाभावेनेदानीमपि सत्त्वात्, तस्मादनुपपन्नमेतत् यतः संजिहीर्षासमकालमिति चेत्। तत्कालविशेषविलम्बेनैव सामग्रीविलम्बात्। न च कालस्य साधारणतया तस्य च सर्वदा सत्त्वात् कथं तद्विलम्बेन विलम्ब इति वाच्यम्। कार्यविशेषे कालविशेषस्यासाधारणकारणत्वस्यापि दृष्टत्वात्। दृष्टं यत्नविशेषे कालविशेषस्यासाधारणकारणत्वमिति। तस्मात्कालविशेषाभावादेव नेदानीं संजिहीर्षात्वमिति सर्वं सुस्थम्। अत एव आचार्यचरणाः 'स च कालविशेषो वर्षशतादिशब्दवाच्य' इति। स चोपाधिरित्यर्थः। शरीरेन्द्रियमहाभूतोपनिबन्धकानां—शरीरञ्च इन्द्रियञ्च महाभूतानि च तदुपनिबन्धकानां तदुत्पत्तिस्थितिहेतूनाम्। न च द्व्यणुकाप्राप्तिः, परमाणुभ्योऽधिकपरिमाणतया लक्षणया महाभूतपदेन तस्यापि ग्रहणात्। सर्वात्मगतादृष्टानां—सर्वात्मसमवेतादृष्टानाम् अदृष्टे गुणे गत्यभावात्। अदृष्टानि चात्र सृष्टिकारणानि विवक्षितानि प्रलयहेतोरुद्बुद्धवृत्तितया निरुद्धवृत्तित्वाभावात्, वृत्तिनिरोधः-प्रलयहेतुनाऽदृष्टेन प्रतिबन्धः।महेश्वरेच्छस्मगतस्तत: (?) संयोगनाशः ततो द्व्यणुकनाशो सकलकार्यपरम्परानाश इत्याहात्माणुसंयोगजकर्मभ्य इति। महेश्वरेच्छा चात्माणुसंयोगश्च ताभ्यां जातेभ्यः कर्मभ्यः अदृष्टवदात्मसंयोगात् परमाणुषु क्रिया ततोऽविशेषपरमाणुमात्रावस्थितिरित्यर्थः। परमाणुत इत्येतावतैव चरितार्थत्वे आङ्शब्दस्याऽवयववत्त्वनिरासमुखेनावधित्वं द्योत्यतेऽव्यर्थमिति न्यायात्। तथैव तस्य व्याख्यानम्। अनेनैव प्रकारेणेति। उत्तरस्मिन् उत्तरस्मिन् सतीति। जलादौ सति पृथिव्या ज्वलनादौ सति जलस्यानिले सति ज्वलनस्येत्यर्थः। कार्यविनाशे सति प्रकृतिरेव तिष्ठति न तु परमाणवोऽप्रामाणिकत्वादिति साङ्ख्यमतव्युदासायाह तत इति। ततस्तस्मिन्नाशे सतीत्यर्थः। आचार्यैस्तु ततस्तदेत्यर्थ इत्युक्तः। तत्र तेषां पदार्थापेक्षायां किं बीजमिति नावधारयामः। परमाणूनां

प्रामाणिकत्वात् प्रकृतेरेवाप्रामाणिकत्वाश्चेत्याशयः। प्रविभक्ताः कार्यद्रव्यारम्भकसंयोगरहिता अत एव कार्यद्रव्यरहिता इत्यर्थः।

धर्मेति। अन्यथा प्रलयोत्तरं सृष्ट्यनुपपत्तिरदृष्टस्य सर्वोत्पत्तिमन्निमित्तकारणत्वात् संस्कारं विना गृहीतदेहस्यापि आत्मनः स्मरणाद्यनुपपत्तेरित्याशयः। अन्यस्य नित्यवर्गस्यावस्थितिस्तु नोक्ता नित्यत्वादेव प्राप्तेः। आत्मनः किमित्युक्तेति चेन्न। धर्मादिस्थितिकथनाय शब्दविन्यासे कर्तव्ये तथैव शब्दविन्यासस्य जातत्वात्। अग्रिमसृष्ट्यनुरोधेन धर्मादिस्थितावुक्तायामन्यदपि सृष्ट्युपपादकधर्मादिवदनित्यं तिष्ठतीत्युक्तं भवति। तेन पाकजा रूपादयस्तिष्ठन्तीति सिध्यति, अन्यथा सृष्ट्यादौ पार्थिवद्व्यणुके रूपाद्यसिद्ध्यापत्तेः। प्रागभावश्च तिष्ठति परमाणुषु वेगकर्मणी च तिष्ठतः। कर्म विना कालावच्छेदानुपपत्तौ तावन्तमेव कालमिति प्रलयपरिमाणासिद्धेः, वेगं विना कर्मानुपपत्तेः। नैमित्तिकद्रवत्वं न परमाणुष्वङ्गीक्रियते, यदा लाक्षादिषु द्रवत्वमुत्पद्यते तदैव तत्परमाणुष्वपि द्रवत्वोत्पत्तिसम्भवात्। न हि सृष्ट्यादौ तेजःसंयोगानुत्पत्तिदशायां किञ्चित्पार्थिवं द्रुतमुत्पद्यते इत्यत्र प्रमाणमस्ति, तथात्वे तु तिष्ठतु नैमित्तिकद्रवत्वमपि परमाणुषु पार्थिवरूपादिवत्। द्वित्वादिकं तु परमाणुषु भगवदपेक्षाबुद्ध्या तदैवोत्पद्यते द्व्यणुकपरिमाणनिर्वाहाय न तु प्रलयकालेषु तिष्ठति प्रमाणाभावात्। न च समवायिकारणस्य परमाणोः समवायिकारणस्यैकत्वस्य निमित्तकारणस्य भगवदपेक्षाबुद्धेः सत्त्वे कथं न द्वित्वोत्पत्तिरिति वाच्यम्। अदृष्टस्य निरुद्धवृत्तित्वात्। एवं च परमाणुक्रियासत्त्वेऽपि संयोगविभागावपि नोत्पद्येते, तथाच प्रविभक्ताः संयोगरहिता इत्येवार्थ इति तत्त्वम्।

वस्तुतस्तु कर्मणः कालावच्छेदकत्वं क्षणादिनिर्वाहकतया। क्षणश्चोत्पन्ने कर्मणि यावन्न विभागस्तावत्काल इत्येवंरूपो, न च द्वितीयक्षणे विभागानुत्पत्ताविदमुपपद्यते। न च संयोगं विना विभागोत्पत्तिरिति संयोगविभागौ स्त एवेति। एककर्मावच्छिन्नकालो निमेषस्तस्य चतुर्थो भागः क्षण इति संयोगविभागौ विनापि क्षणलक्षणोपपत्तेर्न तौ स्त इति वा। अतएवाचार्यचरणैः प्रलये स्थितिहेतुसंयोगविभागौ न गणितौ। द्रव्यारम्भकसंयोगवर्जिता इति विश-

षकथनेन संयोगमात्रस्वीकारस्तेषां हृदि चकास्तीति चेन्न । संयोगवर्जिता इत्यत्रैव तात्पर्यात् । प्रलये प्रमाणं तु कार्यद्रव्यत्वं कार्यद्रव्यानधिकरणाधिकरणध्वंसप्रतियोगिवृत्ति भावकार्यवृत्तिधर्मत्वात् शब्दत्ववदिति । शब्दत्वं हि कार्यद्रव्यानधिकरणाकाशाधिकरणशब्दध्वंसप्रतियोगिनि शब्दे वर्तते, एवं कार्यद्रव्यत्वमपि स्थास्यति । न च तदधिकरणं कार्यद्रव्यानधिकरणमाकाशादिः संभवति आकाशादौ कार्यद्रव्यध्वंसाभावात् । परमाण्वादिस्तु कार्यद्रव्यध्वंसाधिकरणमपि न कार्यद्रव्यानधिकरणं तथा च कार्यद्रव्यानधिकरणतदधिकरणकालसिद्धिः । स एव च प्रलयः । यदि च खण्डप्रलयत्वेन नैवं सिद्ध्यति तदा भावकार्याधिकरणकार्यद्रव्यानधिकरणाधिकरणध्वंसप्रतियोगिवृत्तीति साध्यम् । हेतौ ध्वंसत्वे व्यभिचारवारणाय भावेति । आत्मत्वादौ व्यभिचारवारणाय कार्येति । एवं च भावकार्याधिकरणं कार्यद्रव्यानधिकरणं कालः खण्डप्रलय इति लक्षणं सिद्ध्यति । कार्यद्रव्याधिकरणं कालः सृष्टिरिति सृष्टिलक्षणम् । महाप्रलयलक्षणन्तु भावकार्यानधिकरणकालत्वम् । तत्सिद्धिस्तु भावकार्यत्वं स्वाश्रयानाधिकरणाधिकरणध्वंसप्रतियोगिवृत्ति भावकार्यवृत्तिधर्मत्वात् कार्यद्रव्यत्ववदिति । न च शब्दत्वादौ व्यभिचारस्तत्रापि खण्डप्रलयमादाय साध्यसत्त्वात् । न च पाकजरूपत्वादौ स, पक्षसमत्वात् । न च द्रव्यत्वादौ व्यभिचारो मात्रपदस्य देयत्वादिति संक्षेपः ।

ततः-प्रलयानन्तरम् । पुनरित्यनादितामाह । एवं च सर्गप्रलययोरनिदंप्रथमता सिद्धा । भोगेति । भोगश्च यद्यपि न सुखसाक्षात्कारो दुःखसाक्षात्कारेऽव्याप्तेः, नापि दुःखसाक्षात्कारः सुखसाक्षात्कारेऽव्याप्तेः, नापि सुखदुःखान्यतरसाक्षात्कारः, सुखसाक्षात्कारो दुःखसाक्षात्कारो वा भोग इत्येतावतैवोपपत्तौ विशेषवैयर्थ्यात्, अव्याप्तिवारकस्य विशेषणस्यानुपादेयत्वात्, अपि च अलौकिकप्रत्यासत्तिमादायावर्तमानसुखादिसाक्षात्कारेऽतिव्याप्तिः । तथापि समानाधिकरणसमानकालीनसाक्षात्कारविषयताव्याप्यजातिमल्लौकिकसाक्षात्कारो भोग इत्यवधेयम् । व्यधिकरणभगवत्साक्षात्कारविषयताव्याप्यज्ञानत्वादिरपि जातिर्भवतीति ज्ञानादिसाक्षात्कारेऽनतिप्रसक्तये समानाधिकरणेति । समानाधिकरणालौकिक-

प्रत्यक्षमादायातिप्रसक्तये समानकालीनेति । नहि योगिज्ञानं प्रमेयमित्यादिविज्ञानं वा सकलस्वविषयज्ञानसमानकालीनमिति । एवं च यत्र यत्र ज्ञानत्वं तत्र तत्र स्वाश्रयसमानाधिकरणसमानकालीनसाक्षात्कारविषयत्वमित्यादिव्याप्तिर्नास्ति तेन पुंसा ऽज्ञातस्यापि ज्ञानस्य नाशात् सुखदुःखे तु ज्ञाते नश्यत इत्यवधेयम् । वृत्तिलब्धादृष्टापेक्षेभ्य इति । लब्धवृत्त्यदृष्टापेक्षेभ्य इत्यर्थः । आत्माणुसंयोगेभ्य इति । अदृष्टवदात्मसंयोगात् क्रियोत्पत्तिरित्यर्थः । यद्यपि प्रलयकालीनक्रिययैव सर्वात्मादृष्टस्य वृत्तिलाभे सति संयोगोत्पत्तिः सम्भवति तथाप्ययमपि पक्षः संभवतीत्युक्तः । नन्वदृष्टवदात्मसंयोगस्य क्रियाहेतुत्वे किं मानमिति चेत् । या क्रिया यदीयव्यधिकरणगुणजन्या सा तत्संयोगकारणकेति व्याप्तेः सत्त्वात् । ननु क्रियापदेन कार्यमात्रग्रहणे घटरूपे कपालादिव्यधिकरणरूपजन्ये कपालघटसंयोगासमवायिकारणत्वशून्ये व्यभिचारः, कर्मग्रहणे मन्त्रकृतशाखाचलन आकाशीयव्यधिकरणगुणमन्त्रात्मकशब्दजन्य आकाशशाखासंयोगाजन्ये व्यभिचार इति चेत् । यत्कर्मादृष्टाद्वारकयदीयव्यधिकरणगुणगणजन्यं तत्तत्संयोगकारणकमिति व्याप्तिसत्त्वात् । अत एव नेश्वरज्ञानादिजन्ये घटादिकर्मणि तत्संयोगजन्ये व्यभिचारः । ईश्वरज्ञानस्य कार्यमात्रकारणत्वे त्वदृष्टद्वारकत्वादिति । दोधूयमानो-भृशं कम्पमानः, प्रतिबन्धकपृथिव्या अनुत्पत्तेरप्रतिबद्धगतित्वात् । गतिश्चास्य तिर्यगेव पवनजातिनियतत्वात् । तदनन्तरम्पवनोत्पत्त्यनन्तरम् । तेन द्व्यणुकादिना पोप्लूयमान आधारीभूतपवनवेगात् ।तदनन्तरं-जलोत्पत्तेरनन्तरं,तस्मिन् जलनिधौ महापृथिवी, महत्त्वं प्राथम्यात् खननाद्यभावात् । संहता-निबिडावयवा, अतिवाताद्यभावेनाविशीर्णत्वात् ।देदीप्यमानोऽभिभावकाभावात् । एवमुक्तेन क्रमेण । अभिध्यानमिच्छा न तु कुलालादेरिव कायव्यापारापेक्षेत्यर्थः । ब्रह्माण्डोत्पत्तौ पार्थिवपरमाणूनामुपष्टंभकत्वकथनेन तस्य सुवर्णमयत्वमुक्तं भवति ।

तस्मिन्नण्डे सर्वलोकपितामहं शरीरिणामाद्यम् सकलभुवनसहितश्चतुर्दशभुवनसहितं विनियुङ्क्ते-'त्वमेवकुर्वि'ति । स चेति चकारो भगवतः समुच्चयार्थः ईश्वरान्यकर्तृक ईश्वरस्यापि कर्तृत्वात्तस्य साधारणकर्तृतया ब्रह्माद्यसाधारणकर्तृकेन ब्रह्मादेरप्याक्षेपात् ।

अतिशयेन ज्ञानादिभिः संपन्नः, अज्ञत्वे पराधिष्ठानापेक्षा स्याद्वैराग्ये रागात्पापिष्ठमपि सुखेन योजयेदसामर्थ्यलक्षणेऽनैश्वर्ये ज्ञानमपि न कुर्यात् न हि कपालादि जानन् कुलालः कलशीङ्करोतीति। कर्मविपाकमिति । कस्य कर्मणोऽधुना भोग इत्येवंरूपम्। प्रजापतयस्तत्तत्कालनियतप्रजास्रष्टारः दक्षादयो,मनवः स्वायंभुवप्रभृतयो राजधर्मप्रवर्तयितारः, देवाः हविर्भागभोक्तारः आदित्यादयः, ऋषयश्च प्रथमं वेदाध्येतारो गौतमादयः, पितरः स्वधाधिकारिणः कव्यवाडनलादयः, गणाः कूष्माण्डप्रभृतयो बलिभागिनः । सुतान् मानसानिति च प्रजापतिप्रभृतौ सम्बध्यते । गणशब्दोऽपि समूहवचनतया सर्वत्राभिसम्बध्यत इत्येके । मुखादिपदेन वर्णविशेषारम्भकादृष्टविशेषोपगृहीतभूतभेदग्रहणम् । अन्यानि-तिर्यगादीनि, उच्चावचानि-प्रकृष्टनिकृष्टानि । आशयानुरूपैः पूर्वजन्मसंस्कारसुसदृशैः । धर्माधर्मेत्याद्युपलक्षणमधर्माज्ञानावैराग्यानैश्वर्यैरित्यपि बोद्धव्यम् । ब्रह्मणो नियोज्यत्वे भगवद्भिन्नतापक्षे, तत्स्वरूपत्वे तु भगवत्स्वरूपो ब्रह्माऽनियुक्त एव सृजतीति मन्तव्यम् । एवं च यदापि ब्रह्मा भगवदनुग्रहपात्रं जीवविशेषः तदापि तस्य नियोगोऽन्तर्यामितया प्रेरणमात्रं ब्रह्मणः पूर्वं भगवच्छरीराभावेन त्वमेवं कुरु इति वागात्मकनियोगाभावात् । ब्रह्मणो वेदाध्ययनाय शरीरस्यावश्यकतया वागात्मक एव नियोग इति वा । एवञ्च ऋषयः प्रथमं वेदाध्येतार इत्यन्यापेक्षया, सर्वापेक्षया ब्रह्मणः प्रथममध्येतृत्वात् । तथाच प्रलयसिद्धौ तदनन्तरं वेदप्रणयनं भगवत एव । न च घटादिसंप्रदायानुपपत्तिः,भगवतैव भूतावेशन्यायेनास्मदाद्यदृष्टसृष्टस्वतन्त्रशरीरेणैव प्रवर्तनात् । प्रयोजकवृद्धप्रयोज्यवृद्धभावापन्नानेककायग्रहणेन शक्तिग्रहोऽपि भगवत एव । न च निष्प्रयोजनतया किमितीयतीं कष्टसृष्टिं स्वीकरिष्यतीति वाच्यम् । तस्य सकलव्यापारस्य परार्थत्वात् । अत एव परमाण्वाद्यधिष्ठानमपि तेनोपपद्यते वैचित्र्यञ्चादृष्टादिवैचित्र्यादेव समर्थनीयमिति । वृत्तिलाभश्च निरोध इव कालभेदादेव भविष्यतीति । इति सृष्टिवादः ।

अथ प्रासङ्गिकं किञ्चिद्विचार्यते । घटादिपरमाणूनां घटादिजनकत्वमेव पटादिजनकत्वेन हि पार्थिवत्वमपि वा ? घटादिजनकत्वमेवेति तावत्प्राप्तम् अन्यकारणस्यान्यत्राजनकत्वात् । वापरमाणोष्पाथ-

सम्प्रादुर्भाव इति । ननु स्पर्शवत्परमाणुत्वेन द्व्यणुकत्वेन कार्यकारणभावात्, न त्वमुकपरमाणुत्वेनामुकद्व्यणुकत्वेन गौरवात्, तथाच घटारम्भकात्परमाणोः कदाचित् पटोत्पत्तौ किं बाधक-मिति चेत् । विशेषं विना घटारम्भदशायां घटपरमाणुभ्यः पटार-म्भापत्तेरिति ।

अत्रोच्यते । न तावत् घटादिपरमाणुषु घटाद्यारम्भकताप्रयोज-को जातिविशेषः सम्भवति परमाणुषु पृथिवीत्वादिव्याप्यजातेरभा-वात् .किन्तु रूपादिविशेषशालिनस्ते कार्यविशेषमासादयन्ति रूपाद-यस्तु न परमाणुषु नियताः किन्तु पाकात्कदाचिद् घटानुकूला जाय-न्ते, तथाच यैरेव परमाणुभी रूपादिविशेषमासाद्य घटघटना तैरेव विशेषान्तरमासाद्य पटप्रादुर्भावोऽपि । यत्र च दृष्टो रूपादिविशेषो जलपरमाण्वादौ तत्रादृष्टविशेषसंसृष्टा एव ते कार्यविशेषमारभन्ते, तथाच परमाणूनाम कार्यविशेषजनकत्वनियमोऽत एव क्षीरपरमाणु-भिरेव प्रतश्च नस(?)नाप्यैर्दधिजन्म पटादिपरमाणुभिरेवं सम्भव इति सकलशास्त्ररहस्यम् ।

ननु भगवतः सिसृक्षादि तत् सिद्धौ स्यात् सा तु प्रमा-णमपेक्षते, न च तदस्ति । ननु शब्दः प्रमाणं वक्तृनिष्ठयथार्थवा-क्यार्थज्ञानगुणजन्यत्वेन वेदे वक्त्रन्तरासंभवात् भगवानेव ज्ञायते । न चाध्यापकधारैव तद्गुणाधारः स्वातन्त्र्यस्यातन्त्रत्वादिति वाच्य-म् । प्रलयोत्तरं प्राथमिकवेदप्रामाण्याय तस्य स्वीकार्यत्वात् । न च सृष्ट्युत्तरसिद्धयोगर्द्धयः सृष्ट्यन्तरे वेदार्थं साक्षात्कृत्य जीवा एव वेदप्रणेतार इति वाच्यम् । जातयोगानाममुक्तानां प्रलयेऽवस्थितौ प्रमाणाभावात्, तैः कायनिकायमासाद्य झटिति निखिलकर्मोपभोगेन मोक्षार्जनात् । न च भोगलम्पटतयाऽग्रिमसृष्टौ भोगार्थं ते कर्माव-स्थापयन्तीति वाच्यम् । तेषां भोगलम्पटतायां मानाभावात्, निर्दोष-तया नीरागत्वात्, प्रतिसृष्टि सर्वज्ञान्तरकल्पने गौरवात् । तस्मादी-श्वर एव वेदवक्ता इति चेत् । न । यथार्थयोग्यताज्ञानस्यैव शाब्दगु-णत्वात् समानाधिकरणत्वात्, न त्वनुमितौ यथार्थलिङ्गपरामर्शो गु-णो, न च वह्निमति धूलिपटलं धूमत्वेन ज्ञात्वाऽनुमातुं संभवतीति। भगवत एव स वाच्य इति चेत् । स्वरूपसद्बाध्यवति हेतुज्ञानस्यैव गुणत्वात्, न तूपमितौ यथार्थसादृश्यज्ञानं गुणो, न च प्रकृतशब्द-

वाच्ये सादृश्यं सादृश्यत्वेन प्रतीत्योपमातुः संभवतीति तदाधारतया भगवाननुरोद्धव्य इति चेन्न । स्वरूपसद्बोध्यवति सादृश्यज्ञानस्यैव भ्रमप्रमासाधारणस्य तत्र गुणत्वात् । ननु संशयविपर्ययोत्तरप्रत्यक्षप्रमायां विशेषधर्मो गुणो, न च प्रमातुर्विशेषे भ्रान्तत्वे तत्र तावत्तं भगवन्तं विना गत्यन्तरमन्तःकरणमुपारोढुमर्हतीति चेन्न । स्वरूपसद्बोध्यवति विशेषज्ञानस्यैव गुणत्वात् ।

वस्तुतस्तु स्वरूपसद्विशेष्यसम्बद्धविशेषणज्ञानमेव सर्वत्र गुण इति न गुणपरतन्त्रतया भगवत्सिद्धिः ।

केचित्त्वनित्यप्रमायामनुगतायाम् अनुगतस्य गुणान्तरस्य वक्तुमशक्यतया भूयोऽवयवेन्द्रियसन्निकर्षयथार्थवाक्यार्थलिङ्गसादृश्यज्ञानानामननुगतत्वात् प्रकृतार्थविषयिणी भगवत्प्रमैव गुण इत्याहुः । तदपि न । कार्यकारणयोरुभयोरपि प्रमात्वस्याननुगतस्य प्रवेशेनाननुगतत्वात् । तस्मान्न गुणाश्रयतया भगवत्सिद्धिरिति सिद्धम् । न च प्रमाणान्तरमस्तीति मीमांसकाः ।

अत्र न्यायकुसुमाञ्जलौ आचार्यचरणैरुक्तमनुरुध्य वदामः । द्व्यणुकादिस्तावत्सर्गो, न च द्व्यणुकमपरिमाणमेवोत्पद्यते, न च द्व्यणुकपरिमाणं प्रति परमाणुपरिमाणमेवासमवायिकारणमणुपरिमाणस्यासमवायिकारणत्वाभावात्, किन्तु परमाणुद्वित्वं तत्र च नास्मदादीनामपेक्षाबुद्धिः कारणं तस्याः शरीरसापेक्षत्वात्, शरीरस्य च द्व्यणुकाद्यतत्कालीनत्वात, तस्मात्सर्गादिद्व्यणुकपरिमाणासमवायिकारणद्वित्वनिर्वाहकापेक्षाबुध्यधिकरणत्वेन यदुकुलधुरीणः सिद्ध्यति । काश्चित् वेदे वाक्यार्थज्ञानपूर्वको प्रमाणवाक्यत्वात् महाभारतवत् । न च शुकवदुच्चरिते प्रमाणवाक्ये व्यभिचारः, पक्षसमत्वात् । न चेदानीन्तनवेदेऽध्यापकवाक्यार्थज्ञानमादाय सिद्धसाधनम्, वेदत्वेन सर्गादिवेदस्यापि पक्षतया पक्षतावच्छेदकावच्छेदेन साध्यासिद्धेरभावात् ।यादृशी साध्यसिद्धिरपेक्षिता तस्यां सत्यामेव सिद्धसाधनात् । शुकवदुच्चरितं लौकिकमेव वा प्रमाणवाक्यं किंचित् पक्षो, वाक्यार्थज्ञानकारणकत्वं च साध्यं, न च तत्र वक्तुर्वाक्यार्थज्ञानं संभवति तस्य तदानीं शुकसदृशत्वात् । शुकोच्चारितमेव वा प्रमाणवाक्यं पक्षः, तत्र च ब्रह्मण्यदेवस्यैव वाक्यार्थज्ञानमादास्यति । वाक्यार्थज्ञानं च वाक्यप्रयोगं प्रति अवश्यं कारणं सति वा-

क्यार्थज्ञाने कवीनां काव्यरचनादर्शनात् असति चादर्शनात् अ-न्वयव्यतिरेकाभ्यां कार्यकारणभावव्यवस्थितेः । अप्रमाणवाक्यश्रुतौ तु न वाक्यार्थज्ञानं कारणं शुकाद्युदीरिते तादृशि शुकादीनां वाक्यार्थज्ञानाभावात्, भगवतस्त्वशेषविशेषदर्शित्वेनासद्वाक्यार्थज्ञानाभावात्। ननु अप्रमाणवाक्येऽपि वाक्यार्थज्ञानान्वयव्यतिरेकौ दृश्येते तत्कथमत्र कारणतेति चेत् । तद्विशेषं प्रति कारणत्वेऽपि अन्यत्राकारणत्वाद् "ययोर्विशेषयो"रिति न्यायस्य बाधकाभावसापेक्षत्वात् । प्रकृते च भगवतोऽसदर्थावगाहिज्ञानासम्भवेन बाधकसत्त्वात् प्रमाणवाक्ये तु तदसत्त्वेन न्यायप्रवृत्तेरव्याहतत्वात् । अपि च कर्तुरुपादानगोचरापरोक्षज्ञानसम्भवेन वाचकघटितत्वपक्षे भावकार्यमात्रजनकत्वमुपादानकत्वम् । उपादानपदपदे कारणपदाभिषेके तु कार्यमात्रतया च क्षित्यादिकर्तृतया भगवत्सिद्धिः । ननु कर्तृत्वेन कारणतायां घटत्वादिनैव कार्यता तथा च कथं क्षित्यादौ कर्तृसिद्धिरिति चेत् । उत्पत्तिमत्त्वेन भावत्वे सति भावत्वेन वा सामान्यतः कार्यत्वस्योत्सर्गाख्यतर्कणानुगृहीतत्वात् घटत्वादीनामनेकतया प्रकृतस्य सखण्डोपाधितया गुरुत्वेऽप्येकतया लघुत्वात् सामान्यविशेषापेक्षया गुरुत्व एवोत्सर्गसाम्राज्यात् । एवं च यत्र विशेषापेक्षया सामान्यस्य लघुत्वं तत्रोत्सर्गलाघवयोर्द्वैराज्यम्, यत्र तु सामान्यतः तत्रोत्सर्गस्यैव साम्राज्यम् । यत्र तु विशेषे लाघवं तत्रोत्सर्गस्य पदप्रच्युतिरेव । यत्त्वेककर्तृत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकं कथं घटत्वाद्यनेकमिति । तन्न । द्रव्यत्वेन कारणतायाः संयोगविभागत्वादिना कार्यतायाः सत्त्वात् । वस्तुतस्तु कर्तृत्वेन घटत्वेन न कार्यकारणभावः क्वचिदपि घटोत्पत्त्यापत्तेः, किन्तूत्पत्तिमत्त्वादिकमेव तत्कार्यतावच्छेदकम् । ननु कुलालत्वादिना घटत्वादिनाऽवश्यं कार्यकारणभावःक्वचिदप्यघटस्य कुलालात्पटस्य चानुत्पत्तेः, तथाच किमर्थं सामान्यतः कार्यकारणभाव इति चेत् । न । 'ययोर्विशेषयो'रित्यादिन्यायेन सामान्यतः कार्यकारणभावव्यवस्थितेः, कुलालत्वादिना च न जातिस्मितया(?) ब्राह्मणादिनापि घटादिजननात्, किन्तु घटोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वात्, एवञ्च घटोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वादिना घटत्वादिना विशेषकार्यकारणभावे सामान्यतोऽपि तदायाति

निरुक्तन्यायात्। ज्ञानादेश्च कर्तृकारणतावच्छेदकत्वेऽपि न कारणक्षतिरिति इन्द्रियार्थसन्निकर्षसन्निकृष्टेन्द्रियन्यायात् । ननूपादानगोचरापरोक्षज्ञानादिमत्त्वेनात्मनः कारणता भवतु तादृशज्ञानादिशून्येऽतिप्रसंगवारणाय, तादृशज्ञानादीनां तु कारणत्वे किमित्यात्ममनिष्ठत्वमवच्छेदके प्रविशति दोषस्य कस्यचिदभावात् इति चेत् । तर्हि इन्द्रियसन्निकर्षत्वेन कारणत्वं भवतु सन्निकर्षत्वस्यातिप्रसक्तत्वात् सन्निकृष्टेन्द्रियत्वेन तु किमिति कारणत्वमिन्द्रियत्वस्यानतिप्रसक्तत्वात् इति साम्यात् । न च सन्निकृष्टेन्द्रियादपि बोधापत्तिः, सन्निकर्षस्य सहकारित्वात् । न चैवमिन्द्रिये विनिगमनाविरहाभावेऽपि अवच्छेदकमपीन्द्रियं कारणं प्रमाणं विना प्रमानुत्पत्तेः, ज्ञानादेस्त्ववच्छेदकस्य कारणत्वेन प्रमाणत्वमन्वयव्यतिरेकयोरवच्छेदकेऽपि दर्शनात् इति वाच्यम् । एवमपि ज्ञानादेरवच्छेदकत्वे कर्तुः कारणत्वानपायात् । अनुमानं तु क्षितिः सकर्तृका भावकार्यत्वात् घटवत् । न च भूधरप्रभृतौ व्यभिचारः, पक्षसमत्वात् । साध्याभाववत्तया निश्चिते हेतुसन्देहस्य सन्दिग्धानैकान्तिकत्वात् । अन्यथा पक्षेऽपि सन्दिग्धानैकान्तिकतापत्तेः । न च पक्षातिरिक्ते स दूषणम्, प्रतिज्ञाविषयत्वस्य पक्षत्वे स्वार्थानुमाने सन्दिग्धानैकान्तिकत्वापत्तेः, संशयविषयत्वस्य पक्षत्वे पक्षसमस्यापि पक्षत्वात् । न चादृष्टद्वारा रूपावृष्ट्युपादानपुरोडाशादिगोचरापरोक्षज्ञानादिमता क्षितिजननात् सिद्धसाधनमर्थान्तरता वा, उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वस्य साध्यत्वात् । तर्हि पुरोडाशादिगोचरज्ञानादिमतः क्षितौ तथाऽजनकत्वमिति । न चैवं क्षितिमात्रकर्तृसिद्धौ तस्य न जगत्कर्तृत्वासिद्धिरिति वाच्यम् । ज्ञानादेः शरीरनिरपेक्षतयाऽनादिनिधनत्वसिद्धौ निष्कारणकतया किञ्चिद्विषयकत्वस्य सर्वविषयकत्व एव पर्याप्त्या सर्वकर्तृनिर्वाहकरूपसत्त्वेन सर्वकर्तृत्वात्, अत एवास्मदादिकर्तृकेऽपि स कर्ता शरीरानिरपेक्षत्वं चातः सर्गादिद्व्यणुकपूर्वसत्त्वसर्गादेश्च प्रलयसाधनेन सिद्धत्वात् । ननु क्षित्यादेः पक्षत्वे लाघवात् एकः कर्ता सिध्यतु, क्षितिमात्रस्य तु पक्षत्वे तत्र कर्तृसाधनेतरभूधरादौ प्रत्येकं कर्ता साधनीयो, न च तावत्कर्तुरेकत्वे किञ्चित्प्रमाणमस्ति न हि नानानुमानविषये लाघवं प्रवर्तते इति चेत् । क्षितिकर्तुरेव पूर्वनयेन जगत्कर्तृत्वोपपत्तौ भूधरादौ पुनः

कर्तृसाधनस्य व्यर्थत्वात् । ननु दृष्टान्ते शरीरिणः कर्तुः दर्शनेन तद्विपरीतस्य च पक्षे विवक्षितत्वात् विशेषविरोध इति चेत् । दृष्टान्तदृष्टविलक्षणस्य पक्षे विवक्षितत्वमात्रस्य विरोधत्वे पर्वतो वह्निमान् धूमादित्यत्रापि तदापत्तेर्महानसे व्यञ्जनसहचरितस्य सत्त्वेन पक्षे तद्विलक्षणस्य विवक्षितत्वात् । ननु व्याप्त्या शरीरी कर्ता साध्यः, पक्षधर्मतया त्वशरीरी, न च तयोरसहकारित्वेऽनुमानसम्भवः, तथा चायमेव विरोध इति चेत् । व्याप्त्या व्यापकतावच्छेदकावच्छिन्नस्य साधनेन शरीरिणोऽसाधनेन विषयविरोधाभावात्, अन्यथा प्रसिद्धानुमानेऽपि व्यञ्जनसहचरिततदसहचरितासिद्ध्या विषयविरोधापत्तेः । ननु प्रकृतानुमानेन नित्यं ज्ञानं सिद्ध्यति ज्ञानत्वनित्यत्वे च विरुद्ध इति । न । ज्ञानत्वानित्यत्वयोर्विरोधस्यासिद्धेः आकाशतदीयज्ञानादौ परस्परपरिहारदर्शनात् । विरोधस्य दोषत्वप्रसिद्धिस्तु चन्दनप्रभववह्निमानयमसुरभिरूपमयत्वादित्याद्यादाय । नन्वेवं विरुद्ध एव हेत्वाभास इति कुतो विशेषविरुद्धत्वेन गण्यते इति चेत् । विरुद्धस्य विशेषस्यैव । विशेषविरुद्धात्को विशेषः इति चेत् । साध्यहेतुविशेषयोर्विरुद्धेन यो विरोधस्तस्यैव विशेषविरोधपदेन ग्रहणात् ।

ननु शरीरसापेक्षस्यैव कार्यजनकत्वात् तेन विना कथमीश्वरः कर्तेति चेत् । शरीरपदेन साक्षात्प्रयत्नाधिष्ठेयग्रहणे द्व्यणुकादावपि जनितव्ये साक्षात् प्रयत्नाधिष्ठेयस्य परमाण्वादेः सत्त्वात् इन्द्रियाश्रयस्य सुखाद्यवच्छेदकस्य वा ग्रहणे कर्तुस्तदपेक्षाया अनवच्छेदकत्वात् । दण्डादीनां साक्षादधिष्ठानासंभवेन हि साक्षादधिष्ठेयं शरीरमपेक्षते कुलालादिर्भगवांस्तु साक्षादेवाधितिष्ठति परमाण्वादिकमिति किं साक्षादधिष्ठेयान्तरेण । ननु कर्तृत्वेन न जनकता किन्तु शरीरकर्तृत्वेन तथैवान्वयव्यतिरेकात् कुविन्दादेः कार्यदर्शनात् मुक्तात्मनश्चादर्शनात्, तथा च तत्र न भावकार्यत्वादिना जन्यता किन्तु कार्यविशेषत्वेनेति कथमीश्वरः सिद्ध्यतीति चेत् । एतस्य विशेषकार्यकारणभावरूपत्वेन कर्तृत्वेन भावकार्यत्वेन सामान्यकार्यकारणभावस्यावश्यकत्वात् । अपि च शरीरिकर्तृत्वेन न विशेषकारणता, किन्तु शरीरत्वेनैव, तथा च कर्तुः कर्तृत्वेन सामान्यकारणतैवेति । ननु क्षितिरकर्तृका शरीराजन्यत्वात् आ-

काशवदिति प्रतिषेधोऽस्तु इति चेन्न । शरीरपदस्य व्यर्थत्वादाकाशादावन्यजन्यत्वेनैव व्याप्तेर्व्याप्यस्यैव पक्षधर्मत्वेऽनुमितिजनकत्वात् । अत एव स्वरूपासिद्धिवारकं विशेषणं न ह्यते इति प्रवादो। येन विशेषणेन विना व्याप्तिर्गृहीतुं न शक्यते तस्यैव हेतौ सार्थकत्वात्, अत एव रूपादिषु मध्ये रूपस्यैव व्यञ्जकत्वादित्यत्राप्रसिद्धिवारकतया व्याप्तिग्राहकतया रूपादिषु मध्ये इति सार्थकम् । ननु शरीराजन्यत्वादित्यत्र शरीरजन्यत्वाभावोऽखण्डाभावो हेतुरखण्डाभावे च न वैयर्थ्यमित्यागौतमं प्रवाद इति चेन्न । तत्राजन्यत्वस्योपाधित्वात् आकाशादौ साध्यव्यापकत्वात् क्षित्यादौ साधनाव्यापकत्वात् । ननु भवदनुमानेऽपि शरीरजन्यत्वमुपाधिः घटादौ साध्यव्यापकत्वात् क्षित्यादौ साधनाव्यापकत्वात् इति चेत् । अनुकूलतर्काभावेन तस्य साध्याव्यापकत्वात्, साध्यहेत्वोश्च व्याप्तिग्राहकस्य कार्यकारणभावग्राहकस्य अनुकूलतर्कस्य दर्शितत्वात् प्रतिरोधानुमानेऽनुकूलतर्कस्याप्यभावाच्च ।

ननु कुलालादेरिष्टसाधनताज्ञानस्यानुमितिरूपस्य घटादौ जनकत्वात् तस्य च भगवति बाधात् कथं घटादिदृष्टान्तेन सिद्ध्यतीति चेत् । अपरोक्षज्ञानवतः साधने घटादेः दृष्टान्तीकृतत्वात् । ननु कुलालादेरनुमितिरूपमिष्टसाधनताज्ञानमेव चिकीर्षाप्रवृत्तिद्वारा घटादि साधयति न त्वपरोक्षज्ञानम्, तथा च कथं तद्दृष्टान्तेनापरोक्षज्ञानवतः सिद्धिरिति चेत् । अपरोक्षज्ञानस्याप्युपादानप्रत्यक्षत्वेन प्रवृत्तिकारणत्वात् न तूपादानप्रत्यक्षं विना कोऽपि प्रवर्तते इति दृष्टम् । ननु कुलालादेः प्रवृत्तेर्जन्यत्वात् सिद्ध्यति तत्कारणतयेच्छा ज्ञानं च, भगवत्प्रवृत्तेस्तु नित्यत्वात् किमिति तत्त्वज्ञानादिस्वीकार इति चेत् । प्रवृत्तिकारणत्वेन इच्छायास्तत्कारणत्वेन च ज्ञानस्यानङ्गीकारात् कार्यप्रयोजकत्वेनैव त्रितयाङ्गीकारात् । सृजति च भगवान् परार्थमेवेत्युक्तमेवेति सङ्क्षेपः ।

लीलावतीकृतस्तु कुलालादीनां घटादौ ज्ञानादिकमेव कारणमन्वयव्यतिरेकानुविधायित्वात्, कर्तृत्वं तज्जनकीभूतज्ञानादिमत्त्वमेव, कर्तरि कारकत्वव्यवहारस्तु'सविशेषणे हि'ति न्यायेन ज्ञानादिपर्यवसन्न एवौपचारिको वा । न च ज्ञानादीनां कपालादिप्रत्यासत्तिघटकतयाऽऽत्मनः कारणत्वं कारणप्रत्यासत्तेः कारणत्वादिति वाच्यम् । वि-

षयताया एव तत्र प्रत्यासत्तित्वात्। न च घट आत्मजन्यः कार्यत्वा-त्सुखादिवदिति वाच्यम्। अप्रयोजकत्वात् सुखादौ समवायिकारणत्वेन तदपेक्षणात्, अन्यथाऽऽकाशादिजन्यतापि स्यात् शब्दादिदृष्टान्त-स्य सत्त्वादित्याद्यभिप्रायेण किञ्चिदाहुः।

ननु प्रतिकूलतर्कोऽस्तु बाधक इति चेत्। क्षितिर्यदि सकर्तृका स्यात् शरीरजन्या स्यात् अल्पज्ञज्ञानजन्या स्यात् इत्यादितर्का-णां विपर्ययापर्यवसायित्वेनाभासत्वात्, विपर्ययापर्यवसानस्य व्यर्थ-विशेषणत्वादिना स्फुटत्वात्। यदीश्वरः कर्ता स्याच्छरीरी स्यादनि-त्यज्ञानवान् स्यादित्यादितर्काणामीश्वरासिद्ध्या निराकृतत्वात्। ननु ज्ञानत्वं न नित्यवृत्त्यात्मविशेषगुणवृत्ति जातित्वात् सुखवदिति चेत्। न। अप्रयोजकत्वात्।

एवमन्या अपि युक्तयो भगवत्यनुमन्तव्याः। तथा हि लक्षणानु-रोधेन नानार्थे विनिगमनानुरोधेन च तात्पर्यज्ञानं शाब्दबोधे कारणं सम्भवति लाक्षणिका नानार्थाश्च शब्दा वेदेऽपि। न च तत्रान्यस्य तात्पर्यं सम्भवत्यध्यापकानां सर्गादावसम्भवादिति तात्पर्याश्रयतया भगवत्सिद्धिः। तात्पर्यं च तत्प्रतीतीच्छयोच्चरितत्वमित्यादिरन्यत्र विस्तरः।

भगवत्साधने युक्त्यपेक्षा तु नास्तिकानां तत्तुल्यानां मीमांसका-नां च। आस्तिकास्तु वेदशिरोभिर्वेदान्तराच्च व्यासशुकदेवा-दिवाक्याच्च तमवधार्य निःसंशया अनासादितपंका जलमिवाना-विष्कृतपातकाः प्रायश्चित्तमिवाकृतबलवद्द्वेषाः शरणमिवानास्वादित-गरला भेषजपानमिवास्वीकृतदुर्गममार्गास्सार्थमिव अनपेक्षितध-ना दुःपार्थिवानुग्रहमिव चिन्तामिति(?) चित्रीभवत्विचित्रभगवच्चरि-त्रानुपस्थितेषु त्रासेषु त्राणान्तरमिवापेक्षितेषु पुमर्थेषु वा कारणा-न्तराणीव न जगन्नाथे नाथे रमाया युक्तिमपेक्षन्त इति।

ननु सिद्ध्यत्वेवमीश्वरो जगत्कारणत्वेन तज्ज्ञानादीनां तु अव-च्छेदकत्वेन दण्डत्वादिवदन्यथासिद्धिग्रस्ततयाऽकारणत्वमेवाया-तम्, तथा च भूयान् सिद्धान्तविप्लव इति चेत्। अत्र कुलालादी-नां कर्तृत्वेन कारणता, कर्तृत्वं चोपादानगोचरकृतिमत्त्वमेव धात्व-र्थस्वरसात्। एवं च ज्ञानेच्छयोरनवच्छेदकतया कारणत्वमेव उगत-तया तु कुलालावेच्छी(?) प्रवृत्तिमुत्पाद्य जनयतीति व्यापारतया प्रवृ-

त्तिरपि कारणं प्रवृत्तिं विनेच्छामात्राद् घटाद्यनुत्पत्तेः, तथा च यथेश्वर-स्यावच्छेदकस्यापि विनिगमनाविरहातिरिक्तस्थलेऽपि प्रमाणबलेन कारणत्वम् तथा प्रवृत्तेरपि । किञ्च चेष्टा तावद् घटादिकारणतया घटयतीति, सर्वसम्प्रतिपन्नचेष्टा च प्रयत्नवदात्मसंयोगजन्यतया प्रयत्नजन्या, तस्मात्प्रयत्नस्यापि घटादिघटकता न विरुद्धा, न ह्य-वच्छेदको व्यापारमपेक्षत इति क्वचिद् दृष्टम् तस्मात्कार्यजनकजन-कतया दण्डादिवत्प्रयत्नः कारणमपि अनुगततया तु कुलालादिका-रणतावच्छेदकः कुलालत्वादेर्जातिरुपाधेर्वाऽन्यस्य वक्तुमशक्य-त्वात् । तथाहि कुलालत्वं जातिः प्रथमचकुलालस्य सिसृक्षया घटनि-र्मातुः कुलालत्वेन व्यवहारेण यावद्द्रव्यभावित्वात्, नाप्युपाध्य-न्तरं सम्भवतीति घटकर्तृत्वस्यैव कुलालत्वात् । कर्तृत्वञ्चोपादानगो-चरकृतिमत्त्वमेवेति वदामः ।

ननु कुलालस्येष्टसाधनताज्ञानसत्त्वात् भगवत्यपि तदापत्तिः इति चेत् । जगत एव तदिच्छाविषयतयेष्टसाधनताज्ञानस्य भगवतः स-त्त्वात् । ननु कुलालदृष्टान्तेन तस्येष्टसाधनतानुमितिः स्यादिति चेत्। इष्टसाधनताशब्दादपि कुलालस्य प्रवृत्त्यनुमितित्वस्याप्रयोजकत्वात्। ननु भगवतोऽनुमितिरेव आयातु प्रत्यक्ष इन्द्रियेऽनपेक्षाया इवानु-मितौ लिङ्गानपेक्षाया उचितत्वादिति चेत् । उपादानप्रत्यक्षस्य कुला-लादेरावश्यकत्वात् भगवत्यपि कर्तरि तस्योपगमात् । ननु कुला-देः प्रयत्नस्य जन्यतया भवतूपादानप्रत्यक्षापेक्षा नित्ये तु भगवत्प्रय-त्ने किमित्येवमिति चेत् । इच्छादीनां विषयताया अन्यप्रवणतया नि-र्वाहार्थं ज्ञानपरिकल्पनात् उपादानप्रत्यक्षं विनोपादानविषयकप्र-वृत्तेरसम्भवेनोपादानविषयकप्रवृत्त्या व्याप्ययोपादानविषयकप्रत्य-क्षस्य व्यापकस्योद्गतत्वादिति संक्षेपः । इतीश्वरः ॥

(व्यो०) अथेदानीं भूतानां परीक्षाशेषनिवर्तनद्वारेणेश्वरपरी-क्षार्थं चतुर्णामित्यादिप्रकरणम् । तथाहि–भूतानामुद्देशानन्तरं पूर्व-प्रकरणेषु लक्षणपरीक्षाभिधानेऽपि सृष्टिसंहारविधिर्नोक्तस्तथेश्वरः ऊर्ध्वनमस्कारव्याजेनोद्दिष्टो लक्षणतश्च प्रधानत्वात् धर्मपरीक्षा-मन्तरेण परीक्षितुं न शक्यत इति प्रकरणारम्भः । सृष्टिसंहारविधिश्च तुल्यतयैकस्मिन्नेव प्रकरणेऽभिधीयते । प्रतिप्रकरणाभिधाने तु प्रकर-णचतुष्टयमेतावत्स्यादिति सङ्ग्रहरूपताव्याघातः । नन्वेवं वैधर्म्या-

वसरे साधर्म्यप्रतिपादनमन्याय्यम् । न । प्रत्येकं भूतेषु सृष्टिसंहारविधेर्वैलक्षण्येऽप्येकत्राभिधानात्साधर्म्यज्ञानम् , न परमार्थतः । न च वैधर्म्येऽभिधीयमाने यद्यत्साधर्म्यं तत्प्रतिषेधः । यथा पृथिव्यादीनां परमाणुकार्यरूपतया द्वैविध्यं कार्यञ्च शरीरादित्रयं परस्परवैलक्षण्याद्वैधर्म्येऽपि न साधर्म्यरूपतां विजहातीति ।

अत्र चतुर्णामित्युक्ते न ज्ञायते केषामतो महाभूतानामिति । महद्ग्रहणम् अणुव्यवच्छेदार्थम । नन्वेवं द्व्यणुकस्यापि सृष्टिसंहारवतो व्यवच्छेदः स्यान्न, महदारम्भकत्वेन तस्यापि महच्छब्दवाच्यत्वात् । तथाहि-द्व्यणुकादिप्रक्रमेणोत्पत्तिविधानात्संहारस्य च परमाण्वन्तस्य द्व्यणुकेऽपि सृष्टिसंहारविधौ प्रतिज्ञा कार्यैव । सा चैवं कृता स्यात्। तथापि महाभूतानामित्युक्ते न ज्ञायते कियतामिति तथापि चतुर्णां महाभूतानामित्युक्ते न ज्ञायते केषामितः पृथिव्यादीनामिति लभ्यते ।न चाकाशस्यैतद्व्याख्यानावसरसमत्यावस्त्ववसरः(?) । तदेवं चतुर्णां महाभूतानां सृष्टिसंहारयोर्विधिः(प्रकारः) तावेव चाभिधीयेतऽनेनेति विधिः प्रमाणं,ताभ्यां वा प्रमाणभूताभ्यां विधिर्विधाता कर्तोच्यत इत्यावर्त्यमानमनेकार्थमेतदेव वाक्यम । तत् ब्राह्मेण माननेत्यादिना संहारविधेर्व्याख्यानं क्रमातिक्रमणादा संसारस्यानादित्वज्ञापनार्थम् । तथाहि-संहारात्पूर्वं सृष्टिर्लभ्यते, ततोऽपि संहार इत्यनादित्वम् । स च संहारः कथं भवतीत्याह महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यः तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाश इति । तेषां शरीरेन्द्रियाणामारम्भकेष्वणुषु द्रव्यारम्भकसंयोगनिवृत्तौ द्व्यणुकविनाशे तदारब्धस्यापि निवृत्तिरिति आह—महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यः परमाणुर्यावत्तावद्विनाश इति । द्रव्यारम्भकसंयोगनिवृत्तिः स्वकारणाणुविभागेभ्यस्ते च महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः । तथाहि—महेश्वरेच्छा निमित्तकारणमात्मनामणुभिः संयोगाश्चासमवायिकारणमणवस्तु समवायिन इत्यणुषु कर्माण्युत्पद्यन्ते । कस्मिन्नवसर इत्याह सर्वात्मसु गताश्च तेऽदृष्टाश्च तेषाम्, किंविशिष्टानां ? शरीरेन्द्रियमहाभूतान्युपनिबध्यन्ते सम्पाद्यन्ते यैस्तेषां वृत्तिः फलदानसामर्थ्यं तस्योपभोगायुगपन्निरोधे विनाशे सति। स च संजिहीर्षासमकालम् । यदा हि सकलभुवनपतेर्महेश्वरस्य संहर्तु-

मिच्छा सम्पद्यते । सा च किमर्थं? प्राणिनां संसारे शरीरोपादान-परित्यागद्वारेण खिन्नानां निशि रात्राविव विश्रामार्थम् । यथा हि शरीरव्यापारादहनि खिन्नानां तदभावाद्रात्रौ विश्रामस्तथेहापि इति । कदा च संजिहीर्षा? ब्रह्मणोऽपवर्गकाले । यदा ह्यधिकारसमाप्तौ ब्रह्मापवृज्यते स वर्षशतावसाने वर्तमानस्य ब्रह्मणो भवतीति । केन मानेनेत्याह ब्रह्मण इदं ब्राह्मं तेनेति । तत्पुनर्युगं द्वादशसहस्रं युगकल्पं विद्धि चतुर्युगमेतत्सहस्रपर्यन्तं तदहर्ब्राह्ममुच्यते । इत्येवंविधैर्दिनैर्मासादयोऽपि वक्तव्या इति मानम् । एवं यथा ब्रह्मणोऽपवर्गकाले महेश्वरस्य संजिहीर्षासमकालं विशिष्टादृष्टानां वृत्तिनिरोधे सति शरीरेन्द्रियाणां विनाशस्तथा पृथिव्युदकज्वलनपवनानामनेनैव क्रमेणेति । परमाणुषु कर्मोत्पत्तौ विभागेभ्यः सत्संयोगनिवृत्तिद्वारेणोत्तरस्मिन्नुत्तरस्मिन्सति पूर्वस्य पूर्वस्य विनाश इत्युत्पत्त्यपेक्षया पूर्वमुत्पन्नम्, तत्र उत्तरस्मिन् उत्तरस्मिन् विद्यमाने सति विनश्यतीति । तथा ह्युत्तरस्मिन् सति पूर्वं वायोर्विनाशः तदनन्तरमुदकस्येत्यादि ।

अन्ये त्वेतद्वाक्यं पाठापेक्षयैव विवक्षितमिति मन्यन्ते । तथाहि—यथा शरीरेन्द्रियाणां विनाशः तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानां विनाशः अनेनैव क्रमेणेति, पाठक्रमेण न क्रमान्तरेणेति । एवञ्च शरीरेन्द्रियमहाभूतानां विनाशे तदाश्रितानां गुणकर्मणामपि विनाशः । ततः प्रविभक्ताः कार्यानाधाराः परमाणवोऽवतिष्ठन्ते । तथा न परं परमाणवो धर्माधर्मसंस्कारैरनुविद्धाः सम्बद्धा आत्मानश्चावतिष्ठन्ते । अथान्येषामपि सामान्यादीनामवस्थाने किमर्थं विशेषाभिधानमिति चेत् । द्रव्यविनाशस्य परमाणवन्तताज्ञापनार्थमात्मनाञ्च धर्मादिविनाशकारणाभावाद्धर्माधर्मसंस्कारानुविद्धानामवस्थानं न केवलानामिति । अन्यथा हि निमित्ताभावात्पुनरुत्पत्तिर्न स्यात् । अथ कियन्तं कालमेवमवस्थानमित्याह तावन्तमेव कालमिति । ब्राह्मेण मानेन वर्षशतं यावदिति ।

ततः पुनर्वर्षशतान्तेऽपि विश्रामप्रापकादृष्टनिवृत्तौ प्राणिनां कर्मविपाकोपलम्भात् भोगभूतये भोगभूत्यर्थं महेश्वरस्य सिसृक्षा स्रष्टुमिच्छा सम्पद्यते । तदनन्तरं पवनपरमाणुषु समवेतानि कर्माण्युत्पद्यन्ते । केभ्यः कारणेभ्य इत्याह—तत्संयोगेभ्यः तेषां भोगिनां संयोगाः परमाणुभिः तेभ्यः इत्यसमवायिकारणनिर्देशः । ते च कर्मारम्भे

सापेक्षा इत्याह सर्वात्मगतवृत्तिलब्धाऽदृष्टापेक्षेभ्य इति । सर्वात्मसु भोगिषु गताः सर्वात्मगतास्ते च ते वृत्तिलब्धाऽदृष्टाश्चेति । वृत्त्या सहकारिकारणेन लब्धाश्च तेऽदृष्टाश्चेति तथोक्तास्तानपेक्षन्त इति तदपेक्षास्तेभ्य इति । न तु वृत्तिर्लब्धा यैरिति व्याख्यानम् । अत्र निष्ठान्तस्य पूर्वनिपातप्रसङ्गात् । अथ काऽसौ वृत्तिरदृष्टानां सहकारिकारणम्? विश्रामप्रापकादृष्टाभावोपलक्षितः कालविशेषः, तत्सद्भावे कार्यकरणात् । तथाहि ब्राह्ममानेनापरिपूर्णे वर्षशते विश्रामप्रापकाऽदृष्टस्य प्रतिबन्धकस्य भावादुपभोगप्रापकादृष्टसद्भावेऽपि सृष्टिर्न भवति परिपूर्णे तु वर्षशते विशिष्टाऽदृष्टाभावादुपभोगप्रापकादृष्टानां सृष्ट्यै व्यापार इति । प्रतिबन्धकाभावविशिष्टः कालो वृत्तिस्तेषामिति ज्ञायते । महेश्वरस्यापि तत्सद्भाव एव सिसृक्षा भवतीति । तदेवं पवनपरमाणुषु कार्योत्पत्तौ सत्याम् अनन्तरं विभागस्तस्मात्संयोगनिवृत्तौ तेषां परमाणूनां परस्परसंयोगेभ्यो द्व्यणुकान्युत्पन्नानि त्र्यणुकान्यारभन्त इत्यादिक्रमेण महान्वायुः समुत्पन्नो नभस्याकाशे दोधूयमान इत्यतिशयेन कम्पमानस्तिष्ठति । सचायमुत्पन्नोऽतिशयेन वेगसम्बन्धात् गुरुत्ववतामपातहेतुर्भवति । दृष्टं च वायोः पर्णादिप्रतिबन्धे सामर्थ्यम् । अयं चातिशयेन महत्त्वे सति वेगसम्बन्धादुदधिसहितां पृथिवीं तृणमिव धारयत इति न चित्रम् । तदनन्तरं वायूत्पत्त्यनन्तरं तस्मिन्नेव वायावधिकरणभूते तावदिति । आप्येभ्यः परमाणुभ्यस्तेनैव क्रमेणेति । कर्मोत्पत्तिद्वारेण विभागेभ्यः संयोगनिवृत्तौ परस्परसंयोगेभ्यो द्व्यणुकान्युत्पद्यन्ते ततस्त्र्यणुकमित्यादिक्रमेण महान् सलिलनिधिः समुद्रः समुत्पन्नः पोप्लूयमानोऽत्यर्थं प्लवमानस्तिष्ठति । तदनन्तरं सलिलोत्पत्त्यनन्तरं तस्मिन् सलिलनिधावधिकरणे पार्थिवेभ्यः परमाणुभ्यः पूर्वक्रमेण द्व्यणुकत्र्यणुकोत्पत्तिरिति । एवमादिक्रमेण महापृथिवी समुत्पद्यते । सा चोत्पन्ना संहताऽवतिष्ठते । तस्मिन्नेव महोदधौ अधिकरणे तैजसेभ्यः परमाणुभ्यः पूर्ववद् द्व्यणुकोत्पत्तिक्रमेणोत्पद्यते महांस्तेजोराशिः । स चोत्पन्नो देदीप्यमानोऽत्यर्थं प्रकाशमानस्तिष्ठति । न च तेजसो जलेन विरोधादाधाराधेयभावानुपपत्तिरिति वाच्यम् । आधाराधेयभावस्याप्युपलब्धेः । यथा वाडववरुणाविति । अन्ये तु

हरिदाससंस्कृतग्रन्थमालासमाख्य-

काशीसंस्कृतसीरीज़-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि । मूल्यम् ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) रु० २—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १) रु० ६—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १) रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १) रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३) रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १—८

२९ कामसूत्रम्। श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नैरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम्। बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम्।(काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलिः। न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः। महामहोपाध्यायरुचिदत्तकृतमकरन्दाख्यासितमहामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः।(न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः। म० म० श्रीनागेशभट्टरचितः। म० म० भैरवमिश्रविर ...... परिभाषाविवृत्या—तत्त्वप्रकाशि ...... —०

३२ अर्थसंग्रहः। ... तः।श्री ... विरचि ... —०

३३ न्यायवार्त्ति ... भारद्वा ... लितब्रा ... —०

३४ शुक्लयजु ... —०

३५ शुक्ल ... —०

३६ सि ... —०

३७ का ... —०

३८ प्राकृ ... —४

३९ जीव ... —०

४० श्रीन ... —६

४१ मेदि ... —८

४२ मीम ... —०

४३ न्या ... —०

पत्रादिप्रेषणस्थानम्
२२—१—२७

जयकृष्णदास—हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फाटक
बनारस सिटी।